# GITA GRAMMAR

“The Vedas, the Upanishads, and the Gita can be seen as the main literary supports for the great religious civilization of India, the oldest surviving culture in the world.” (Thomas Merton, 1915-1968)

The Gita's 700 verses are included in the Mahabharata as chapters 25-42 of the Canto Bhishma-Parva. The Mahabharata is so called, because of its grave meaning (mahattva _greatness) and because of the Bharatas being its topic[42].

The Bhagavad-Gita was first translated into English in 1785 and published with an introduction by Lord Warren Hastings:

“The writers of the Indian philosophies will survive when the British Dominion in India shall long have ceased to exist, and when the sources which it yielded of wealth and power are lost to remembrance ... I hesitate not to pronounce the Gita’s performance of great originality, of sublimity of conception, reasoning and diction almost unequalled; and a single exception, amongst all the known religions of mankind.” (Lord Warren Hastings, Governor-General of British India, 1754-1826)

This translation, by an East India Company official, sparked translations of the Gita in various European languages and drew for it world-wide attention.

“The most beautiful, perhaps the only true philosophical song existing in any known tongue ... perhaps the deepest and loftiest thing the world has to show.” (Wilhelm von Humboldt, German minister of education and linguist, 1767-1835)

भगवद्गीता describes a threefold way of action: विकर्म (forbidden work, sin) produces bad reactions and has to be given up all together. अकर्म (inactivity), trying to stop all work, is not recommended (2.47) and not even possible (3.5). कर्म (one’s duty, स्व-धर्म, 2.48) is further divided into a) नित्य- (regular) and b) नैमित्तिक- (occasional). Although themselves not causes of liberation, both are at least helpful, because they keep away the evil effects which would result from their non-performance. c) काम्य-कर्म (work for enjoyment). To attain freedom from the bondage of कर्म (i.e., liberation), one has to give it up (see 18.7).

About the further procedure to attain liberation there are two paths delineated:

(1) कर्म-योग – the path of duty (in the गीता also refered to as योग or बुद्धि-योग): It stresses to renounce all fruits of work (कर्म-फल-त्याग, कर्म-त्याग, त्याग) by doing one’s duty. Thus, one gradually becomes purified of material desires (निष्काम), and achieves knowledge (बुद्धि). बुद्धि-योग means बुद्धि-रूपः योगः – the means (योग, उपाय) in the form of understanding.

(2) ज्ञान-योग – the path of knowledge (in the गीता also refered to as साङ्ख्य): It stresses to renounce all work meant for sense gratification (कर्म-न्यास, कर्म-सन्न्यास, सन्न्यास, सन्न्यास-योग) by cultivating detachment through spiritual knowledge (ज्ञान, साङ्ख्य).

Both paths are actually non-different, because the goal is the same – detachment from this world and attachment God. Or else, they can be seen as different stages on the same path (see 5.4). Since (2) कर्म-सन्न्यास is only possible when the mind is already purified from desires for sense gratification, to (1) work for purification is a save path for all (see 3.6,7,17,19). What गीता recommends is to perform one's duty as a service to God. This is the sum and substance of the instructions: After cutting your doubt with the sword of knowledge, stand up (4.42), always remember Me, and fight (the specific duty of Arjuna) (8.7), one who works for Me in devotion, comes to Me (11.55). Therefore, the paths refered to in the गीता as कर्म-योग, योग, नैष्कर्म, कर्म-त्याग and बुद्धि-योग refer ultimately to भक्ति-योग; and to be a योगी or योग-युक्त means to be a भक्त.

Religious texts of India were preserved with great accuracy, as the pupil had to learn the text, word by word, from the mouth of the teacher. Still, a variation in the original text can happen due to indistinct pronunciation, defective hearing or failure of memory. Alternative readings, none of which make a real difference, are found in the following verses: 1.19,43; 2.4,9,26,64; 3.42; 4.35; 5.26; 6.8,18,26; 8.7; 10.7; 11.20,28; 12.7,20; 13.13,18,21; 14.23; 16.13,23; 17.6,11; 18.25,35,44,66,68. The numbering differs in various editions and verse 13.1 is sometimes omitted. Mahabharata 6.43.4 suggests that some verses are lost altogether.

In our translation of the seven hundred गीता verses we have added information from the commentary of श्रीधर स्वामी, an influential scholar who lived in the fourteenth century. His सुबोधिनी ('which gives a clear understanding') is indeed so beautiful, that it ruled out almost all earlier गीता commentaries. Other information was taken from the commentaries of रामानुज (1017-1137, श्री-सम्प्रदाय), विश्वनाथ (1646-1755) and बलदेव (?-1768), both belonging to the गौडीय-सम्प्रदाय.

See also **48. Gita Word List** and **KOSHA**.

||1.1||

**Verse with Sandhi**

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

**Without Sandhi**

धर्म-क्षेत्रे कुरु-क्षेत्रे समवेताः युयुत्सवः मामकाः पाण्डवाः च एव किम् अकुर्वत सञ्जय

**Samāsa**

धर्मस्य क्षेत्रम् इति धर्म-क्षेत्रम् _the land of Dharma. कुरोः क्षेत्रम् इति कुरु-क्षेत्रम् _the land of King Kuru.

**Translation as Anvaya**

सञ्जय »O Sanjaya! धर्म-क्षेत्रे कुरु-क्षेत्रे समवेताः At the pilgrimage of Kurukshetra assembled युयुत्सवः मामकाः my sons, eager to fight पाण्डवाः च एव and the Pāndavas (the sons of his brother Pāndu) किम् अकुर्वत what did they do?« ('I hope they did not refrain from fighting under the influence of the holy place.')

**Subodhinī**

Examples from the Sanskrit commentary सुबोधिनी from verse (1.10) onwards.

**Note**

In order to enable the blind king Dhritarāshtra to follow the events of the war, Vyāsadeva gave Sanjaya the boon of divine vision. While staying for some days on the battlefield and later with Dhritarāshtra, Sanjaya was able to see everything that took place in the day and in the night, in open and in secret. No weariness would affect him and no weapon could cut him. Sanjaya said to Dhritarāshtra ...

||1.2||

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥

दृष्ट्वा तु पाण्डव-अनीकम् व्यूढम् दुर्योधनः तदा आचार्यम् उपसङ्गम्य राजा वचनम् अब्रवीत्

पाण्डवानाम् अनीकम् इति पाण्डव-अनीकम् _the army of the Pāndavas.

राजा दुर्योधनः »King Duryodhana (as the eldest son he already acted as king) पाण्डव-अनीकम् व्यूढम् दृष्ट्वा तु but [after] seeing the Pāndava army arrayed तदा आचार्यम् उपसङ्गम्य then [after] approaching his teacher [and general Drona] वचनम् अब्रवीत् spoke [the following] words.«

||1.3||

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥

पश्य एताम् पाण्डु-पुत्राणाम् आचार्य महतीम् चमूम् व्यूढाम् द्रुपद-पुत्रेण तव शिष्येण धीमता

द्रुपदस्य पुत्रः इति द्रुपद-पुत्रः _the son of Drupada.

आचार्य »O teacher [Drona]! तव धीमता शिष्येण द्रुपद-पुत्रेण By your intelligent disciple Dhrishtadyumna, son of Drupada व्यूढाम् arrayed पाण्डु-पुत्राणाम् एताम् महतीम् चमूम् this great army of the Pāndavas पश्य behold!«

||1.4-6||

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि। युयुधानो विराटश्च द्रुपदश्च महारथः॥

अत्र शूराः महा-इष्वासाः भीम-अर्जुन-समाः युधि युयुधानः विराटः च द्रुपदः च महा-रथः

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्। पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः॥

धृष्टकेतुः चेकितानः काशिराजः च वीर्यवान् पुरुजित् कुन्तिभोजः च शैब्यः च नर-पुङ्गवः

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्। सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः॥

युधामन्युः च विक्रान्तः उत्तमौजाः च वीर्यवान् सौभद्रः द्रौपदेयाः च सर्वे एव महा-रथाः

महान् इष्वासः यस्य सः महा-इष्वासः _'who has a strong bow', a great bowman. भीमस्य अर्जुनस्य च समः इति भीम-अर्जुन-समः _equal to Bhīma and Arjuna. महान् रथः यस्य सः महा-रथः _who has a great chariot. काश्याः राजा इति काशि-राजः _the king of Kāshī. नरेषु पुङ्गवः इति नर-पुङ्गवः _'bull among men', best of men, hero.

अत्र शूराः महा-इष्वासाः »Here [in their army] are heroic great bowmen युधि भीम-अर्जुन-समाः who are equal in battle to Bhīma and Arjuna युयुधानः विराटः च [namely] Yuyudhāna and Virāta महा-रथः द्रुपदः च and the great chariot fighter Drupada धृष्टकेतुः चेकितानः Dhrishtaketu and Cekitāna वीर्यवान् काशि-राजः च and the powerful king of Kāshī पुरुजित् कुन्तिभोजः च Purujit and Kuntibhoja नर-पुङ्गवः शैब्यः च and the hero Shaibya विक्रान्तः युधामन्युः च and the mighty Yudhāmanyu वीर्यवान् उत्तमौजाः च and the powerful Uttamaujā सौभद्रः द्रौपदेयाः च Abhimanyu and the sons of Draupadī सर्वे एव महा-रथाः all these are great chariot fighters.«

Yuyudhāna (Sātyaki) was a Yādava warrior of the Vrishni dynasty and a close friend of Krishna. In the war he killed six mahārathas of the Kaurava army. He also captured Sanjaya, but set him free on the advice of Vyāsa. He survived the war. Virāta was the king of the Matsya country, who sheltered the Pāndavas during their last year in exile. His daughter Uttarā became the wife of Arjuna's son Abhimanyu, father of Parīkshit. He was killed by Drona. A Mahāratha is said to be able to fight 10,000 bowmen, an Atiratha a large number [but less than 10,000], a Ratha one, and an Ardha-ratha ('half ratha') less than one, i.e., he is not a good fighter. Dhrishtaketu was the son of Shishupāla, the king of Cedi. After the death of his father he became a tributary king to the Pāndavas, and supplied one army to the war. He was killed by Drona. Cekitāna was killed by Duryodhana. Purujit was the son of King Kuntibhoja. He had a brother who also became known as Kuntibhoja. Kāshī (modern Vārānasī /Benares) is reputed for its Vishvanātha (Shiva) temple. The actual name of the king is not mentioned here. Shaibya's actual name was Govāsa, and he was a father-in-law of Yudhishthira. He and the king of Kāshī had come with one army to attend the marriage of Abhimanyu. Yudhāmanyu was a prince of the Pāncāla royal family, who took his position as the bodyguard of Arjuna. He was killed by Ashvatthāmā. Uttamaujā belonged to the Pāncāla country. In the war he protected the right wheel of Arjuna's chariot. He was killed by Ashvatthāmā. Draupadeyas are the five sons of Draupadī – Prativindhya, Shrutasena, Shrutakīrti, Shatānīka and Shrutakarmā – one by each Pāndava. They were killed by Ashvatthāmā in the night after the battle, when sleeping.

||1.7||

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम। नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते॥

अस्माकम् तु विशिष्टाः ये तान् निबोध द्विज-उत्तम नायकाः मम सैन्यस्य सञ्ज्ञा-अर्थम् तान् ब्रवीमि ते

द्विजेषु उत्तमः इति द्विज-उत्तमः _'the best among Dvijas (higher classes)', a Brāhmaṇa. सञ्ज्ञायाः अर्थम् इति सञ्ज्ञा-अर्थम् _for the purpose of informing.

द्विज-उत्तम »O Brāhmana [Drona]! अस्माकम् तु ये विशिष्टाः But those who are our best men मम सैन्यस्य नायकाः the leaders of my army तान् निबोध you must know them! तव/ते सञ्ज्ञा-अर्थम् For your information तान् ब्रवीमि I mention them.«

||1.8||

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः। अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च॥

भवान् भीष्मः च कर्णः च कृपः च समितिञ्जयः अश्वत्थामा विकर्णः च सौमदत्तिः तथा एव च

समितिम् जयति यः सः समितिञ्जयः _'who conquers an assemblage', who is victorious.

भवान् भीष्मः च कर्णः च »Yourself, Bhīshma and Karna समितिञ्जयः कृपः च and the victorious Kripa अश्वत्थामा विकर्णः च Ashvatthāmā and Vikarna सौमदत्तिः तथा एव च and also Bhūrishravā.«

Vikarna was one of the hundred sons of Dhritarāshtra, but he did not listen to their bad advice. Therefore he is called Vikarna. He was the only Kaurava who protested, when Draupadī was about to be stripped naked in the open assembly. Bhūrishravā, a son of Somadatta, was killed by Sātyaki.

||1.9||

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः। नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥

अन्ये च बहवः शूराः मद्-अर्थे त्यक्त-जीविताः नाना-शस्त्र-प्रहरणाः सर्वे युद्ध-विशारदाः

मम अर्थः इति मद्-अर्थः _my purpose. त्यक्तम् जीवितम् येन सः त्यक्त-जीवितः _'by whom life is given up', ready to abandon life. युद्धे विशारदः इति युद्ध-विशारदः _experienced in battle.

अन्ये च बहवः शूराः »And many other heroes मद्-अर्थे त्यक्त-जीविताः have staked their lives for me. सर्वे नाना-शस्त्र-प्रहरणाः They are all wielding various weapons युद्ध-विशारदाः and are experienced in battle.«

||1.10||

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्। पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥

अ-पर्याप्तम् तद् अस्माकम् बलम् भीष्म-अभिरक्षितम् पर्याप्तम् तु इदम् एतेषाम् बलम् भीम-अभिरक्षितम्

भीष्म-अभिरक्षितम् »Well-protected by Bhīshma तद् अस्माकम् बलम् अ-पर्याप्तम् that our force is insufficient भीम-अभिरक्षितम् तु but, well-protected by Bhīma एतेषाम् इदम् बलम् पर्याप्तम् their this force is sufficient.«

तद् तथा-भूतैः वीरैः युक्तम् अपि Although endowed with such heros भीष्मेण अभिरक्षितम् अपि and although protected by Bhīshma अस्माकम् बलम् (सैन्यम्) अ-पर्याप्तम् our army is insufficient; तैः

सह योद्धुम् अ-समर्थम् भाति to fight with them, it appears not capable. इदम् तु एतेषाम् पाण्डवानाम् बलम् But the army of these Pāndavas भीमेन अभिरक्षितम् सत् being protected by Bhīma पर्याप्तम् (समर्थम् भाति) is sufficient (appears to be capable). भीष्मस्य उभय-पक्ष-पातित्वात् Because of Bhīshma's siding with both parties. 'तस्मात् भवद्भिः एवम् वर्तितव्यम्'

Therefore this should be dealt with by You as follows ...

||1.11||

अयनेषु च सर्वेषु यथाभागमवस्थिताः। भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥

अयनेषु च सर्वेषु यथा-भागम् अवस्थिताः भीष्मम् एव अभिरक्षन्तु भवन्तः सर्वे एव हि

सर्वेषु च अयनेषु »And on all the roads [of entrance into the army] यथा-भागम् अवस्थिताः being arrayed as allotted भवन्तः सर्वे एव हि all of you भीष्मम् एव अभिरक्षन्तु Bhīshma alone you must protect on all sides!«

भीष्म-बलेन एव अस्माकम् जीवितम् Our life depends on the strength of Bhīshma alone. इति भावः This is the idea.

||1.12||

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः। सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥

तस्य सञ्जनयन् हर्षम् कुरु-वृद्धः पितामहः सिंह-नादम् विनद्य उच्चैः शङ्खम् दध्मौ प्रतापवान्

कुरु-वृद्धः प्रतापवान् पितामहः »The valiant Bhīshma, senior of the Kurus तस्य हर्षम् सञ्जनयन् arousing his (Duryodhana's) joy उच्चैः सिंह-नादम् विनद्य [after] roaring loudly like a lion (or: the conch was making a great sound like a lion) शङ्खम् दध्मौ he blew his conchshell.«

||1.13||

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः। सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥

ततः शङ्खाः च भेर्यः च पणव-आनक-गोमुखाः सहसा एव अभ्यहन्यन्त सः शब्दः तुमुलः अभवत्

This word order is already the Anvaya.

ततः शङ्खाः च भेर्यः च »Then conchshells and kettledrums पणव-आनक-गोमुखाः tabors, drums and horns सहसा एव अभ्यहन्यन्त were suddenly sounded. सः शब्दः तुमुलः अभवत् That sound was tumultuous.«

||1.14||

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ। माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥

ततः श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ माधवः पाण्डवः च एव दिव्यौ शङ्खौ प्रदध्मतुः

श्वेतैः हयैः युक्ते »Yoked with white horses महति स्यन्दने स्थितौ situated in [such] an excellent chariot ततः माधवः पाण्डवः च एव then Krishna and Arjuna दिव्यौ शङ्खौ प्रदध्मतुः blew their divine conchshells.«

||1.15||

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः। पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥

पाञ्चजन्यम् हृषीक-ईशः देवदत्तम् धनञ्जयः पौण्ड्रम् दध्मौ महा-शङ्खम् भीम-कर्मा वृक-उदरः

हृषीकाणाम् ईशः इति हृषीक-ईशः _‘lord of the senses’, the supreme guide, Paramātmā. धनम् जयति यः सः धनञ्जयः _‘who wins riches’, a name of Arjuna. भीमम् कर्म यस्य सः भीम-कर्मा _whose activity is awful. वृकस्य इव उदरम् यस्य सः वृक-उदरः _‘who has a [voracious] stomach like a wolf’s’, a mighty eater.

हृषीक-ईशः पाञ्चजन्यम् »The Lord [blew] the ‘Pāncajanya’ धनञ्जयः देवदत्तम् Arjuna the ‘Devadatta’. भीम-कर्मा वृक-उदरः And Bhīma of awful deeds महा-शङ्खम् पौण्ड्रम् दध्मौ blew the great conch ‘Paundra’.«

When the Asura Pancajana, who lived inside a conch, carried away the son of Sāndīpani Muni, the latter asked his disciples Krishna and Balarāma to get him back. With the help of Varuna they killed the demon and took the conch, then called Pāncajanya. Vishnu’s disc is called Sudarshana, His club Kaumodakī, His sword Nandaka, His jewel Kaustubha and His bow Shārnga. When Maya Dānava was rescued by Arjuna from the fire in the Khāndava forest, he was obliged to build a palace in Indraprastha, and also presented that famous conch Devadatta.

**||1.16||**

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः। नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥

अनन्तविजयम् राजा कुन्ती-पुत्रः युधिष्ठिरः नकुलः सहदेवः च सुघोष-मणिपुष्पकौ

कुन्त्याः पुत्रः इति कुन्ती-पुत्रः _the son of Kuntī.

कुन्ती-पुत्रः राजा युधिष्ठिरः »King Yudhishthira, the son of Kuntī अनन्तविजयम् [blew] the ‘Anantavijaya’ नकुलः सहदेवः च Nakula and Sahadeva सुघोष-मणिपुष्पकौ the ‘Sughosha’ and ‘Manipushpaka’.«

**||1.17-18||**

काश्यश्च परमेष्वासः शिखण्डी च महारथः। धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥

काश्यः च परम-इष्वासः शिखण्डी च महा-रथः धृष्टद्युम्नः विराटः च सात्यकिः च अ-परा-जितः

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते। सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥

द्रुपदः द्रौपदेयाः च सर्वशः पृथिवी-पते सौभद्रः च महा-बाहुः शङ्खान् दध्मुः पृथक् पृथक्

परमः इष्वासः यस्य सः परम-इष्वासः _whose bow is supreme. महान्तौ बाहू यस्य सः महा-बाहुः _whose two arms are mighty. पृथिव्याः पतिः इति पृथिवी-पतिः _‘lord of the earth’, a king.

परम-इष्वासः काश्यः च »And the mighty-bowed king of Kāshī महा-रथः शिखण्डी च and the great warrior Shikhandī धृष्टद्युम्नः विराटः च Dhrishtadyumna and Virāta अ-परा-जितः सात्यकिः च and the invincible Sātyaki द्रुपदः द्रौपदेयाः च Drupada and the sons of Draupadī महा-बाहुः सौभद्रः च and the mighty-armed Abhimanyu, पृथिवी-पते O King [Dhritarāshtra]! सर्वशः पृथक् पृथक् शङ्खान् दध्मुः All blew their different conchshells.«

**||1.19||**

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्। नभश्च पृथिवीं चैव तुमुलो ऽभ्यनुनादयन् ॥

स घोषः धार्तराष्ट्राणाम् हृदयानि व्यदारयत् नभः च पृथिवीम् च एव तुमुलः अभ्यनुनादयन्

सः तुमुलः घोषः »That tumultous sound नभः च पृथिवीम् च एव अभ्यनुनादयन् [while] making the sky and earth resound (with echoes) धार्तराष्ट्राणाम् हृदयानि व्यदारयत् it shattered the hearts of your sons.«

**||1.20||**

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः। प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः।
अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपि-ध्वजः प्रवृत्ते शस्त्र-सम्पाते धनुः उद्यम्य पाण्डवः
हृषीकेशं तदा वाक्यमिदमाह महीपते॥
हृषीक-ईशम् तदा वाक्यम् इदम् आह मही-पते

The word sati (being) is implied in शस्त्र-सम्पाते प्रवृत्ते [सति], 'the battle being started', when the battle started. Therefore this construction is called Sati-saptamī. मह्याः पतिः इति मही-पतिः _'lord of the earth', a king. कपिः ध्वजे यस्य सः कपि-ध्वजः _on whose banner is a monkey (Hanumān).

मही-पते! »O King [Dhritarāshtra]! अथ शस्त्र-सम्पाते प्रवृत्ते Now when the battle was starting कपि-ध्वजः पाण्डवः Arjuna, on whose banner is Hanumān धार्तराष्ट्रान् व्यवस्थितान् दृष्ट्वा [after] seeing your sons arrayed धनुः उद्यम्य [after] raising the bow तदा हृषीक-ईशम् इदम् वाक्यम् आह then he spoke to the Lord this word.«

**||1.21||**

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत। यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्॥
सेनयोः उभयोः मध्ये रथम् स्थापय मे अच्युत यावत् एतान् निरीक्षे अहम् योद्धु-कामान् अवस्थितान्

The numbering differs in various editions. योद्धुम् कामः यस्य सः योद्धु-कामः _whose desire is to fight. रणे समुद्यमः इति रण-समुद्यमः _engagement in battle.

अच्युत »O Lord! उभयोः सेनयोः मध्ये In the middle of both armies मम/मे रथम् स्थापय place my chariot! एतान् अवस्थितान् योद्धु-कामान् these arrayed who want to fight यावत् अहम् निरीक्षे so that I can I see [them]!«

**||1.22||**

कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे॥
कैः मया सह योद्धव्यम् अस्मिन् रण-समुद्यमे

अस्मिन् रण-समुद्यमे »[I want to know:] In this battle कैः सह मया योद्धव्यम् with whom is to be fought by me?«

**||1.23||**

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः। धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः॥
योत्स्यमानान् अवेक्षे अहम् ये एते अत्र समागताः धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रिय-चिकीर्षवः

प्रियम् चिकीर्षुः इति प्रिय-चिकीर्षुः _'who desires to do what is pleasing', a supporter.

ये एते »These who दुर्बुद्धेः धार्तराष्ट्रस्य of the evil-minded Duryodhana युद्धे प्रिय-चिकीर्षवः supporters in battle अत्र समागताः योत्स्यमानान् here assembled who will fight अहम् अवेक्षे I [want to] see.«

**||1.24-25||**

एवमुक्तो हृषीकेशो गुडाकेशेन भारत। सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्॥

एवम् उक्तः हृषीक-ईशः गुडाका-ईशेन भारत सेनयोः उभयोः मध्ये स्थापयित्वा रथ-उत्तमम्

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्। उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति॥

भीष्म-द्रोण-प्रमुखतः सर्वेषाम् च मही-क्षिताम् उवाच पार्थ पश्य एतान् समवेतान् कुरून् इति

गुडाकायाः ईशः इति गुडाका-ईशः _'lord of sleep', who has mastered ignorance. रथानाम् उत्तमः इति रथ-उत्तमः _the best of chariots. भीष्मस्य द्रोणस्य च प्रमुखतः इति भीष्म-द्रोण-प्रमुखतः _in front of Bhīshma and Drona. महीम् क्षियति यः सः मही-क्षित् _'who rules the earth', a king.

भारत »O Dhritarāshtra! गुडाका-ईशेन एवम् उक्तः Thus addressed by Arjuna हृषीक-ईशः the Lord उभयोः सेनयोः मध्ये in the middle of both armies रथ-उत्तमम् स्थापयित्वा [after] placing the fine chariot भीष्म-द्रोण-प्रमुखतः in front of Bhīshma and Drona सर्वेषाम् मही-क्षिताम् च and [in front of] of all the kings पार्थ ! एतान् समवेतान् कुरून् पश्य 'O Arjuna, see these assembled Kurus!' इति उवाच thus he said.«

**||1.26||**

तत्रापश्यत्स्थितान्पार्थः पितृनथ पितामहान्। आचार्यान्मातुलान्भ्रातृन्पुत्रान्पौत्रान्सखींस्तथा।

तत्र अपश्यत् स्थितान् पार्थः पितृन् अथ पितामहान् आचार्यान् मातुलान् भ्रातृन् पुत्रान् पौत्रान् सखीन् तथा

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि॥

श्वशुरान् सुहृदः च एव सेनयोः उभयोः अपि

पार्थः अपश्यत् »Arjuna saw तत्र उभयोः अपि सेनयोः स्थितान् present there in both the armies पितृन् अथ पितामहान् fathers and grandfathers आचार्यान् मातुलान् भ्रातृन् teachers, maternal uncles, brothers पुत्रान् पौत्रान् तथा सखीन् sons, grandsons and companions श्वशुरान् सुहृदः च एव fathers-in-law and also well-wishers.«

पितृन् पितृव्य-आदीन् 'Fathers' means uncles and similar [elderly male] relations. [Sons and grandsons means] दुर्योधन-आदीनाम् ये पुत्राः पौत्राः च तान् the sons and grandsons of Duryodhana and others.

Uncles of Arjuna are for example Shalya and Shakuni. Mādrī, the second wife of Pāndu, was Shalya's sister. Although Shalya blessed the Pāndavas to win the war, he had to support Duryodhana with one army. Shalya was killed by his nephew Yudhishthira. Shakuni was the brother of Gāndhārī, the wife of Dhritarāshtra. By his evil tactics the Pāndavas had to go to exile. Shakuni was killed by Sahadeva.

**||1.27||**

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्। कृपया परयाविष्टो विषीदन्निदमब्रवीत्॥

तान् समीक्ष्य सः कौन्तेयः सर्वान् बन्धून् अवस्थितान् कृपया परया आविष्टः विषीदन् इदम् अब्रवीत्

सः कौन्तेयः »That Arjuna तान् सर्वान् बन्धून् अवस्थितान् समीक्ष्य [after] seeing all those relatives arrayed परया कृपया आविष्टः filled with great विषीदन् इदम् अब्रवीत् [while] grieving he spoke this.«

**||1.28||**

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् । सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥

दृष्ट्वा इमम् स्व-जनम् कृष्ण युयुत्सुम् समुपस्थितम् सीदन्ति मम गात्राणि मुखम् च परिशुष्यति

स्वस्य जनः इति स्व-जनः _‘own man’, kinship.

कृष्ण »O Krishna! युयुत्सुम् समुपस्थितम् इमम् स्व-जनम् This kinship, assembled so eager to fight दृष्ट्वा [after] seeing मम गात्राणि सीदन्ति my limbs fail मुखम् च परिशुष्यति and [my] mouth is drying up.«

**||1.29||**

वेपथुश्च शरीरे मे रोमहर्षश्च जायते । गाण्डीवं स्त्रंसते हस्तात्त्वक्चैव परिदह्यते ॥

वेपथुः च शरीरे मे रोम-हर्षः च जायते गाण्डीवम् स्त्रंसते हस्तात् त्वक् च एव परिदह्यते

मम/मे शरीरे »In my body वेपथुः च रोम-हर्षः च जायते occur trembling and horripilation गाण्डीवम् हस्तात् स्त्रंसते the ‘Gāndīva’ [bow] slips from [my] hand त्वक् च एव परिदह्यते and [my] skin is burning.«

**||1.30||**

न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः । निमित्तानि च पश्यामि विपरीतानि केशव ॥

न च शक्नोमि अवस्थातुम् भ्रमति इव च मे मनः निमित्तानि च पश्यामि विपरीतानि केशव

केशव »O Lord! अवस्थातुम् च न शक्नोमि I am not able to stand[any longer]. मम/मे मनः च भ्रमति इव My mind is as if reeling विपरीतानि निमित्तानि च पश्यामि and I see bad omens (reversed courses).«

**||1.31||**

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे । न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥

न च श्रेयः अनुपश्यामि हत्वा स्व-जनम् आहवे न काङ्क्षे विजयम् कृष्ण न च राज्यम् सुखानि च

आहवे स्व-जनम् हत्वा »[After] killing kinship in battle श्रेयः च न अनुपश्यामि I do not foresee any good [result] कृष्ण [because] O Krishna! विजयम् न काङ्क्षे I do not desire victory न राज्यम् च सुखानि च nor a kingdom and pleasures.«

**||1.32-33||**

किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा । येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ॥

किम् नः राज्येन गोविन्द किम् भोगैः जीवितेन वा येषाम् अर्थे काङ्क्षितम् नः राज्यम् भोगाः सुखानि च

त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च । आचार्याः पितरः पुत्रास् तथैव च पितामहाः ।

ते इमे अवस्थिताः युद्धे प्राणान् त्यक्त्वा धनानि च आचार्याः पितरः पुत्राः तथा एव च पितामहाः

मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥

मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनः तथा

गोविन्द »O Lord! अस्मभ्यम्/नः राज्येन किम् What is [the use] with a kingdom for us? भोगैः जीवितेन वा किम् What is with luxuries or [even] life? येषाम् अर्थे [Because,] for whom अस्माकम्/नः राज्यम् भोगाः सुखानि च our kingdom, luxuries and pleasures काङ्क्षितम् is desired ते

इमे these very persons आचार्याः पितरः पुत्राः [namely] teachers, fathers, sons पितामहाः तथा एव च and also grandfathers मातुलाः श्वशुराः पौत्राः maternal uncles, fathers-in-law, grandsons श्यालाः तथा सम्बन्धिनः brothers-in-law and [other] relatives धनानि प्राणान् च त्यक्त्वा [after] staking [their] riches and lives युद्धे अवस्थिताः are arrayed in battle.«

ननु But [Krishna might argue]: यदि कृपया त्वम् एतान् न हंसि But if, out of pity, you do not kill them तर्हि त्वाम् एते राज्य-लोभेन हनिष्यन्ति एव then they will surely kill you out of greed for the kingdom ...

**||1.34||**

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन । अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥

एतान् न हन्तुम् इच्छामि घ्नतः अपि मधुसूदन अपि त्रैलोक्य-राज्यस्य हेतोः किम् नु मही-कृते

मधुसूदन »O Lord! घ्नतः अपि Even killed [by them] एतान् हन्तुम् न इच्छामि I do not want to kill them त्रैलोक्य-राज्यस्य हेतोः अपि even for the cause of sovereignty of the three worlds किम् नु मही-कृते what [to speak] of [this] earth.«

ननु च But (verse without Sandhi) – अग्नि-दः (1) One who sets fire गर-दः च एव (2) gives poison शस्त्र-पाणिः (3) has a weapon in hand [ready to attack] धन-अपहः (4) steals wealth क्षेत्र-दार-हरः च एव (5) steals land, or (6) abducts [another's] wife षड् एते आततायिनः these six are aggressors. इति स्मरणात् This is from Smriti (वसिष्ठ-स्मृति 3.19) अग्नि-दाह-आदिभिः षड्भिः अपि हेतुभिः And by all these six reasons beginning with arson एते तावत् आततायिनः they are aggressors. (They have done all this.) आततायिनाम् च वधः युक्तः एव And the killing of aggressors is just [according to Artha-Shāstra] ...

**||1.35||**

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन । पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥

निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्यात् जनार्दन पापम् एव आश्रयेत् अस्मान् हत्वा एतान् आततायिनः

जनार्दन »O Lord! धार्तराष्ट्रान् निहत्य [After] killing the sons of Dhritarāshtra अस्माकम्/नः का प्रीतिः स्यात् what will be our pleasure? एतान् आततायिनः हत्वा [After] killing these aggressors अस्मान् पापम् एव आश्रयेत् sin will certainly overcome us.«

According to Artha-Shāstra there is no fault in killing an aggressor. But Dharma-Shāstra (which is considered higher than Artha-Shāstra) holds that one should not even quarrel with (what to speak of killing) one who performs Yajna, the family priest, teacher, uncle, any elder or relative, a guest, dependent, or children. And Shruti (the highest) completely forbids any violence on spiritual grounds – A-himsā paramo dharmah (non-violence is the highest command).

**||1.36||**

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्सबान्धवान् । स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥

तस्मात् न अर्हाः वयम् हन्तुम् धार्तराष्ट्रान् स-बान्धवान् स्व-जनम् हि कथम् हत्वा सुखिनः स्याम माधव

तस्मात् »Therefore स-बान्धवान् धार्तराष्ट्रान् the sons of Dhritarāshtra and relatives वयम् हन्तुम् न अर्हाः we do not deserve to kill. माधव O Lord! स्व-जनम् हि हत्वा [After] killing kinship कथम् सुखिनः स्याम how can we be happy?«

ननु But तव एतेषाम् अपि to both you and them also बन्धु-वध-दोषे समाने सति the fault of killing kinsmen being common, यथा एव एते just as they बन्धु-वध-दोषम् अङ्गीकृत्य accepting that fault of killing kinsmen युद्धे प्रवर्तन्ते engage in battle, तथा एव भवान् अपि प्रवर्तताम् so you should also engage ...

**||1.37-38||**

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः । कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥
यद्यपि एते न पश्यन्ति लोभ-उपहत-चेतसः कुल-क्षय-कृतम् दोषम् मित्र-द्रोहे च पातकम्
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् । कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥
कथम् न ज्ञेयम् अस्माभिः पापात् अस्मात् निवर्तितुम् कुल-क्षय-कृतम् दोषम् प्रपश्यद्भिः जनार्दन

लोभेन उपहतम् चेतः यस्य सः लोभ-उपहत-चेताः _whose mind is destroyed by greed. मित्राणाम् द्रोहः इति मित्र-द्रोहः _hostility of friends.

यद्यपि एते »Although these लोभ-उपहत-चेतसः their discrimination stolen by greed कुल-क्षय-कृतम् दोषम् the evil made by family destruction मित्र-द्रोहे पातकम् च and the sin in hostility to friends न पश्यन्ति they do not see, जनार्दन [nevertheless] O Lord! कुल-क्षय-कृतम् दोषम् प्रपश्यद्भिः अस्माभिः By us who understand the evil made by family destruction अस्मात् पापात् निवर्तितुम् to refrain from this sin कथम् न ज्ञेयम् why is it not to be understood?«

तम् एव दोषम् दर्शयति That very evil he shows ...

**||1.39||**

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः । धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥
कुल-क्षये प्रणश्यन्ति कुल-धर्माः सनातनाः धर्मे नष्टे कुलम् कृत्स्नम् अ-धर्मः अभिभवति उत

कुलस्य क्षयः इति कुल-क्षयः _the destruction of the family.

कुल-क्षये »In family-destruction सनातनाः कुल-धर्माः प्रणश्यन्ति eternal family traditions perish. धर्मे नष्टे [ सति ] The tradition [being] lost अ-धर्मः कृत्स्नम् उत कुलम् अभिभवति sin overcomes the whole family.«

**||1.40||**

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः । स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥
अधर्म-अभिभवात् कृष्ण प्रदुष्यन्ति कुल-स्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्ण-सङ्करः

वर्णस्य सङ्करः इति वर्ण-सङ्करः _confusion of Varna.

कृष्ण »O Krishna! अ-धर्म-अभिभवात् From the rise of sin कुल-स्त्रियः प्रदुष्यन्ति the women of [high] family become polluted. वार्ष्णेय O Krishna! स्त्रीषु दुष्टासु [सत्सु] The women [being ] polluted वर्ण-सङ्करः जायते confusion of the social orders results.«

**||1.41||**

सङ्करो नरकायैव कुलघ्नानां कुलस्य च । पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
सङ्करः नरकाय एव कुल-घ्नानाम् कुलस्य च पतन्ति पितरः हि एषाम् लुप्त-पिण्ड-उदक-क्रियाः

सङ्करः »Confusion [of Varna] कुल-घ्नानाम् कुलस्य च of the family destroyers and the [remaining] family नरकाय एव makes for hell. एषाम् लुप्त-पिण्ड-उदक-क्रियाः पितरः Their ancestors, the rituals with Pinda and Udaka having stopped पतन्ति हि certainly fall down.«

Pinda and Udaka are offered in the Tarpana ceremony, providing a dead relative the opportunity to stay in Pitri-loka (a planet of pious forefathers).

**||1.42||**

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः । उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥

दोषैः एतैः कुल-घ्नानाम् वर्ण-सङ्कर-कारकैः उत्साद्यन्ते जाति-धर्माः कुल-धर्माः च शाश्वताः

वर्णस्य सङ्करस्य कारकः इति वर्ण-सङ्कर-कारकः _the agent /cause of confusion of Varna.

कुल-घ्नानाम् »Of the destroyers of the family एतैः वर्ण-सङ्कर-कारकैः दोषैः by these evils that cause confusion of Varna शाश्वताः जाति-धर्माः कुल-धर्माः च the eternal traditions of rank, family, etc. उत्साद्यन्ते are destroyed.«

**||1.43||**

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भवतीत्यनुशुश्रुम ॥

उत्सन्न-कुल-धर्माणाम् मनुष्याणाम् जनार्दन नरके नियतम् वासः भवति इति अनुशुश्रुम

उत्सन्नः कुलस्य धर्मः येन सः उत्सन्न-कुल-धर्मः _by whom the traditon of family is destroyed.

जनार्दन »O Lord! उत्सन्न-कुल-धर्माणाम् मनुष्याणाम् Of men whose family tradition is destroyed वासः नरके नियतम् भवति the residence is ordained in hell इति अनुशुश्रुम thus we have learned.«

(quote without Sandhi:) प्रायश्चित्तम् अ-कुर्वाणाः Not performing expiation पापेषु निरताः नराः persons addicted to sin अ-पश्चात्-तापिनः who do not feel repentence कष्टान् निरयान् यान्ति दारुणान् go to terrible hells full of miseries. (याज्ञवल्क्य-स्मृति 3.221)

**||1.44||**

अहो बत महत्पापं कर्तुं व्यवसिता वयम् । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥

अहो बत महत् पापम् कर्तुम् व्यवसिताः वयम् यद् राज्य-सुख-लोभेन हन्तुम् स्व-जनम् उद्यताः

राज्य-सुखस्य लोभः इति राज्य-सुख-लोभः _greed for royal pleasure.

अहो बत »Alas! महत् पापम् कर्तुम् To do great sin वयम् व्यवसिताः we are determined, यद् राज्य-सुख-लोभेन that by greed for royal happiness स्व-जनम् हन्तुम् उद्यताः we are prepared to kill kinship.«

**||1.45||**

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥

यदि माम् अ-प्रतीकारम् अ-शस्त्रम् शस्त्र-पाणयः धार्तराष्ट्राः रणे हन्युः तद् मे क्षेमतरम् भवेत्

शस्त्रम् पाणौ यस्य सः शस्त्र-पाणिः _in whose two hands is a weapon.

यदि शस्त्र-पाणयः धार्तराष्ट्राः »If the sons of Dhritarāshtra, weapons in hand अ-प्रतीकारम् अ-शस्त्रम् माम् me, unresisting and unarmed रणे हन्युः they would kill in battle तद् मम/मे क्षेमतरम् भवेत् that would be my better welfare (without sinning).«

||1.46||

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्। विसृज्य सशरं चापं शोकसंविग्नमानसः ॥

एवम् उक्त्वा अर्जुनः सङ्ख्ये रथ-उपस्थे उपाविशत् विसृज्य सशरम् चापम् शोक-संविग्न-मानसः

शोकेन संविग्नम् मानसम् यस्य सः शोक-संविग्न-मानसः _whose mentality is agitated by lamentation. शरैः सह इति स-शरः _together with arrows. रथस्य उपस्थः इति रथ-उपस्थः _the seat of a chariot, but रथ-उपस्थे रथस्य उपरि _ratha-upasthe means 'on the chariot'.

शोक-संविग्न-मानसः अर्जुनः »Arjuna, overwhelmed by lamentation सङ्ख्ये एवम् उक्त्वा [after] speaking thus on the battlefield स-शरम् चापम् विसृज्य [and after] casting aside bow with arrow रथ-उपस्थे उपाविशत् he sat down on the chariot.«

||2.1||

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्। विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥

तम् तथा कृपया आविष्टम् अश्रु-पूर्ण-आकुल-ईक्षणम् विषीदन्तम् इदम् वाक्यम् उवाच मधुसूदनः

अश्रुभिः पूर्णे च आकुले च ईक्षणे यस्य सः अश्रु-पूर्ण-आकुल-ईक्षणः _whose two eyes are filled with tears and perturbed. मधोः सूदनः इति मधु-सूदनः _'slayer of the Madhu [demon]', name of Vishnu.

तथा कृपया आविष्टम् तम् »To that [Arjuna], who was thus filled with compassion अश्रु-पूर्ण-आकुल-ईक्षणम् his perturbed eyes full of tears विषीदन्तम् and who was grieving मधु-सूदनः इदम् वाक्यम् उवाच the Lord spoke this word.«

||2.2||

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्। अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥

कुतः त्वा कश्मलम् इदम् विषमे समुपस्थितम् अन्-आर्य-जुष्टम् अ-स्वर्ग्यम् अ-कीर्ति-करम् अर्जुन

न आर्यैः जुष्टम् इति अनार्य-जुष्टम् _not practiced by nobility.

अर्जुन »O Arjuna! अन्-आर्य-जुष्टम् Not befitting for nobility अ-स्वर्ग्यम् अ-कीर्ति-करम् degrading ('not leading to heaven') and inglorious ('giving infamy') इदम् कश्मलम् this weakness (illusion) कुतः त्वाम्/त्वा विषमे समुपस्थितम् from where has it come upon you in danger?«

||2.3||

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥

क्लैब्यम् मा स्म गमः पार्थ न एतद् त्वयि उपपद्यते क्षुद्रम् हृदय-दौर्बल्यम् त्यक्त्वा उत्तिष्ठ परन्तप

परान् तापयति यः सः परन्तपः _who scorches others (enemies). हृदयस्य दौर्बल्यम् इति हृदय-दौर्बल्यम् _weakness of heart.

पार्थ »O Arjuna! क्लैब्यम् मा स्म गमः Do not yield to weakness! ('Do not become a coward!') एतद् त्वयि न उपपद्यते [because] this is not possible in you परन्तप O hero [Arjuna]! क्षुद्रम् हृदय-दौर्बल्यम् त्यक्त्वा [after] abandoning this petty faint-heartedness उत्तिष्ठ arise [and fight]!«

'न अहम् कातर्येण युद्धात् उपरतः अस्मि I am withdrawn from battle not out of cowerdice किन्तु युद्धस्य अ-न्याय्यत्वात्' but because of the fight's unrighteousness इति आह thus [Arjuna] says [now] ...

**||2.4||**

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन। इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन॥

कथम् भीष्मम् अहम् सङ्ख्ये द्रोणम् च मधुसूदन इषुभिः प्रतियोत्स्यामि पूजा-अर्हौ अरिसूदन

पूजायाः अर्हः इति पूजा-अर्हः _worthy of worship.

मधुसूदन अरिसूदन »O Lord! पूजा-अर्हौ भीष्मम् द्रोणम् च The worshipable Bhīshma and Drona कथम् अहम् how I सङ्ख्ये इषुभिः प्रतियोत्स्यामि shall attack with arrows in battle?«

यत्र वाचा अपि 'योत्स्यामि' इति वक्तुम् अनुचितम् When it is improper to say even in words that 'I shall fight [them]' तत्र बाणैः कथम् योत्स्यामि then how can I [actually] fight them with arrows?

**||2.5||**

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके।

गुरून् अ-हत्वा हि महा-अनुभावान् श्रेयः भोक्तुम् भैक्ष्यम् अपि इह लोके

हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान्॥

हत्वा अर्थ-कामान् तु गुरून् इह एव भुञ्जीय भोगान् रुधिर-प्रदिग्धान्

महान् अनुभावः यस्य सः महा-अनुभावः _whose influence is great. अर्थम् कामयते यः सः अर्थ-कामः _who desires wealth. रुधिरेण प्रदिग्धः इति रुधिर-प्रदिग्धः _stained with blood.

महा-अनुभावान् गुरून् अ-हत्वा हि »[After] not killing authorities of great influence इह लोके भैक्ष्यम् अपि भोक्तुम् श्रेयः to enjoy here in the world on alms even is better, अर्थ-कामान् गुरून् तु हत्वा but [after] killing superiors, who desire worldly gain रुधिर-प्रदिग्धान् भोगान् blood-stained enjoyments इह एव भुञ्जीय I would enjoy even here [in this life].«

न केवलम् परत्र दुःखम् There will be misery not only hereafter इह एव तु but right here नरक-दुःखम् अनुभवेयम् shall we experience the suffering of hell. अर्थ-कामात्मकान् भोगान् अहम् भुञ्जीय I shall enjoy pleasures like wealth and the fulfillment of desires. यद्वा अर्थ-कामान् इति गुरूणाम् विशेषणम् Or else 'Artha-kāmān' is a qualifier of 'Gurūnām'. (This last reading we have taken.)

किंच Moreover ...

**||2.6||**

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः।

न च एतद् विद्मः कतरत् नः गरीयः यद् वा जयेम यदि वा नः जयेयुः

यानेव हत्वा न जिजीविषामस्ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥

यान् एव हत्वा न जिजीविषामः ते अवस्थिताः प्रमुखे धार्तराष्ट्राः

अस्माकम्/नः कतरत् गरीयः »Which of the two is more important for us एतद् च न विद्मः this also we do not know – यद् वा जयेम whether we should conquer यदि वा अस्मान्/नः जयेयुः or whether

they should conquer us. यान् एव हत्वा न जिजीविषामः [After] killing which we should not desire to live ते धार्तराष्ट्राः प्रमुखे अवस्थिताः those sons of Dhritarāshtra are arrayed in front.«

**||2.7||**

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
कार्पण्य-दोष-उपहत-स्वभावः पृच्छामि त्वाम् धर्म-सम्मूढ-चेताः
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥
यद् श्रेयः स्यात् निश्चितम् ब्रूहि तद् मे शिष्यः ते अहम् शाधि माम् त्वाम् प्रपन्नम्

कार्पण्यस्य दोषेण उपहतः स्व-भावः यस्य सः कार्पण्य-दोष-उपहत-स्वभावः _whose own nature is overcome by the fault /sin of weakness, (or:) ... by kārpanya and dosha. धर्मे सम्मूढम् चेतः यस्य सः धर्म-सम्मूढ-चेताः _whose mind is bewildered in [his] his duty.

कार्पण्य-दोष-उपहत-स्वभावः »My inner nature [as a Kshatriya] overcome by weakness and sin धर्म-सम्मूढ-चेताः and confused in mind about my duty त्वाम् पृच्छामि I am asking you – यद् मम/मे निश्चितम् श्रेयः स्यात् That which will be my ascertained best तद् ब्रूहि that [alone] tell. अहम् तव/ते शिष्यः I am your disciple त्वाम् प्रपन्नम् माम् शाधि [therefore] instruct me, who am surrendered to you.«

एतान् हत्वा कथम् जीविष्यामः Having killed them, how shall we live? (2.6) इति कार्पण्यम् this weakness. दोषः च स्वकुल-क्षय-कृतः And the [prospect of committing] sin due to the destruction of one's family. ताभ्याम् उपहतः/अभिभूतः स्व-भावः शौर्यादि-लक्षणः यस्य सः अहम् I whose natural traits such as heroism are overcome by these two.

**||2.8||**

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
न हि प्रपश्यामि मम अपनुद्यात् यद् शोकम् उच्छोषणम् इन्द्रियाणाम्
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥
अवाप्य भूमौ अ-सपत्नम् ऋद्धम् राज्यम् सुराणाम् अपि च आधिपत्यम्

भूमौ अ-सपत्नम् ऋद्धम् राज्यम् »An unrivaled prosperous kingdom on earth सुराणाम् आधिपत्यम् च and the supremacy of the demigods अवाप्य अपि although [after] obtaining [those] मम इन्द्रियाणाम् उच्छोषणम् शोकम् the lamentation, dryer of my senses यद् अपनुद्यात् that [course of action] which can remove न हि प्रपश्यामि [that] I do not foresee.«

**||2.9||**

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः । न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥
एवम् उक्त्वा हृषीक-ईशम् गुडाका-ईशः परन्तपः न योत्स्ये इति गोविन्दम् उक्त्वा तूष्णीम् बभूव ह

गुडाका-ईशः परन्तपः »Arjuna हृषीक-ईशम् एवम् उक्त्वा [after] thus speaking to the Lord न योत्स्ये इति गोविन्दम् उक्त्वा [and after] saying to the Lord 'I shall not fight' तूष्णीम् बभूव ह he became silent.«

||2.10||

तमुवाच हृषीकेशः प्रहसन्निव भारत । सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥

तम् उवाच हृषीक-ईशः प्रहसन् इव भारत सेनयोः उभयोः मध्ये विषीदन्तम् इदम् वचः

भारत »O Dhritarāshtra! उभयोः सेनयोः मध्ये In the middle of both armies विषीदन्तम् तम् to that grieving one हृषीक-ईशः प्रहसन् इव the Lord, as if smiling इदम् वचः उवाच he spoke this word.«

प्रहसन् इव Prahasan iva means प्रसन्न-मुखः सन् being 'placid-countenanced' (looking pleased, smiling). देह-आत्मनोः अ-विवेकात् अस्य एवम् शोकः भवति [Finding that] his grieve is due to lack of disrimination between body and soul इति तद्-विवेक-प्रदर्शन-अर्थम् आह thus He (Krishna) spoke to show their distinction ...

||2.11||

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥

अशोच्यान् अन्वशोचः त्वम् प्रज्ञा-वादान् च भाषसे गत-असून् अगत-असून् च न अनुशोचन्ति पण्डिताः

प्रज्ञायाः वादः इति प्रज्ञा-वादः _word of wisdom. गतः असुः यस्य सः गत-असुः _'whose life is gone', a dead person. न गतः असुः यस्य सः अगत-असुः _'whose life is not gone', a living person.

त्वम् अ-शोच्यान् अन्वशोचः »[First] you lamented for those not be lamented for प्रज्ञा-वादान् च भाषसे and [then] you speak words of wisdom (2.4). पण्डिताः [But] the [actually] learned गत-असून् अगत-असून् च [neither] for the dead and for the living न अनुशोचन्ति they do not lament.«

The word gatāsu ('life gone') refers either to a person who lost his life, or to the dead body, from which the life has departed; a-gatāsu ('life not gone') may refer to a person who is still alive (surviving the battle), or the soul, which is always alive. Therefore, gatāsūn a-gatāsūn ca can be understood as: (1) those relatives who die and those who survive the battle; (2) bodies, which are simultaneaously dead and alive; or (3) bodies and souls, which are respectively always dead and always alive.

||2.12||

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ॥

न तु एव अहम् जातु न आसम् न त्वम् न इमे जन-अधिपाः न च एव न भविष्यामः सर्वे वयम् अतः परम्

जनानाम्अधिपः इति जन-अधिपः _'ruler of men', a king.

अहम् तु जातु न एव न आसम् »[Because] neither I did not exist at any time न त्वम् न इमे जन-अधिपाः nor you, nor [all] these kings. अतः परम् च And hereafter सर्वे वयम् न एव न भविष्यामः we all will never not exist.«

||2.13||

देहिनो ऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥

देहिनः अस्मिन् यथा देहे कौमारम् यौवनम् जरा तथा देह-अन्तर-प्राप्तिः धीरः तत्र न मुह्यति

देह-अन्तरस्य प्राप्तिः इति देह-अन्तर-प्राप्तिः _the obtainment of another body.

यथा देहिनः »As of the embodied soul अस्मिन् देहे in this body कौमारम् यौवनम् जरा [there are] childhood, youth and old age, तथा देह-अन्तर-प्राप्तिः similarly there is another body. धीरः तत्र न मुह्यति A wise /sober man is at this not bewildered.«

पूर्व-अवस्था-नाशे Even at the end of a previous state अवस्था-अन्तर-उत्पत्तौ अपि and the attainment of another state सः एव अहम् इति प्रत्यभिज्ञानात् there is the recognition that, 'I am the same person'.

**||2.14||**

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥
मात्रा-स्पर्शाः तु कौन्तेय शीत-उष्ण-सुख-दुःख-दाः आगम-अपायिनः अ-नित्याः तान् तितिक्षस्व भारत

मात्रायाः स्पर्शः इति मात्रा-स्पर्शः _touch of the sense-functions. शीतम् च उष्णम् च सुखम् च दुःखम् च ददाति यः सः शीत-उष्ण-सुख-दुःख-दः _which gives [feelings of] cold and heat, happiness and distress. आगमः च अपायः च यस्य सः आगम-अपायी _which has a coming and going.

कौन्तेय »O Arjuna! मात्रा-स्पर्शाः तु And the contacts of the sense-functions [with objects] शीत-उष्ण-सुख-दुःख-दाः which give [rise to] cold-heat, happiness-distress (examples for all dualities experienced in a material body) आगम-अपायिनः अ-नित्याः are coming and going and are [therefore] impermanent. भारत [Therefore] O Arjuna! तान् तितिक्षस्व You must tolerate them.«

मीयन्ते/ज्ञायन्ते विषयाः आभिः Those by which the sense objects are measured, perceived इति मात्राः /इन्द्रिय-वृत्तयः they are called Mātrās or sense-functions.

**||2.15||**

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥
यम् हि न व्यथयन्ति एते पुरुषम् पुरुष-ऋषभ सम-दुःख-सुखम् धीरम् सः अमृतत्वाय कल्पते

समे दुःख-सुखे यस्य सः सम-दुःख-सुखः _for whom both distress and happiness are the same.

पुरुष-ऋषभ »O Arjuna! यम् सम-दुःख-सुखम् धीरम् पुरुषम् A wise man, being equal in distress and happiness, whom एते न हि व्यथयन्ति these [dualities] do not perturb सः अमृतत्वाय कल्पते he is eligible for liberation [through his spiritual knowledge].«

**||2.16||**

नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥
न अ-सतः विद्यते भावः न अ-भावः विद्यते सतः उभयोः अपि दृष्टः अन्तः तु अनयोः तत्त्व-दर्शिभिः

अ-सतः भावः न विद्यते »Of the unreal [body] there is no existence सतः अ-भावः न विद्यते and of the real [soul] there is no non-existence. उभयोः अपि तु अनयोः अन्तः The nature ('conclusion') of both even तत्त्व-दर्शिभिः दृष्टः is seen by seers of the truth (wise men have studied matter also).

आत्मनि भावः/सत्ता न विद्यते There is no existence in the self [of the unreal]. एवम्भूत-विवेकेन सहस्व With the help of such discrimination you better tolerate. इति अर्थः This is the idea.

**||2.17||**

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् । विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥

अ-विनाशि तु तद् विद्धि येन सर्वम् इदम् ततम् विनाशम् अ-व्ययस्य अस्य न कश्चिद् कर्तुम् अर्हति

येन सर्वम् इदम् ततम् »That by which all this [world /body] is pervaded तद् तु अ-विनाशि विद्धि that [soul] know to be indestructible. अस्य अ-व्ययस्य विनाशम् The destruction of this unchangeable [soul] न कश्चिद् कर्तुम् अर्हति not anyone is able to do.«

**||2.18||**

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः । अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥

अन्तवन्तः इमे देहाः नित्यस्य उक्ताः शरीरिणः अ-नाशिनः अ-प्रमेयस्य तस्मात् युध्यस्व भारत

नित्यस्य अ-नाशिनः »Of the eternal, indestructible अ-प्रमेयस्य शरीरिणः and immeasurable embodied soul इमे देहाः अन्तवन्तः उक्ताः these bodies are said to have an end, तस्मात् भारत युध्यस्व therefore, O Arjuna, fight!«

यस्मात् एवम् आत्मनः न विनाशः Because thus there is no destruction for the soul न च सुख-दुःखादि-सम्बन्धः and no connection with pleasure, pain, etc. तस्मात् मोह-जम् शोकम् त्यक्त्वा therefore, giving up this grief born of confusion युध्यस्व fight स्व-धर्मम् मा त्याक्षीः Do not give up your duty.

**||2.19||**

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥

यः एनम् वेत्ति हन्तारम् यः च एनम् मन्यते हतम् उभौ तौ न विजानीतः न अयम् हन्ति न हन्यते

यः एनम् हन्तारम् वेत्ति »One who thinks this [soul] the killer यः च एनम् हतम् मन्यते and one who thinks it to be killed उभौ तौ न विजानीतः they both do not know [the soul]. अयम् न हन्ति न हन्यते [Because] it neither kills nor is it killed.«

न हन्यते इति That it is not killed एतद् एव षड्-भाव-विकार-शून्यत्वेन द्रढयति this is confirmed by its freedom from the six transformations of [all material] existence – तद् एवम् जायते It (the material body) thus (1) is born अस्ति (2) exists [after being born] वर्धते (3) grows विपरिणमते (4) modifies [to something new] अपक्षीयते (5) decays नश्यति and (6) dies.

**||2.20||**

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।

न जायते म्रियते वा कदाचिद् न अयम् भूत्वा भविता वा न भूयः

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

अ-जः नित्यः शाश्वतः अयम् पुराणः न हन्यते हन्यमाने शरीरे

न जायते म्रियते वा »It is (1) not born or (6) dies कदाचिद् at any time, न अयम् भूत्वा भविता nor (2) does it exist [after] coming into existence न वा भूयः nor will it again [come into existence] (another meaning of bhūyah is ‘becoming bigger’), अ-जः [because] it is unborn अयम् नित्यः

शाश्वतः पुराणः it is (3) permanent, (5) ever-existing and (4) primeval. शरीरे हन्यमाने [सति] When the body is being killed न हन्यते it is not killed (see 2.19).«

किन्तु प्राक् एव But from the very beginning स्वतः सत्-रूपः it is by itself (by nature) of the form of existence. नित्यः/सर्वदा एक-रूपः 'Constant' means always the same (no growth).

**||2.21||**

वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥

वेद अ-विनाशिनम् नित्यम् यः एनम् अ-जम् अ-व्ययम् कथम् सः पुरुषः पार्थ कम् घातयति हन्ति कम्

पार्थ »O Arjuna! अ-जम् अ-व्ययम् As unborn, unchangeable अ-विनाशिनम् नित्यम् indestructible and permanent [soul] यः एनम् वेद he who knows this [soul], सः पुरुषः that person कम् हन्ति whom does he kill? कम् घातयति Whom does he cause (instigate) to kill? कथम् [And] how?«

अनेन By this [statement] मयि अपि प्रयोजकत्वात् दोष-दृष्टिम् मा कार्षीः 'Do not accuse Me also of instigating [you to kill]' इति उक्तम् भवति this is also said. ननु But: आत्मनः अ-विनाशः अपि Though the self is not destroyed तदीय-शरीर-नाशम् पर्यालोच्य शोचामि इति चेद् but I grieve considering the destruction of its body.

तत्र आह On this He says ...

**||2.22||**

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरो ऽपराणि ।

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरः अपराणि

तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही

यथा नरः »As a person जीर्णानि वासांसि विहाय [after] discarding old garments अपराणि नवानि गृह्णाति takes other new ones, तथा देही so the embodied soul जीर्णानि शरीराणि विहाय [after] giving up old bodies अन्यानि नवानि संयाति gets [surely] other new ones.«

जीर्ण-देह-नाशे At the destruction of worn-out bodies न शोक-अवकाशः there is no room for lamentation.

**||2.23||**

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥

न एनम् छिन्दन्ति शस्त्राणि न एनम् दहति पावकः न च एनम् क्लेदयन्ति आपः न शोषयति मारुतः

शस्त्राणि एनम् न छिन्दन्ति »Weapons do not cut it, पावकः एनम् न दहति fire does not burn it, आपः च एनम् न क्लेदयन्ति waters also do not dissolve it, मारुतः न शोषयति and wind does not dry [it] up.«

**||2.24||**

अच्छेद्यो ऽयमदाह्यो ऽयमक्लेद्यो ऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलो ऽयं सनातनः ॥

अ-छेद्यः अयम् अ-दाह्यः अयम् अ-क्लेद्यः अ-शोष्यः एव च नित्यः सर्व-गतः स्थाणुः अ-चलः अयम् सनातनः

अयम् अ-छेद्यः अयम् अ-दाह्यः »This [soul] is indivisible, it is inflammable अ-क्लेद्यः अ-शोष्यः एव च it can not be dissolved and not to be dried up अयम् नित्यः सर्व-गतः स्थाणुः this [soul] is permanent, everywhere, static अ-चलः सनातनः unmoving and eternal.«

**||2.25||**

अव्यक्तो ऽयमचिन्त्यो ऽयमविकार्यो ऽयमुच्यते । तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥

अ-व्यक्तः अयम् अ-चिन्त्यः अयम् अ-विकार्यः अयम् उच्यते तस्मात् एवम् विदित्वा एनम् न अनुशोचितुम् अर्हसि

अयम् अ-व्यक्तः अयम् अ-चिन्त्यः »This [soul] is unmanifest, it is inconceivable अयम् अ-विकार्यः उच्यते it is called immutable. तस्मात् एनम् एवम् विदित्वा Therefore, [after] knowing it to be such अनुशोचितुम् न अर्हसि you do not deserve to lament.«

इदानीम् [But] now देहेन सह आत्मनः जन्म that there is birth of the soul together with the body तद्-विनाशेन च विनाशम् and [its] destruction together with the destruction of the body अङ्गीकृत्य अपि even when accepting this [atheistic] viewpoint शोकः न कार्यः one should not grieve. इति आह This is stated now ...

**||2.26||**

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् । तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥

अथ च एनम् नित्य-जातम् नित्यम् वा मन्यसे मृतम् तथा अपि त्वम् महा-बाहो न एनम् शोचितुम् अर्हसि

एनम् नित्य-जातम् »This [soul] as always-born (when its particular body is born) नित्यम् मृतम् वा or always dead (when its particular body is dead) अथ च मन्यसे and if you think, तथा अपि महा-बाहो even then, O Arjuna! त्वम् एनम् शोचितुम् न अर्हसि You do not deserve to lament for it.«

**||2.27||**

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्ये ऽर्थे न त्वं शोचितुमर्हसि ॥

जातस्य हि ध्रुवः मृत्युः ध्रुवम् जन्म मृतस्य च तस्मात् अ-परिहार्ये अर्थे न त्वम् शोचितुम् अर्हसि

जातस्य हि मृत्युः ध्रुवः »Because, of one who is born, death is certain मृतस्य च जन्म ध्रुवम् and of one who is dead, birth is certain. तस्मात् अ-परिहार्ये अर्थे Therefore, in unavoidable matter न त्वम् शोचितुम् अर्हसि you do not deserve to lament.«

**||2.28||**

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

अव्यक्त-आदीनि भूतानि व्यक्त-मध्यानि भारत अव्यक्त-निधनानि एव तत्र का परिदेवना

अ-व्यक्तम् आदिः यस्य तद् अव्यक्त-आदि _whose beginning is unmanifest. व्यक्तम् मध्यम् यस्य तद् व्यक्त-मध्यम् _whose middle is manifest. अ-व्यक्तम् निधनम् यस्य तद् अव्यक्त-निधनम् _whose end is unmanifest.

भारत »O Arjuna! भूतानि अव्यक्त-आदीनि [All] beings are unmanifest in the beginning व्यक्त-मध्यानि manifest [only] during existence अव्यक्त-निधनानि एव and unmanifest at death. तत्र का परिदेवना What is there [the need for] lamentation?«

प्रतिबुद्धस्य Of a man who has woken up स्वप्न-दृष्ट-वस्तुषु इव शोकः like his grief for things [or friends] seen in his dream न युज्यते it (grief) is not befitting. कुतः तर्हि Then why विद्वांसः अपि even wise men लोके शोचन्ति lament in this world? आत्म-अज्ञानात् एव It is just because of ignorance about the soul. इति आशयेन With this intention आत्मनः दुर्विज्ञेयताम् आह the incomprehensibility of the soul is stated ...

**||2.29||**

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवत् पश्यति कश्चिद् एनम् आश्चर्यवत् वदति तथा एव च अन्यः
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥
आश्चर्यवत् च एनम् अन्यः शृणोति श्रुत्वा अपि एनम् वेद न च एव कश्चिद्

कश्चिद् एनम् आश्चर्यवत् पश्यति »Someone sees this [soul] as wonderful, अन्यः च तथा एव आश्चर्यवत् वदति and so also another describes it as wonderful, अन्यः च एनम् आश्चर्यवत् शृणोति still another hears of it as wonderful, कश्चिद् च श्रुत्वा अपि and someone even [after] hearing [and describing and seeing the soul] (the word ca indicates, even after speaking about and seeing the soul) एनम् न एव वेद does not know this [soul] at all [if he has wrong notions].«

कश्चिद् Someone एनम् आत्मानम् शास्त्र-आचार्य-उपदेशाभ्याम् पश्यन् seeing this soul by the instructions of scriptures and teachers आश्चर्यवत् पश्यति sees it as a wonder. सर्व-गतस्य नित्य-ज्ञान-आनन्द-स्वभावस्य आत्मनः अ-लौकिकत्वात् Because the soul, all-pervading and of the nature of eternal knowledge and bliss, is supernatural. अ-शोच्यत्वम् उपसंहरति [Now] He summarizes that one should not grieve [for the soul] ...

**||2.30||**

देही नित्यमवध्यो ऽयं देहे सर्वस्य भारत । तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥
देही नित्यम् अ-वध्यः अयम् देहे सर्वस्य भारत तस्मात् सर्वाणि भूतानि न त्वम् शोचितुम् अर्हसि

भारत »O Arjuna! सर्वस्य देहे अयम् देही This embodied soul in the body of all नित्यम् अ-वध्यः is always not to be killed. तस्मात् सर्वाणि भूतानि Therefore, for all beings त्वम् शोचितुम् न अर्हसि you do not deserve to lament.«

यद् च उक्तम् And what was said न च श्रेयः अनुपश्यामि हत्वा स्व-जनम् आहवे इत्यादि that ‘I see no good from killing kinsmen in battle, etc.’ (1.31) तत्र आह is being answered ...

**||2.31||**

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि । धर्म्याद्धि युद्धाच्छ्रेयो ऽन्यत्क्षत्रियस्य न विद्यते ॥
स्व-धर्मम् अपि च अवेक्ष्य न विकम्पितुम् अर्हसि धर्म्यात् हि युद्धात् श्रेयः अन्यत् क्षत्रियस्य न विद्यते

स्वस्य धर्मः इति स्व-धर्मः _own duty.

स्व-धर्मम् अपि च अवेक्ष्य »Even [after] considering your own duty विकम्पितुम् न अर्हसि you do not deserve to hesitate [to fight]. धर्म्यात् युद्धात् अन्यत् श्रेयः Another better than a righteous fight क्षत्रियस्य न हि विद्यते of a Kshatriya does not exist.«

||2.32||

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥

यदृच्छया च उपपन्नम् स्वर्ग-द्वारम् अपावृतम् सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धम् ईदृशम्

स्वर्गस्य द्वारम् इति स्वर्ग-द्वारम् _the door of heaven.

पार्थ »O Arjuna! यदृच्छया च उपपन्नम् And attained unsought ईदृशम् युद्धम् such a fight अपावृतम् स्वर्ग-द्वारम् [like] an opened door to heaven सुखिनः क्षत्रियाः लभन्ते [only] happy Kshatriya obtain.«

विपक्षे In acting contrary दोषम् आह the fault is shown ...

||2.33||

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥

अथ चेद् त्वम् इमम् धर्म्यम् सङ्ग्रामम् न करिष्यसि ततः स्व-धर्मम् कीर्तिम् च हित्वा पापम् अवाप्स्यसि

अथ इमम् धर्म्यम् सङ्ग्रामम् »However, this righteous fight त्वम् न करिष्यसि चेद् if you will not perform, ततः then स्व-धर्मम् कीर्तिम् च हित्वा [after] giving up your personal duty and fame पापम् अवाप्स्यसि you will incur sin.«

||2.34||

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् । सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥

अ-कीर्तिम् च अपि भूतानि कथयिष्यन्ति ते अ-व्ययाम् सम्भावितस्य च अ-कीर्तिः मरणात् अतिरिच्यते

तव/ते अ-व्ययाम् अ-कीर्तिम् च अपि »And even your eternal infamy भूतानि कथयिष्यन्ति people will tell, सम्भावितस्य च and for one who is respected अ-कीर्तिः मरणात् अतिरिच्यते infamy is worse than dying.«

||2.35||

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः । येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥

भयात् रणात् उपरतम् मंस्यन्ते त्वाम् महा-रथाः येषाम् च त्वम् बहु-मतः भूत्वा यास्यसि लाघवम्

बहु मतः इति बहु-मतः _much thought, high esteem.

भयात् रणात् उपरतम् त्वाम् »That you have desisted from battle out of fear महा-रथाः मंस्यन्ते the generals will think, येषाम् च त्वम् बहु-मतः भूत्वा and [after] having been highly esteemed of whom लाघवम् यास्यसि you will attain insignificance.«

||2.36||

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः । निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥

अ-वाच्य-वादान् च बहून् वदिष्यन्ति तव अ-हिताः निन्दन्तः तव सामर्थ्यम् ततः दुःखतरम् नु किम्

न वाच्यः वादः इति अ-वाच्य-वादः _a word which is not to be spoken.

तव अ-हिताः च »Your enemies also तव सामर्थ्यम् निन्दन्तः criticising your ability बहून् अ-वाच्य-वादान् वदिष्यन्ति will speak many bad words. ततः दुःखतरम् नु किम् What is more painful than that?«

यद् च उक्तम् And what was said न च एतद् विद्मः कतरत् नः गरीयः यद्वा जयेम यदि वा नः जयेयुः that, 'we do not know which would be better for us – whether we should conquer them or they should conquer us' (2.6) इति तत्र आह is being answered ...

||2.37||

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् । तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥

हतः वा प्राप्स्यसि स्वर्गम् जित्वा वा भोक्ष्यसे महीम् तस्मात् उत्तिष्ठ कौन्तेय युद्धाय कृत-निश्चयः

कृतः निश्चयः येन सः कृत-निश्चः _by whom a decision is made.

हतः वा स्वर्गम् प्राप्स्यसि »Either, killed, you will attain heaven, जित्वा वा महीम् भोक्ष्यसे or, [after] conquering, you will enjoy the earth. तस्मात् कौन्तेय Therefore, O Arjuna! युद्धाय कृत-निश्चयः उत्तिष्ठ Determined for the fight, get up.«

यद् अपि उक्तम् Also what was said पापम् एव आश्रयेत् अस्मान् that, 'Sin alone will overcome us' (1.35) इति तत्र आह is being answered ...

||2.38||

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥

सुख-दुःखे समे कृत्वा लाभ-अलाभौ जय-अजयौ ततः युद्धाय युज्यस्व न एवम् पापम् अवाप्स्यसि

सुखम् च दुःखम् च इति सुख-दुःखे _happiness and distress. लाभः च अ-लाभः च इति लाभ-अलाभौ _gain and loss. जयः च अ-जयः च इति जय-अजयौ _victory and defeat.

सुख-दुःखे समे कृत्वा »[After] making alike happiness and distress लाभ-अलाभौ जय-अजयौ gain and loss, victory and defeat (victory /defeat bring gain /loss, which bring happiness /distress.), ततः युद्धाय युज्यस्व then prepare for the fight [just to do your duty]. एवम् पापम् न अवाप्स्यसि Thus you will not incur sin.«

उपदिष्ट-ज्ञान-योगम् उपसंहरन् Concluding Jnāna-yoga which has been taught तद्-साधनम् कर्म-योगम् प्रस्तौति He introduces Karma-yoga, which is a means to that (Jnāna-yoga) ...

||2.39||

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥

एषा ते अभिहिता साङ्ख्ये बुद्धिः योगे तु इमाम् शृणु बुद्ध्या युक्तः यया पार्थ कर्म-बन्धम् प्रहास्यसि

पार्थ »O Arjuna! साङ्ख्ये In terms of Jnāna-yoga एषा बुद्धिः तुभ्यम्/ते अभिहिता this understanding (Buddhi) [of the soul] has been explained to you, योगे तु इमाम् शृणु but [now] hear this in [terms of] Karma-yoga. यया बुद्ध्या युक्तः Endowed with which understanding कर्म-बन्धम् प्रहास्यसि you will abandon the bondage of Karma.«

सम्यक् ख्यायते/प्रकाश्यते वस्तु-तत्त्वम् अनया That by which the nature of things is completely described or revealed इति सङ्ख्या/सम्यक् ज्ञानम् that is Sankhyā, complete knowledge तस्मिन् प्रकाशमानम् आत्म-तत्त्वम् साङ्ख्यम् and the nature of the self that is revealed through it is called Sānkhya.

In Karma-yoga the same self-realization is taught through the practice of surrendering all activities to the Lord.

||2.40||

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥
न इह अभिक्रम-नाशः अस्ति प्रत्यवायः न विद्यते स्वल्पम् अपि अस्य धर्मस्य त्रायते महतः भयात्

अभिक्रमस्य नाशः इति अभिक्रम-नाशः _loss of endeavor.

इह अभिक्रम-नाशः न अस्ति »Here [on this path] there is no fruitlessness प्रत्यवायः न विद्यते and there is no harm ('reversal'). स्वल्पम् अपि अस्य धर्मस्य Even very little of this Dharma (i.e., Karma-yoga) महतः भयात् त्रायते protects from the great fear [of Samsāra].«
If in Vedic rituals the Mantras are not correctly pronounced, there is no result or even harm.

||2.41||

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन । बहुशाखा ह्यनन्ताश्च बुद्धयो ऽव्यवसायिनाम् ॥
व्यवसाय-आत्मिका बुद्धिः एका इह कुरु-नन्दन बहु-शाखाः हि अनन्ताः च बुद्धयः अ-व्यवसायिनाम्

बह्व्यः शाखाः यस्याः सा बहु-शाखा _whose branches are many. न अन्तः इति अनन्तः _'no end', endless.

कुरु-नन्दन »O Arjuna! इह व्यवसाय-आत्मिका बुद्धिः एका Here [in this Karma-yoga] the intelligence (Buddhi) is full of determination (that, by devotion to the Lord alone I shall certainly cross over Samsāra), अ-व्यवसायिनाम् बुद्धयः [whereas] the intelligences of those without [such] determination (of those with external /material desires) बहु-शाखाः हि अनन्ताः च are many-branched and infinite (because of the unlimited number of their desires and the many procedures).«

ननु But: कामिनः अपि Also those with desire कष्टान् कामान् विहाय giving up desires difficult to fulfill व्यवसाय-आत्मिकाम् एव बुद्धिम् किम् न कुर्वन्ति why they do not practice the resolute attitude? तत्र आह This is answered ...

||2.42-43||

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥
याम् इमाम् पुष्पिताम् वाचम् प्रवदन्ति अ-विपश्चितः वेद-वाद-रताः पार्थ न अन्यत् अस्ति इति वादिनः
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥
काम-आत्मानः स्व-र्गपराः जन्म-कर्म-फल-प्रदाम् क्रिया-विशेष-बहुलाम् भोग-ऐश्वर्य-गतिम् प्रति

वेदानाम् वादे रतः इति वेद-वाद-रतः _who is attached to the word of the Vedas. कामः आत्मा यस्य सः काम-आत्मा _'whose nature is desire', who is full of desires. स्वर्गः परः यस्य सः स्वर्ग-परः _whose supreme[goal] is heaven.

पार्थ »O Arjuna! भोग-ऐश्वर्य-गतिम् प्रति Towards the goal of enjoyment and lordship जन्म-कर्म-फल-प्रदाम् yielding [good] birth as the result of rituals क्रिया-विशेष-बहुलाम् [describing] various [such] specific rituals, याम् इमाम् पुष्पिताम् वाचम् such this flowery language [of the Vedas] अ-विपश्चितः वेद-वाद-रताः प्रवदन्ति ignorant followers of the Vedic lore speak. काम-आत्मानः स्वर्ग-

पराः They are full of desires, set on attaining heaven, न अन्यत् अस्ति इति वादिनः [and] 'there is nothing else ' – thus speaking.«

**||2.44||**

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥

भोग-ऐश्वर्य-प्रसक्तानाम् तया अपहृत-चेतसाम् व्यवसाय-आत्मिका बुद्धिः समाधौ न विधीयते

भोगे ऐश्वर्ये च प्रसक्तः यः सः भोग-ऐश्वर्य-प्रसक्तः _who is attached to enjoyment and lordship. अपहृतम् चेतः यस्य सः अपहृत-चेताः _whose mind is stolen.

भोग-ऐश्वर्य-प्रसक्तानाम् »Of those who are attached to enjoyment and lordship तया अपहृत-चेतसाम् and whose minds are attracted by that समाधौ व्यवसाय-आत्मिका बुद्धिः a determined intelligence in the Lord न विधीयते does not take place.«

समाधीयते चित्तम् अस्मिन् इति समाधिः That in which the mind gets settled is called Samādhi परमेश्वरः namely the Lord. ननु च But: यदि स्वर्ग-आदिकम् If heaven etc. परमम् फलम् न भवति is not the highest goal तर्हि किम् इति वेदैः तद्-साधनतया कर्माणि विधीयन्ते then why such rites are prescribed as a means to it (heaven) by the Vedas? तत्र आह This is being answered:

**||2.45||**

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥

त्रैगुण्य-विषयाः वेदाः निस्त्रैगुण्यः भव अर्जुन निर्द्वन्द्वः नित्य-सत्त्व-स्थः निर्योग-क्षेमः आत्मवान्

त्रैगुण्यम् विषयः यस्य सः त्रैगुण्य-विषयः _whose subject is the three Gunas. नित्यम् सत्त्वे तिष्ठति यः सः नित्य-सत्त्व-स्थः _who always stays in Sattva. न अस्ति योगः च क्षेमः च यस्य सः निर्योग-क्षेमः _for whom there is no gain and preservation.

वेदाः त्रैगुण्य-विषयाः »The Vedas deal with the three Gunas. अर्जुन निस्त्रैगुण्यः भव O Arjuna, be free from the three Gunas! (Be free from material desires.) निर्द्वन्द्वः नित्य-सत्त्व-स्थः [By being] free from dualities, always established in goodness निर्योग-क्षेमः free from [anxiety for] gain and safety आत्मवान् and established in the self.«

नहि Certainly not द्वन्द्व-आकुलस्य for one perturbed by the dualities योग-क्षेम-व्यापृतस्य च busy with acquisition and preservation प्रमादिनः and [thus] illusioned त्रैगुण्य-अतिक्रमः सम्भवति is it possible, to transcend the three Gunas. ननु But: वेद-उक्त-नाना-फल-परित्यागेन By renunciation of the various fruits described in the Vedas निष्कामतया and freedom from desires ईश्वर-आराधन-विषया व्यवसायात्मिका बुद्धिः तु such resolute determination which seeks to worship the Lord कुबुद्धिः एव isn't this a bad decision? ...

**||2.46||**

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥

यावान् अर्थः उदपाने सर्वतः सम्प्लुत-उदके तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः

सम्प्लुतम् उदकम् इति सम्प्लुत-उदकम् _'a flooded water', a great lake.

यावान् अर्थः उदपाने »As much gain (namely water) in a well सर्वतः सम्प्लुत-उदके is in all respects in a great lake, तावान् सर्वेषु वेदेषु that much [are all the different purposes] in all the Vedas विजानतः ब्राह्मणस्य for an enlightened Brāhmana [found in his spiritual happiness].«

तत्र तत्र परिभ्रमणेन By going around here and there [to different wells] विभागशः यावान् स्नान-पानादिः अर्थः प्रयोजनम् भवति as much as all needs like bathing and drinking are served separately, तावान् सर्वः अपि अर्थः so much all the needs सर्वतः सम्प्लुत-उदके/महा-ह्रदे एकत्र एव यथा भवति are served completely in one place in an overflowing reservoir, a great lake. ... ब्रह्म-आनन्दे Because in spiritual bliss क्षुद्र-आनन्दानाम् अन्तः-भूतत्वात् all small [material] joys are included. तस्मात् इयम् एव बुद्धिः सुबुद्धिः Therefore, this determination is the best decision. किम् कर्मणा इति Then why should one work? ...

**||2.47||**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गो ऽस्त्वकर्मणि ॥

कर्मणि एव अधिकारः ते मा फलेषु कदाचन मा कर्म-फल-हेतुः भूः मा ते सङ्गः अस्तु अ-कर्मणि

कमस्य फलम् हेतुः यस्य सः कर्म-फल-हेतुः _whose motive is the fruit of work.

तव/ते अधिकारः कर्मणि एव »Your right is in [your] duty only मा फलेषु कदाचन and not at any time in the fruits. कर्म-फल-हेतुः मा भूः [This means:] Do not be motivated by the result of work अ-कर्मणि तव/ते सङ्गः मा अस्तु and your attachment be not to inactivity (thinking that, any work is binding).«

**||2.48||**

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥

योग-स्थः कुरु कर्माणि सङ्गम् त्यक्त्वा धनञ्जय सिद्धि-असिद्ध्योः समः भूत्वा समत्वम् योगः उच्यते

सिद्धिः च अ-सिद्धिः च इति सिद्धि-असिद्धी _success and failure. योगे तिष्ठति यः सः योग-स्थः _who stays in Yoga.

धनञ्जय »O Arjuna! सङ्गम् त्यक्त्वा [After] giving up attachment सिद्धि-असिद्ध्योः समः भूत्वा [and after] being equal in success and failure योग-स्थः कर्माणि कुरु established in meditation do your duties समत्वम् योगः उच्यते [such] equanimity is called Yoga.«

सङ्गम् कर्तृत्व-अभिनिवेशम् 'Attachment' means the conception of doership. ... योगः परमेश्वर-एक-परता Yoga here means exclusive devotion to the Lord.

**||2.49||**

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय। बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥

दूरेण हि अवरम् कर्म बुद्धि-योगात् धनञ्जय बुद्धौ शरणम् अन्विच्छ कृपणाः फल-हेतवः

फलम् हेतुः यस्य सः फल-हेतुः _whose motive is the fruit.

धनञ्जय »O Arjuna! बुद्धि-योगात् Compared to Karma-/Buddhi-yoga कर्म दूरेण हि अवरम् [ordinary] Karma is by far inferior. बुद्धौ शरणम् अन्विच्छ [Therefore] seek shelter in

Karma-/Buddhi-yoga (Buddhi). फल-हेतवः कृपणाः Those who are inspired by the fruit [of work] are wretched.«

बुद्ध्या/व्यवसायात्मिकया कृतः कर्म-योगः बुद्धि-योगः Karma-yoga done with resolution (Buddhi) is called Buddhi-yoga.

**||2.50||**

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥

बुद्धि-युक्तः जहाति इह उभे सुकृत-दुष्कृते तस्मात् योगाय युज्यस्व योगः कर्मसु कौशलम्

In this verse there is no Sandhi made between iha and ubhe. Such licenses by great authorities are known as Ārsha-prayoga. The scriptures are older than the present grammatical treatises and not every usage found in the scripture has been codified.

सुकृतम् च दुष्कृतम् च इति सुकृत-दुष्कृते _good and bad Karma.

उभे सुकृत-दुष्कृते »Both good and bad Karma बुद्धि-युक्तः इह जहाति a Karma- /Buddhi-yogī gives up here [in this very life], तस्मात् योगाय युज्यस्व therefore, strive for Karma-yoga. योगः कर्मसु कौशलम् Karma-yoga is the art in works [without reaction].«

सुकृतम् स्वर्ग-आदि-प्रापकम् Good (pious) work leads to heaven, etc. दुष्कृतम् निरय-आदि-प्रापकम् evil work leads to hell, etc. ते उभे and both of them इह एव जन्मनि in this very birth परमेश्वर-प्रसादेन जहाति/त्यजति he gives up by the grace of the Lord. ... कर्मसु यद् कौशलम् Which is the art in works बन्धकानाम् अपि तेषाम् even in those [works] which [ordinarily] lead to bondage ईश्वर-आराधनेन मोक्ष-परत्व-सम्पादन-चातुर्यम् the expertness which turns them into means for liberation by [doing them as] worship of the Lord सः एव योगः that is [Buddhi-]Yoga.

**||2.51||**

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥

कर्म-जम् बुद्धि-युक्ताः हि फलम् त्यक्त्वा मनीषिणः जन्म-बन्ध-विनिर्मुक्ताः पदम् गच्छन्ति अनामयम्

जन्मनः बन्धात् विनिर्मुक्तः इति जन्म-बन्ध-विनिर्मुक्तः _completely liberated from the bondage of birth.

कर्म-जम् फलम् त्यक्त्वा »[After] giving up the fruit resulting from work बुद्धि-युक्ताः मनीषिणः wise men, engaged in Karma-/Buddhi-yoga जन्म-बन्ध-विनिर्मुक्ताः are liberated from the bondage of rebirth अनामयम् पदम् गच्छन्ति हि and certainly attain the transcendental ('faultless') abode.«

केवलम् ईश्वर-आराधन-अर्थम् कर्म कुर्वाणाः Performing work only as worship of the Lord. ... विष्णोः पदम् मोक्ष-आख्यम् गच्छन्ति They attain the abode of Vishnu known as liberation.

**||2.52||**

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥

यदा ते मोह-कलिलम् बुद्धिः व्यतितरिष्यति तदा गन्तासि निर्वेदम् श्रोतव्यस्य श्रुतस्य च

मोहस्य कलिलम् इति मोह-कलिलम् _the thicket of illusion.

यदा तव/ते बुद्धिः »When your intelligence मोह-कलिलम् व्यतितरिष्यति will [thus] pass the thicket of illusion तदा श्रोतव्यस्य श्रुतस्य च then of what is to be heard and what has been heard निर्वेदम् गन्तासि you will attain indifference.«

मोहः देह-आदिषु आत्म-बुद्धिः 'Illusion' here means identification with the body, etc. तद् एव कलिलम् That itself is a thicket.

**||2.53||**

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥
श्रुति-विप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधौ अ-चला बुद्धिः तदा योगम् अवाप्स्यसि

यदा तव/ते श्रुति-विप्रतिपन्ना बुद्धिः »When your intelligence, [now] perplexed by the Vedas (i.e., by hearing about various worldly and heavenly objects of enjoyment) समाधौ निश्चला अ-चला स्थास्यति will remain steady and fixed in the Lord (Samādhi, see 2.44) तदा योगम् अवाप्स्यसि then you will attain [the fruit of] Yoga (i.e., knowledge of the truth).«

**||2.54||**

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥
स्थित-प्रज्ञस्य का भाषा समाधि-स्थस्य केशव स्थित-धीः किम् प्रभाषेत किम् आसीत व्रजेत किम्

स्थिता धीः यस्य सः स्थित-धीः _whose intelligence is steady.

केशव »O Lord! स्थित-प्रज्ञस्य समाधि-स्थस्य Of one who is steady in intelligence and fixed in meditation का भाषा what is the definition /characteristic? स्थित-धीः किम् प्रभाषेत How should one with firm intelligence speak? किम् आसीत How should he 'sit' (control his senses)? किम् व्रजेत How should he 'walk' (act)?«

तत्र प्रथम-प्रश्न-उत्तरम् Now, answering the first question in (2.55-56) ...

**||2.55||**

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
प्रजहाति यदा कामान् सर्वान् पार्थ मनः-गतान् आत्मनि एव आत्मना तुष्टः स्थित-प्रज्ञः तदा उच्यते

स्थिता प्रज्ञा यस्य सः स्थित-प्रज्ञः _whose wisdom is steady.

पार्थ »O Arjuna! आत्मनि एव आत्मना तुष्टः [Because of being] satisfied in the self by the self सर्वान् मनः-गतान् कामान् all mental desires यदा प्रजहाति when one gives [those] up, तदा स्थित-प्रज्ञः उच्यते then he is said to be of steady intelligence.«

**||2.56||**

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥
दुःखेषु अनुद्विग्न-मनाः सुखेषु विगत-स्पृहः वीत-राग-भय-क्रोधः स्थित-धीः मुनिः उच्यते

वीताः राग-भय-क्रोधाः यस्य सः वीत-राग-भय-क्रोधः _whose attachment, fear and anger are gone. न उद्विग्नम् मनः यस्य सः अनुद्विग्न-मनाः _whose mind is not disturbed.

वीत-राग-भय-क्रोधः »[Because of being] free from attachment, fear and anger दुःखेषु अनुद्विग्न-मनाः one who is undisturbed in miseries सुखेषु विगत-स्पृहः and free from hankering in pleasures स्थित-धीः मुनिः उच्यते he is called a sage of steady intelligence.«

कथम् भाषेत How should he speak? ...

**||2.57||**

## यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् । नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥

यः सर्वत्र अनभिस्नेहः तद् तद् प्राप्य शुभ-अशुभम् न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता

शुभम् च अ-शुभम् च इति शुभ-अशुभम् _fortune and misfortune; the neuter compound shubha-ashubha as Samāhara in Singular.

यः सर्वत्र अनभिस्नेहः »One who is unaffected everywhere (to possession, family, etc.) तद् तद् शुभ-अशुभम् प्राप्य [and therefore after] obtaining whatever good or evil न अभिनन्दति न द्वेष्टि he neither praises nor hates it (but talks as one neutral), तस्य प्रज्ञा प्रतिष्ठिता [then] his intelligence is steady.«

**||2.58||**

## यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

यदा संहरते च अयम् कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रिय-अर्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता

इन्द्रियस्य अर्थः इति इन्द्रिय-अर्थः _'the object of sense', sense object.

इन्द्रियाणि इन्द्रिय-अर्थेभ्यः »The senses from sense objects यदा च अयम् सर्वशः संहरते when he completely withdraws [them] कूर्मः अङ्गानि इव as a tortoise [withdraws] its limbs, तस्य प्रज्ञा प्रतिष्ठिता [then] his intelligence is steady.«

ननु But: न इन्द्रियाणाम् विषयेषु अ-प्रवृत्तिः स्थित-प्रज्ञस्य लक्षणम् भवितुम् अर्हति The disinclination of the senses towards sense objects cannot be a characteristic of a man of steady intelligence जडानाम् आतुराणाम् उपवास-पराणाम् च विषयेषु अ-प्रवृत्तेः अ-विशेषात् because even of the lazy, sick and fasting persons there is disinclination towards sense objects. तत्र आह This is answered ...

**||2.59||**

## विषया विनिवर्तन्ते निराहारस्य देहिनः । रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥

विषयाः विनिवर्तन्ते निराहारस्य देहिनः रस-वर्जम् रसः अपि अस्य परम् दृष्ट्वा निवर्तते

रसम् वर्जयित्वा इति रस-वर्जम् _[after] excluding the taste.

निराहारस्य देहिनः »For an embodied soul which is restricted ('fasting') विषयाः विनिवर्तन्ते the sense objects disappear रस-वर्जम् except for the taste /desire. परम् दृष्ट्वा [But after] experiencing a higher [taste] अस्य रसः अपि निवर्तते his taste /desire even ceases (that is the kind of sense-control of a Sthita-prajna).«

The word nirāhāra here refers to someone whose sense enjoyment is under restriction (because of old age, disease, foolishness, poverty, etc.). What remains is his 'taste', i.e., the desire to enjoy.

Specifically, nirāhāra refers to someone who is fasting. He does not want to hear, touch etc., but the sense of taste remains.

[External sense-control is still important:] इन्द्रिय-संयमम् विना तु Without sense-control स्थित-प्रज्ञता न सम्भवति steadiness of intelligence is not possible. अतः साधक-अवस्थायाम् Therefore, in the stage of spiritual practice तत्र महान् प्रयत्नः कर्तव्यः there should be great endeavor for this (sense-control) [because otherwise] ...

**||2.60||**

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः। इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥

यततः हि अपि कौन्तेय पुरुषस्य विपश्चितः इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभम् मनः

कौन्तेय »O Arjuna! यततः हि अपि विपश्चितः पुरुषस्य Even of a wise man who is endeavoring [for liberation] प्रमाथीनि इन्द्रियाणि the turbulent senses प्रसभम् मनः हरन्ति forcibly carry away the mind.«

**||2.61||**

तानि सर्वाणि संयम्य युक्त आसीत मत्परः। वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥

तानि सर्वाणि संयम्य युक्तः आसीत मद्-परः वशे हि यस्य इन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता

अहम् परः यस्य सः मद्-परः _whose supreme [shelter or master] am I.

तानि सर्वाणि संयम्य »[After] controlling all those [senses] युक्तः मद्-परः आसीत the Yogī (yukta) should remain fixed on me. यस्य इन्द्रियाणि वशे हि He whose senses are under control, तस्य प्रज्ञा प्रतिष्ठिता his intelligence is steady.«

एतेन By this कथम् आसीत इति प्रश्नस्य to the question 'How does he sit?' वशी-कृत-इन्द्रियः सन् आसीत/निर्व्यापारः तिष्ठेत् 'He should sit with controlled senses, without activity.' इति उत्तरम् उक्तम् भवति this answer is given. बाह्य-इन्द्रिय-संयम-अभावे In not having control over the external senses दोषम् उक्त्वा after telling the defect मनः-संयम-अभावे दोषम् आह the defect in not having control over the mind is shown:

**||2.62||**

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते। सङ्गात्सञ्जायते कामः कामात्क्रोधो ऽभिजायते॥

ध्यायतः विषयान् पुंसः सङ्गः तेषु उपजायते सङ्गात् सञ्जायते कामः कामात् क्रोधः अभिजायते

विषयान् ध्यायतः पुंसः »For a man contemplating sense objects सङ्गः तेषु उपजायते attachment for them arises. सङ्गात् कामः सञ्जायते From attachment arises [more] desire, कामात् क्रोधः अभिजायते and from desire arises anger.«

कामात् च केनचिद् प्रतिहतात् क्रोधः भवति And from desire results anger, when there is an obstruction by someone.

**||2.63||**

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृति-विभ्रमः स्मृति-भ्रंशात् बुद्धि-नाशः बुद्धि-नाशात् प्रणश्यति

स्मृतेः विभ्रमः इति स्मृति-विभ्रमः _confusion of memory. स्मृतेः भ्रंशः इति स्मृति-भ्रंशः _loss of memory. बुद्धेः नाशः इति बुद्धि-नाशः _loss of intelligence.

क्रोधात् सम्मोहः भवति »From anger comes delusion, सम्मोहात् स्मृति-विभ्रमः from delusion [comes] confusion of memory, स्मृति-भ्रंशात् बुद्धि-नाशः from loss of memory [comes] the loss of [spiritual] intelligence, बुद्धि-नाशात् प्रणश्यति and after the loss of intelligence, one is lost.«

सम्मोहः 'Delusion' means कार्य-अकार्य-विवेक-अभावः absence of the discrimination as to what is to be done and what is not to be done. ... शास्त्र-आचार्य-उपदिष्ट-अर्थ-स्मृतेः विभ्रमः Confusion of memory means with respect to the purport of the teachings of scripture and teacher.

The soul is indestructible and present in all forms of life. But when the identification as spirit soul is lost, and all activities are thus based on the false bodily identification, the soul is considered 'to be lost'. Therefore, it is sometimes said that animals and plants have no soul.

**||2.64||**

रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन्। आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

राग-द्वेष-विमुक्तैः तु विषयान् इन्द्रियैः चरन् आत्म-वश्यैः विधेय-आत्मा प्रसादम् अधिगच्छति

विधेय-आत्मा तु »But one who is self-controlled राग-द्वेष-विमुक्तैः आत्म-वश्यैः इन्द्रियैः with self-controlled senses, free from attachment and aversion विषयान् चरन् [even while] going to sense objects प्रसादम् अधिगच्छति he attains peace (satisfaction).«

इति अस्य चतुर्थ-प्रश्नस्य – स्व-अधीनैः इन्द्रियैः विषयान् अधिगच्छति इति उत्तरम् उक्तम् भवति Thus the answer to his fourth question is given – he experiences the sense objects with the senses under his control.

**||2.65||**

प्रसादे सर्वदुःखानां हानिरस्योपजायते। प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥

प्रसादे सर्व-दुःखानाम् हानिः अस्य उपजायते प्रसन्न-चेतसः हि आशु बुद्धिः पर्यवतिष्ठते

सर्वम् दुःखम् इति सर्व-दुःखम् _all misery. प्रसन्नम् चेतः यस्य सः प्रसन्न-चेताः _whose mind is pacified.

प्रसादे »In peace अस्य सर्व-दुःखानाम् हानिः उपजायते the destruction of all his miseries takes place. प्रसन्न-चेतसः For one whose mind is pacified बुद्धिः आशु हि पर्यवतिष्ठते the intelligence very quickly becomes steady.«

**||2.66||**

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना। न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

न अस्ति बुद्धिः अ-युक्तस्य न च अ-युक्तस्य भावना न च अ-भावयतः शान्तिः अ-शान्तस्य कुतः सुखम्

अ-युक्तस्य न बुद्धिः अस्ति »For one who is not controlled there is no intelligence, अ-युक्तस्य च न भावना and for one who is not controlled there is no meditation, अ-भावयतः च न शान्तिः for one who is not meditating there is no peace, अ-शान्तस्य कुतः सुखम् and for one without peace, where is happiness [of liberation]?«

न अस्ति बुद्धिः अ-युक्तस्य That there is no intelligence for one who is not sense-controlled इति अत्र हेतुम् आह now the reason is stated ...

**||2.67||**

इन्द्रियाणां हि चरतां यन्मनो ऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥
इन्द्रियाणाम् हि चरताम् यद् मनः अनुविधीयते तद् अस्य हरति प्रज्ञाम् वायुः नावम् इव अम्भसि

चरताम् इन्द्रियाणाम् »Among the roaming /uncontrolled senses यद् हि मनः अनुविधीयते that one on which the mind is placed (with which sense the mind goes), तद् अस्य प्रज्ञाम् हरति that [sense] takes away his intelligence (it makes the person restless for that object), वायुः नावम् इव अम्भसि as the wind [takes away] a boat on the water.«

यथा प्रमत्तस्य कर्ण-धारस्य नावम् वायुः समुद्रे सर्वतः परिभ्रामयति As the wind tosses in the ocean a ship whose captain is inattentive.

**||2.68||**

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥
तस्मात् यस्य महा-बाहो निगृहीतानि सर्वशः इन्द्रियाणि इन्द्रिय-अर्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता

तस्मात् महा-बाहो »Therefore, O Arjuna! यस्य इन्द्रियाणि He whose senses इन्द्रिय-अर्थेभ्यः सर्वशः निगृहीतानि are completely restrained from sense objects, तस्य प्रज्ञा प्रतिष्ठिता his intelligence is steady.«

**||2.69||**

या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥
या निशा सर्व-भूतानाम् तस्याम् जागर्ति संयमी यस्याम् जाग्रति भूतानि सा निशा पश्यतः मुनेः

या सर्व-भूतानाम् निशा »That which is night for all beings तस्याम् संयमी जागर्ति in that [sensual 'night', spiritual reality] a self-controlled man wakes. यस्याम् भूतानि जाग्रति And in which all beings are awake सा पश्यतः मुनेः निशा that [world of sense objects] is night for the sage who sees.«

**||2.70||**

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
आपूर्यमाणम् अचल-प्रतिष्ठम् समुद्रम् आपः प्रविशन्ति यद्वत्
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥
तद्वत् कामाः यम् प्रविशन्ति सर्वे सः शान्तिम् आप्नोति न काम-कामी

अचला प्रतिष्ठा यस्य सः अचल-प्रतिष्ठः _whose position is fixed. कामानाम् कामी इति काम-कामी _a desirer of enjoyment.

आपूर्यमाणम् अचल-प्रतिष्ठम् समुद्रम् »Into the ocean, which is being filled but remains steady यद्वत् आपः प्रविशन्ति as [many] rivers ('waters') enter, यम् सर्वे कामाः तद्वत् प्रविशन्ति he whom all desires enter in the same way सः शान्तिम् आप्नोति he achieves peace न काम-कामी and not he who desires enjoyment.«

**||2.71||**

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः । निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥

विहाय कामान् यः सर्वान् पुमान् चरति निःस्पृहः निर्ममः निरहङ्कारः सः शान्तिम् अधिगच्छति

सर्वान् कामान् विहाय »[After] giving up all desires यः पुमान् a man who निःस्पृहः निर्ममः निरहङ्कारः चरति lives without hankering, proprietorship and false ego, सः शान्तिम् अधिगच्छति he attains peace.«

**||2.72||**

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति । स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

एषा ब्राह्मी स्थितिः पार्थ न एनाम् प्राप्य विमुह्यति स्थित्वा अस्याम् अन्त-काले अपि ब्रह्म-निर्वाणम् ऋच्छति

पार्थ »O Arjuna! एषा ब्राह्मी स्थितिः This is the spiritual position एनाम् प्राप्य न विमुह्यति [after] attaining it one is not bewildered, अन्त-काले अपि अस्याम् स्थित्वा [and after] being situated in it even [for a moment] at the time of death ब्रह्म-निर्वाणम् ऋच्छति one attains liberation in the Supreme.«

एनाम् परमेश्वर-आराधनेन विशुद्ध-अन्तः-करणः पुमान् प्राप्य After attaining it a person who has become pure-minded by worship of the Lord न विमुह्यति is not deluded पुनः संसार-मोहम् न प्राप्नोति i.e., he does not again come under the illusion of transmigration.

**||3.1||**

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन । तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥

ज्यायसी चेद् कर्मणः ते मता बुद्धिः जनार्दन तद् किम् कर्मणि घोरे माम् नियोजयसि केशव

जनार्दन »O Lord! बुद्धिः कर्मणः ज्यायसी चेद् If [such] equanimity (Buddhi) is better than work तव/ते मता considered by you, केशव तद् किम् O Lord! Then why घोरे कर्मणि माम् नियोजयसि you engage me in ghastly work?«

First Krishna glorifies the analytical distinction between body and soul (2.11 ff.), then work without fruitive desire (2.40 ff.). At the end He seems to establish the greater importance of Jnāna (sthita-prajnah, brāhmī sthitih), having all the time urged Arjuna to do his duty of fighting (2.31).

**||3.2||**

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे । तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥

व्यामिश्रेण इव वाक्येन बुद्धिम् मोहयसि इव मे तद् एकम् वद निश्चित्य येन श्रेयः अहम् आप्नुयाम्

व्यामिश्रेण इव वाक्येन »By this apparently equivocal speech मम/मे बुद्धिम् मोहयसि इव you seem to perplex my intelligence [on purpose]. येन श्रेयः अहम् आप्नुयाम् That by which I would attain the best end, तद् एकम् निश्चित्य वद [after] ascertaining it, tell that alone.«

परम-कारुणिकस्य तव मोहकत्वम् न अस्ति एव Because of your supreme compession You are not [purposefully] perplexing. तथापि भ्रान्त्या मम Still, by my illusion एवम् भाति it so appears to me. इति इव-शब्देन उक्तम् This is meant by the word iva.

||3.3||

लोके ऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥
लोके अस्मिन् द्वि-विधा निष्ठा पुरा प्रोक्ता मया अनघ ज्ञान-योगेन साङ्ख्यानाम् कर्म-योगेन योगिनाम्

ज्ञानस्य योगः इति ज्ञान-योगः _the Yoga of knowledge. कर्मणः योगः इति कर्म-योगः _the Yoga of work.

अनघ »O sinless [Arjuna]! अस्मिन् लोके द्वि-विधा निष्ठा [One] twofold faith [in liberation] in this world मया पुरा प्रोक्ता has been declared by me before – ज्ञान-योगेन साङ्ख्यानाम् by Jnāna-yoga [the faith] of the Jnāna-yogīs कर्म-योगेन योगिनाम् and by Karma-yoga of the Karma-yogīs (see 2.39).«

एकस्या एव तु प्रकार-भेद-मात्रम् Only different forms of just one [faith] अधिकार-भेदेन उक्तम् suited to different aspirants have been stated.

||3.4||

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषो ऽश्नुते। न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥
न कर्मणाम् अनारम्भात् नैष्कर्म्यम् पुरुषः अश्नुते न च सन्न्यसनात् एव सिद्धिम् समधिगच्छति

न कर्मणाम् अनारम्भात् »Not by [mere] non-performance of activities पुरुषः नैष्कर्म्यम् अश्नुते a person attains freedom from reaction, न च सन्न्यसनात् एव nor by mere Sannyāsa (without purity of mind) सिद्धिम् समधिगच्छति one attains perfection [of liberation].«

कर्मणाम् च सन्न्यासः 'Renunciation of activities' means तेषु अनासक्ति-मात्रम् just being unattached to them नतु स्व-रूपेण and not by themselves (actually giving them up) अ-शक्यत्वात् because that is not possible ...

||3.5||

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥
न हि कश्चिद् क्षणम् अपि जातु तिष्ठति अ-कर्म-कृत् कार्यते हि अ-वशः कर्म सर्वः प्रकृति-जैः गुणैः

न कर्म करोति यः सः अ-कर्म-कृत् _who does no work. प्रकृत्याः जायते यः सः प्रकृति-जः _which is born from nature.

न हि कश्चिद् क्षणम् अपि »Not anybody [whether wise or not], even for a moment जातु अ-कर्म-कृत् तिष्ठति can at any time remain inactive, प्रकृति-जैः गुणैः [because] by the modes born of [one's] nature सर्वः अ-वशः कर्म कार्यते हि everyone is helplessly made to work.«

अतः अ-ज्ञम् कर्म-त्यागिनम् निन्दति Therefore He critizises the ignorant renouncer of action ...

||3.6||

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥
कर्म-इन्द्रियाणि संयम्य यः आस्ते मनसा स्मरन् इन्द्रिय-अर्थान् विमूढ-आत्मा मिथ्या-आचारः सः उच्यते

कर्मणाम् इन्द्रियम् इति कर्म-इन्द्रियम् _'a sense of activities', working sense. मिथ्या आचारः यस्य सः मिथ्या-आचारः _'whose behavior is false', a hypocrite.

कर्म-इन्द्रियाणि संयम्य »[After] restraining the working senses (larynx, hands, feet, genital and anus) (under the pretext of meditating on the Lord) यः इन्द्रिय-अर्थान् मनसा स्मरन् आस्ते one who

continues remembering sense objects with the mind विमूढ-आत्मा a bewildered mind, सः मिथ्या-आचारः उच्यते he is called a pretender.«

**||3.7||**

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन । कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥

यः तु इन्द्रियाणि मनसा नियम्य आरभते अर्जुन कर्म-इन्द्रियैः कर्म-योगम् अ-सक्तः सः विशिष्यते

अर्जुन »O Arjuna! इन्द्रियाणि मनसा नियम्य [After] controlling the senses by the mind यः तु कर्म-इन्द्रियैः one who with the working senses अ-सक्तः कर्म-योगम् आरभते unattached he begins Karma-yoga (by directing his work towards the Lord), सः विशिष्यते he is different.«

चित्त-शुद्ध्या ज्ञानवान् भवति He attains knowledge through the purification of the mind.

**||3.8||**

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः । शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥

नियतम् कुरु कर्म त्वम् कर्म ज्यायः हि अ-कर्मणः शरीर-यात्रा अपि च ते न प्रसिध्येत् अ-कर्मणः

शरीरस्य यात्रा इति शरीर-यात्रा _the maintenance of the body.

त्वम् नियतम् कर्म कुरु »Perform the prescribed duty अ-कर्मणः हि कर्म ज्यायः because work is better than inaction. तव/ते शरीर-यात्रा अपि च Even the maintainance of your body अ-कर्मणः न प्रसिध्येत् would not succeed without work.«

साङ्ख्याः तु सर्वम् अपि कर्म बन्धकत्वात् न कार्यम् इति आहुः But the Sānkhyas say: 'As all action leads to bondage, it should not be performed.' तद् निराकुर्वन् आह Refuting this it is stated ...

**||3.9||**

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥

यज्ञ-अर्थात् कर्मणः अन्यत्र लोकः अयम् कर्म-बन्धनः तद्-अर्थम् कर्म कौन्तेय मुक्त-सङ्गः समाचर

यज्ञस्य अर्थः इति यज्ञ-अर्थः _the purpose of Yajña. मुक्तः सङ्गः येन सः मुक्त-सङ्गः _by whom attachment is given up. तस्य अर्थम् इति तद्-अर्थम् _for the sake of that.

अयम् लोकः कर्म-बन्धनः »This world binds by work, यज्ञ-अर्थात् कर्मणः अन्यत्र except for work done for the purpose of Yajna (sacrifice /the Lord). कौन्तेय मुक्त-सङ्गः [Therefore,] O Arjuna! Free from attachment तद्-अर्थम् कर्म समाचर do your duty for that /His purpose.«

यज्ञः अत्र विष्णुः Yajna here means the Lord. यज्ञः वै विष्णुः इति श्रुतेः For the scripture says, Sacrifice indeed is Vishnu. (तैत्तिरीय-संहिता 1.7.44)

Verse (3.4) objects to the opinion of the Jnānīs that just by Karma-sannyāsa one achieves Moksha, and (3.9) objects to the opinion that 'all kinds of work are binding, and that therefore they should be given up'.

**||3.10||**

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

सह-यज्ञाः प्रजाः सृष्ट्वा पुरा उवाच प्रजा-पतिः अनेन प्रसविष्यध्वम् एषः वः अस्तु इष्ट-काम-धुक्

यज्ञेन सह इति सह-यज्ञः _along with sacrifice. इष्टान् कामान् दोग्धि यः सः इष्ट-काम-धुक् _'which bestows desired objects', a name of the wishfulfilling cow.

सह-यज्ञाः प्रजाः सृष्ट्वा »[After] creating progeny along with sacrifice प्रजा-पतिः पुरा उवाच Brahmā formerly (in the beginning of creation) said: अनेन प्रसविष्यध्वम् 'By this [Yajna] you will multiply एषः युष्माकम्/वः इष्ट-काम-धुक् अस्तु [because] it shall be your bestower of desired objects.'«

कथम् How? ...

**||3.11||**

देवान्भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

देवान् भावयत अनेन ते देवाः भावयन्तु वः परस्परम् भावयन्तः श्रेयः परम् अवाप्स्यथ

अनेन देवान् भावयत »By this [Yajna] you should satisfy the Devas ते देवाः युष्मान्/वः भावयन्तु and those Devas will satisfy you (with food through rain, etc.). परस्परम् भावयन्तः [While thus] satisfying each other परम् श्रेयः अवाप्स्यथ you [all] will attain the supreme benefit.«

**||3.12||**

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥

इष्टान् भोगान् हि वः देवाः दास्यन्ते यज्ञ-भाविताः तैः दत्तान् अ-प्रदाय एभ्यः यः भुङ्क्ते स्तेनः एव सः

यज्ञेन भावितः इति यज्ञ-भावितः _satisfied by sacrifice.

यज्ञ-भाविताः देवाः »The Devas, satisfied by sacrifice इष्टान् भोगान् हि युष्मभ्यम्/वः दास्यन्ते will surely give you the desired objects, एभ्यः अ-प्रदाय [but after] not offering to them [in return] यः तैः दत्तान् भुङ्क्ते one who enjoys things given by them सः स्तेनः एव he is just a thief.«

**||3.13||**

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥

यज्ञ-शिष्ट-आशिनः सन्तः मुच्यन्ते सर्व-किल्बिषैः भुञ्जते ते तु अघम् पापाः ये पचन्ति आत्म-कारणात्

यज्ञस्य शिष्टम् अश्नति यः सः यज्ञ-शिष्ट-आशिनः _who eats remnants of sacrifice. सर्वः किल्बिषः इति सर्व-किल्बिषः _all [kinds of] sin.

यज्ञ-शिष्ट-आशिनः सन्तः »Saints who are eater of food offered in sacrifice सर्व-किल्बिषैः मुच्यन्ते are freed from all sins (like accidentally killing insects in the household activities – with mortar, grinding stone, fire place, water pot or broom). ये पापाः तु आत्म-कारणात् पचन्ति But those sinners who cook for their own sake ते अघम् भुञ्जते they eat sin.«

The Yajna-shishta mentioned here is similar to Prasādam, foodstuff offered to the Lord in the Vaishnava tradition.

**||3.14||**

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः । यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥

अन्नात् भवन्ति भूतानि पर्जन्यात् अन्न-सम्भवः यज्ञात् भवति पर्जन्यः यज्ञः कर्म-समुद्भवः

अन्नस्य सम्भवः इति अन्न-सम्भवः _production of food. कर्मणः समुद्भवः यस्य सः कर्म-समुद्भवः _whose generation is from duty.

अन्नात् भूतानि भवन्ति »All beings are born from food (i.e., its transformations in the form of semen and blood). पर्जन्यात् अन्न-सम्भवः The production of food is from rain यज्ञात् पर्जन्यः भवति rain comes from sacrifice यज्ञः कर्म-समुद्भवः and sacrifice comes from duty.«

**||3.15||**

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥

कर्म ब्रह्म-उद्भवम् विद्धि ब्रह्म अक्षर-समुद्भवम् तस्मात् सर्व-गतम् ब्रह्म नित्यम् यज्ञे प्रतिष्ठितम्

ब्रह्मणः उद्भवः यस्य तद् ब्रह्म-उद्भवः _whose generation is from Brahma. अ-क्षरात् समुद्भवः यस्य तद् अक्षर-समुद्भवः _whose origin is from the imperishable.

कर्म ब्रह्म-उद्भवम् विद्धि »Know that duty comes from the Veda (Brahma) ब्रह्म अक्षर-समुद्भवम् and Veda comes from the Supreme. तस्मात् सर्व-गतम् ब्रह्म Therefore, the all-pervading Absolute नित्यम् यज्ञे प्रतिष्ठितम् always 'rests' in sacrifice.«

ब्रह्म वेदः Brahma [here] means the Veda. ... अस्य महतः भूतस्य निःश्वसितम् [Like] the breath of this Great Being एतद् ऋग्वेदः यजुर्वेदः सामवेदः is this Rig-, Yajur- and Sāma-Veda. (बृहदारण्यक-उपनिषद् 2.4.10) ... यज्ञेन उपाय-भूतेन प्राप्यते As it (Brahma) is attained by means of sacrifice इति यज्ञे प्रतिष्ठितम् उच्यते thus it is said to 'rest in sacrifice'. उद्यम-स्था सदा लक्ष्मीः इतिवत् Just as Lakshmī (prosperity) 'always resides in exertion' (prosperity is attained by exertion).

**||3.16||**

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः । अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥

एवम् प्रवर्तितम् चक्रम् न अनुवर्तयति इह यः अघ-आयुः इन्द्रिय-आरामः मोघम् पार्थ सः जीवति

इन्द्रियेषु आरामः यस्य सः इन्द्रिय-आरामः _whose delight is in the senses.

पार्थ »O Arjuna! एवम् प्रवर्तितम् चक्रम् The cycle thus established यः इह न अनुवर्तयति one who does not carry [it] out in this world अघ-आयुः इन्द्रिय-आरामः his life being sinful, just delighting in the senses सः मोघम् जीवति he lives in vain.«

यस्मात् एवम् परमेश्वरेण एव भूतानाम् पुरुषार्थ-सिद्धये कर्मादि-चक्रम् प्रवर्तितम् Because the cycle of action etc. is thus set in motion by the Lord Himself so that the living beings may realize the goal of life (worship of the Lord) तस्मात् तद् अ-कुर्वतः वृथा एव जीवनम् therefore, the life of one not doing it is in vain.

An oblation offered in the fire goes directly to the sun, which generates rain, and subsequently grain and men. (Manu-Samhitā) The cycle is: work /duty → sacrifice → rain → grain → subsistance → work /duty. This cycle is established, set into motion, by the Absolute or Vishnu via Brahmā through the Veda, which assigns one's duty.

**||3.17||**

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥

यः तु आत्म-रतिः एव स्यात् आत्म-तृप्तः च मानवः आत्मनि एव च सन्तुष्टः तस्य कार्यम् न विद्यते

आत्मनि रतिः यस्य सः आत्म-रतिः _whose delight is in the self. आत्मना तृप्तः इति आत्म-तृप्तः _satisfied with the self.

यः तु मानवः आत्म-रतिः »But that person who has delight in the self आत्म-तृप्तः एव च स्यात् and is [therefore] satisfied with the self alone (with the experience of bliss in himself) आत्मनि एव च सन्तुष्टः and [thus] contented in the self alone (without desire for sense enjoyment), तस्य कार्यम् न विद्यते for him there exists no duty.«

तत्र हेतुम् आह The reason for this is being stated ...

**||3.18||**

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥

न एव तस्य कृतेन अर्थः न अ-कृतेन इह कश्चन न च अस्य सर्व-भूतेषु कश्चिद् अर्थ-व्यपाश्रयः

इह कृतेन »By work in this world तस्य न एव कश्चन अर्थः there is not any gain [of piety] for him, न अ-कृतेन nor by no work [is there any sin for him]. अस्य च सर्व-भूतेषु And for him among all beings (even among Devas) न कश्चिद् अर्थ-व्यपाश्रयः not anyone is [needed as] shelter for any purpose.«

एवम-भूतस्य ज्ञानिनः एव Only for such a realized man कर्म-अनुपयोगः action is not prescribed न अन्यस्य not for any other. तस्मात् त्वम् कर्म कुरु Therefore you (Arjuna) must do your duty ...

**||3.19||**

तस्मादसक्तः सततं कार्यं कर्म समाचर। असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥

तस्मात् अ-सक्तः सततम् कार्यम् कर्म समाचर असक्तः हि आचरन् कर्म परम् आप्नोति पूरुषः

तस्मात् अ-सक्तः »Therefore, unattached सततम् कार्यम् कर्म समाचर always perform prescribed work. अ-सक्तः हि कर्म आचरन् [While] performing work unattached पूरुषः परम् आप्नोति a person attains the Supreme.«

**||3.20||**

कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥

कर्मणा एव हि संसिद्धिम् आस्थिताः जनक-आदयः लोक-सङ्ग्रहम् एव अपि सम्पश्यन् कर्तुम् अर्हसि

लोकानाम् सङ्ग्रहः इति लोक-सङ्ग्रहः _the welfare of the people.

कर्मणा एव हि »Just by [performing their] duty (being purified in mind) जनक-आदयः संसिद्धिम् आस्थिताः [kings] like Janaka have attained perfection. लोक-सङ्ग्रहम् एव अपि सम्पश्यन् [While just] considering the welfare of the people कर्तुम् अर्हसि you should work.«

यद्यपि त्वम् सम्यक्-ज्ञानिनम् एव आत्मानम् मन्यसे Even if you should consider yourself of perfect realization तथापि कर्म आचरणम् भद्रम् एव still the performance of work is good.

Arjuna must set a good example, otherwise others might also give up their regulated duty and fall down, being not yet purified from material desires.

कर्म-करणे लोक-सङ्ग्रहः यथा स्यात् How there is welfare of the people in doing one’s duty तथा आह that is stated ...

||3.21||

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

यद् यद् आचरति श्रेष्ठः तद् तद् एव इतरः जनः सः यद् प्रमाणम् कुरुते लोकः तद् अनुवर्तते

यद् यद् श्रेष्ठः आचरति »Whatever the leader does तद् तद् एव इतरः जनः that same thing [does] another man. यद् प्रमाणम् सः कुरुते The standard which he sets तद् लोकः अनुवर्तते that the world follows.«

कर्म-शास्त्रम् निवृत्ति-शास्त्रम् वा Either scripture promoting action or scripture promoting renunciation यद् प्रमाणम् मन्यते whatever authority he accepts (knows).

||3.22||

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥

न मे पार्थ अस्ति कर्तव्यम् त्रिषु लोकेषु किञ्चन न अनवाप्तम् अवाप्तव्यम् वर्ते एव च कर्मणि

पार्थ त्रिषु लोकेषु »O Arjuna! in the three worlds मम/मे किञ्चन कर्तव्यम् न अस्ति there is not my any duty न अनवाप्तम् अवाप्तव्यम् nor [anything] unobtained to be obtained, कर्मणि वर्ते एव च [still] I am also engaged in work.«

||3.23||

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

यदि हि अहम् न वर्तेयम् जातु कर्मणि अ-तन्द्रितः मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः

पार्थ यदि जातु »O Arjuna! if ever अहम् अ-तन्द्रितः हि कर्मणि न वर्तेयम् I would not carefully engage in work मनुष्याः [then] people मम वर्त्म सर्वशः अनुवर्तन्ते would follow my path in all respect.«

||3.24||

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥

उत्सीदेयुः इमे लोकाः न कुर्याम् कर्म चेद् अहम् सङ्करस्य च कर्ता स्याम् उपहन्याम् इमाः प्रजाः

अहम् कर्म न कुर्याम् चेद् »If I would not perform work इमे लोकाः उत्सीदेयुः these worlds would be ruined. सङ्करस्य च कर्ता स्याम् I would be the cause of confusion [of Varna] इमाः प्रजाः उपहन्याम् and I would [thus] harm these people.«

||3.25||

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥

सक्ताः कर्मणि अ-विद्वांसः यथा कुर्वन्ति भारत कुर्यात् विद्वान् तथा अ-सक्तः चिकीर्षुः लोक-सङ्ग्रहम्

भारत »O Arjuna! कर्मणि सक्ताः अ-विद्वांसः The ignorant who are attached in work यथा कुर्वन्ति just as they work, अ-सक्तः विद्वान् the unattached wise लोक-सङ्ग्रहम् चिकीर्षुः desiring to do the welfare of all तथा कुर्यात् should similarly work.«

ननु But: कृपया तत्त्व-ज्ञानम् एव उपदेष्टुम् युक्तम् Should not knowledge of the Absolute be instructed out of pity? न No! इति आह This is being stated ...

**||3.26||**

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

न बुद्धि-भेदम् जनयेत् अ-ज्ञानाम् कर्म-सङ्गिनाम् जोषयेत् सर्व-कर्माणि विद्वान् युक्तः समाचरन्

अ-ज्ञानाम् कर्म-सङ्गिनाम् »Of ignorant men attached to work विद्वान् बुद्धि-भेदम् न जनयेत् the wise should not create doubt ('disturbance of intelligence'), सर्व-कर्माणि युक्तः समाचरन् [but by] attentively performing all duties [himself] जोषयेत् he should engage [them in work].«

कर्मणः सकाशात् बुद्धि-चालनम् न कुर्यात् He should not turn their mind away from work. ननु But: विदुषा अपि चेद् कर्म कर्तव्यम् If by the wise also work is to be performed तर्हि विद्वद्-अ-विदुषोः कः विशेषः then what is the difference between the wise and the ignorant? ...

**||3.27||**

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहङ्कार-विमूढ-आत्मा कर्ता अहम् इति मन्यते

अहङ्कारेण विमूढः आत्मा यस्य सः अहङ्कार-विमूढ-आत्मा _whose mind is deluded by false ego.

प्रकृतेः गुणैः »By the senses of material nature (Prakriti) कर्माणि सर्वशः क्रियमाणानि all activities are completely being done, अहङ्कार-विमूढ-आत्मा [but] one who is bewildered by false ego अहम् कर्ता इति मन्यते he thinks, 'I am the doer '.«

प्रकृतेः गुणैः 'By the modes of nature' (Prakriti) means प्रकृति-कार्यैः इन्द्रियैः by the senses produced by nature. ... अहङ्कारेण 'By false ego' means इन्द्रियादिषु आत्म-अध्यासेन by the superimposition of the self on the senses, etc.

**||3.28||**

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥

तत्त्व-विद् तु महा-बाहो गुण-कर्म-विभागयोः गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते

तत्त्वम् वेत्ति यः सः तत्त्व-विद् _who knows the truth.

महा-बाहो »O Arjuna! गुण-कर्म-विभागयोः तत्त्व-विद् तु But one who knows the differentiations [of the soul] from the senses and activities, गुणाः गुणेषु वर्तन्ते इति मत्वा [after] understanding that '[only] the senses are engaged with their objects' न सज्जते he does not attach.«

कर्तृत्व-अभिनिवेशम् न करोति He does not attach to the idea of doership.

**||3.29||**

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु । तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥

प्रकृतेः गुण-सम्मूढाः सज्जन्ते गुण-कर्मसु तान् अकृत्स्न-विदः मन्दान् कृत्स्न-विद् न विचालयेत्

गुणैः सम्मूढः इति गुण-सम्मूढः _bewildered by the Gunas. गुणानाम् कर्म इति गुण-कर्म _activity of the Gunas. कृत्स्नम् वेत्ति यः सः कृत्स्न-विद् _who knows everything.

प्रकृतेः गुण-सम्मूढाः »Those who are bewildered by the modes of nature गुण-कर्मसु सज्जन्ते attach themselves to sense activities. तान् अकृत्स्न-विदः मन्दान् Those ignorant fools कृत्स्न-विद् न विचालयेत् the wise should not unsettle [by stopping their work].«

तद् एवम् तत्त्व-विदा अपि Therefore even by the knowers of the Absolute कर्म कर्तव्यम् work should be performed.

**||3.30||**

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥

मयि सर्वाणि कर्माणि सन्न्यस्य अध्यात्म-चेतसा निराशीः निर्ममः भूत्वा युध्यस्व विगत-ज्वरः

अध्यात्म-चेतसा »With transcendental consciousness सर्वाणि कर्माणि मयि सन्न्यस्य [after] giving up all activities to me निराशीः निर्ममः भूत्वा being free from desire and proprietorship विगत-ज्वरः युध्यस्व fight without grief.«

अन्तर्यामि-अधीनः अहम् करोमि 'I am acting under the guidance of the Supersoul' इति दृष्ट्या with that vision.

**||3.31||**

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥

ये मे मतम् इदम् नित्यम् अनुतिष्ठन्ति मानवाः श्रद्धावन्तः अनसूयन्तः मुच्यन्ते ते अपि कर्मभिः

ये श्रद्धावन्तः अनसूयन्तः मानवाः »Those men who are faithful and unenvious इदम् मम/मे मतम् नित्यम् अनुतिष्ठन्ति and always follow this opinion of Mine [and do their duty], ते अपि कर्मभिः मुच्यन्ते they are also (like those in knowledge) freed from all Karma.«

अनसूयन्तः Being 'unenvious' means दुःखात्मके कर्मणि प्रवर्तयति 'He engages me in painful work' इति दोष-दृष्टिम् अ-कुर्वन्तः without finding such fault.

**||3.32||**

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥

ये तु एतद् अभ्यसूयन्तः न अनुतिष्ठन्ति मे मतम् सर्व-ज्ञान-विमूढान् तान् विद्धि नष्टान् अ-चेतसः

सर्वस्मिन् ज्ञाने विमूढः इति सर्व-ज्ञान-विमूढः _bewildered in all knowledge.

ये तु अभ्यसूयन्तः »But those who are envious एतद् मम/मे मतम् न अनुतिष्ठन्ति and do not follow this teaching of Mine [thinking that, 'Why He is engaging me in painful work?'], तान् अ-चेतसः सर्व-ज्ञान-विमूढान् those fools, bereft of all knowledge नष्टान् विद्धि know to be doomed.«

ननु But: तर्हि महा-फलत्वात् Then, as it has such great results इन्द्रियाणि निगृह्य निष्कामाः सन्तः controlling the senses and being without desire सर्वे अपि स्व-धर्मम् एव किम् न अनुतिष्ठन्ति why do not all follow their duty? ...

**||3.33||**

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥

सदृशम् चेष्टते स्वस्याः प्रकृतेः ज्ञानवान् अपि प्रकृतिम् यान्ति भूतानि निग्रहः किम् करिष्यति

ज्ञानवान् अपि »Even a man of knowledge (aware of good and bad) स्वस्याः प्रकृतेः सदृशम् चेष्टते acts according to his own disposition. भूतानि प्रकृतिम् यान्ति [All] beings follow [their] nature, निग्रहः किम् करिष्यति what can repression do?«

प्रकृतिः प्राचीन-कर्म-संस्कार-अधीन-स्वभावः Disposition is one's own nature dominated by the impressions of past actions. ननु But: एवम् प्रकृति-अधीना एव चेद् पुरुषस्य प्रवृत्तिः If a man's inclination is thus dependent on nature alone तर्हि विधि-निषेध-वैयर्थ्यम् प्राप्तम् then rules and prohibitions are useless? ...

**||3.34||**

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥

इन्द्रियस्य इन्द्रियस्य अर्थे राग-द्वेषौ व्यवस्थितौ तयोः न वशम् आगच्छेत् तौ हि अस्य परिपन्थिनौ

इन्द्रियस्य इन्द्रियस्य अर्थे »Of each sense towards its object राग-द्वेषौ व्यवस्थितौ attachment and aversion are fixed, तयोः वशम् न आगच्छेत् [but] one should not come under the control of these two तौ हि अस्य परिपन्थिनौ because these two are his obstacles.«

शास्त्रम् तु ततः प्राक् एव विषयेषु राग-द्वेष-प्रतिबन्धके परमेश्वर-भजनादौ प्रवर्तयति Scripture engages one beforehand in worship of the Lord etc., which helps to resist the attraction and aversion for objects गम्भीर-स्रोतः-पातात् पूर्वम् एव नावम् आश्रितः इव like one who resorts to a boat before falling into a deep current न अनर्थम् प्राप्नोति and then he does not come to harm.

There should be instructions *before* entering the ocean of sense gratification, especially in modern times.

तद् एवम् स्वाभाविकीम् पशु-आदि-सदृशीम् प्रवृत्तिम् त्यक्त्वा Thus giving up one's normal nature which is like to that of animals etc. स्व-धर्मे प्रवर्तितव्यम् one should engage in one's duty इति उक्तम् this has been said. तर्हि Therefore स्व-धर्मस्य/युद्ध-आदेः दुःख-रूपस्य यथावत् कर्तुम् अ-शक्यत्वात् because one's duty, harmful like war, is difficult to perform पर-धर्मस्य च/अहिंसा-आदेः सुकरत्वात् and because another's duty, such as non-violence, is easy to perform धर्मत्व-अविशेषत्वात् च and because both are equally duties तत्र प्रवर्तितुम् इच्छन्तम् प्रति आह to one who thus wants to change [his duty] He says ...

**||3.35||**

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

श्रेयान् स्व-धर्मः विगुणः पर-धर्मात् स्वनुष्ठितात् स्व-धर्मे निधनम् श्रेयः पर-धर्मः भय-आवहः

परस्य धर्मः इति पर-धर्मः _the duty of another.

स्वनुष्ठितात् पर-धर्मात् »Than another's duty, [even] well performed विगुणः स्व-धर्मः श्रेयान् one's own duty is better, [even if] defective. स्व-धर्मे निधनम् श्रेयः [Even] death in one's own duty is better, पर-धर्मः भय-आवहः another's duty brings danger.«

**||3.36||**

अथ केन प्रयुक्तो ऽयं पापं चरति पूरुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

अथ केन प्रयुक्तः अयम् पापम् चरति पूरुषः अनिच्छन् अपि वार्ष्णेय बलात् इव नियोजितः

वार्ष्णेय »O Krishna! अन्-इच्छन् अपि Even unwillingly बलात् इव नियोजितः as if engaged by force अथ केन प्रयुक्तः then by what impelled अयम् पूरुषः पापम् चरति does a person commit sin?«

||3.37||

काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
कामः एषः क्रोधः एषः रजः-गुण-समुद्भवः महा-अशनः महा-पाप्मा विद्धि एनम् इह वैरिणम्

रजः-गुणात् समुद्भवः यस्य सः रजः-गुण-समुद्भवः _whose generation is from Rajas. महत् अशनम् यस्य सः महा-अशनः _whose consumption is great.

एषः कामः एषः क्रोधः »This [cause] is desire, this is anger रजः-गुण-समुद्भवः born of the mode of passion महा-अशनः महा-पाप्मा voracious and most sinful, इह एनम् वैरिणम् विद्धि know this to be the enemy [to liberation] in this world.«

अयम् च वक्ष्यमाण-क्रमेण हन्तव्य एव It has indeed to be killed by the method to be described यतः न असौ दानेन सन्धातुम् शक्यः because it can not be appeased by gifts इति आह महा-अशनः so it is being described as of great appetite. नच साम्ना सन्धातुम् शक्यः Nor can it be appeased by conciliation यतः महा-पाप्मा because it is most sinful.

Anger is frustrated desire. When desire is conquered, anger is conquered. Therefore they are mentioned here as one. And when their source, passion (Rajas), is conquered by an increase of goodness (Sattva), desire is conquered. Among the four political means to deal with enemies – conciliation, gift, dissension and punishment – two are dismissed here.

||3.38||

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च । यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥
धूमेन आव्रियते वह्निः यथा आदर्शः मलेन च यथा उल्बेन आवृतः गर्भः तथा तेन इदम् आवृतम्

यथा वह्निः धूमेन आव्रियते »As fire is covered by smoke आदर्शः मलेन च and a mirror by dust यथा गर्भः उल्बेन आवृतः and as an embryo is covered by the womb, तथा इदम् तेन आवृतम् so this [knowledge] is covered by that [desire].«

प्रकार-त्रयेण अपि In all three ways तेन कामेन आवृतम् इदम् this is covered by that desire. इदम्-शब्द-निर्दिष्टम् दर्शयन् Showing what is indicated by the word ‘this’ [in the last verse] वैरित्वम् स्फुटयति the enmity [of desire] is explained ...

||3.39||

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥
आवृतम् ज्ञानम् एतेन ज्ञानिनः नित्य-वैरिणा काम-रूपेण कौन्तेय दुष्पूरेण अनलेन च

कामः रूपम् यस्य सः काम-रूपः _whose form is desire.

कौन्तेय »O Arjuna! काम-रूपेण दुष्पूरेण अनलेन च With the form of desire, which is [like] an insatiable fire एतेन ज्ञानिनः नित्य-वैरिणा by this eternal enemy of the wise ज्ञानम् आवृतम् knowledge is covered.«

शोक-सन्ताप-हेतुत्वात् Because it leads to sorrow and misery अनल-तुल्यः it is like fire. ... अ-ज्ञस्य खलु For the ignorant, of course भोग-समये कामः सुख-हेतुः एव desire is the cause of pleasure at the time of enjoyment परिणामे तु वैरिताम् प्रपद्यते but in consequence there is enmity. इदानीम्

Now तस्य अधिष्ठानम् कथयन् by declaring its seat जय-उपायम् आह the means to conquer it is stated ...

||3.40||

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥

इन्द्रियाणि मनः बुद्धिः अस्य अधिष्ठानम् उच्यते एतैः विमोहयति एषः ज्ञानम् आवृत्य देहिनम्

इन्द्रियाणि मनः बुद्धिः »The senses, mind and intelligence अस्य अधिष्ठानम् उच्यते are said to be its (lust's) seat. ज्ञानम् एतैः आवृत्य [After] covering knowledge through these एषः देहिनम् विमोहयति it bewilders the embodied soul.«

विषय-दर्शन-श्रवणादिभिः Because through seeing, hearing, etc. of sense objects सङ्कल्पेन through thinking of them अध्यवसायेन च and through determination कामस्य आविर्भावात् desire arises.

||3.41||

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ । पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

तस्मात् त्वम् इन्द्रियाणि आदौ नियम्य भरत-ऋषभ पाप्मानम् प्रजहि हि एनम् ज्ञान-विज्ञान-नाशनम्

भरतानाम् ऋषभः इति भरत-ऋषभः _best ('bull') of the Bharatas. ज्ञानस्य च विज्ञानस्य च नाशनम् येन सः ज्ञान-विज्ञान-नाशनः _by which there is destruction of Jnāna and Vijnāna.

तस्मात् भरत-ऋषभ »Therefore, O Arjuna! आदौ हि इन्द्रियाणि नियम्य [After] restraining the senses in the very beginning, एनम् ज्ञान-विज्ञान-नाशनम् पाप्मानम् this evil, destroyer of knowledge and realization (i.e., desire) त्वम् प्रजहि you must slay.«

आदौ 'In the beginning' means विमोहात् पूर्वम् before delusion. ज्ञानम् शास्त्र-आचार्य-उपदेश-जम् Jnāna results from the teachings of scripture (Shāstra) and preceptor (Ācārya) विज्ञानम् निदिध्यासन-जम् Vijnāna results from meditation. [In 6.8 Shrīdhara Svāmī defines it as follows:] ज्ञानम् औपदेशिकम् Jnāna comes from instruction विज्ञानम् अपरोक्ष-अनुभवः Vijnāna is intuitive realization.

||3.42||

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥

इन्द्रियाणि पराणि आहुः इन्द्रियेभ्यः परम् मनः मनसः तु परा बुद्धिः यः बुद्धेः परतः तु सः

इन्द्रियाणि पराणि आहुः »The senses are said to be superior [to objects] (because they are subtle and reveal the objects) मनः इन्द्रियेभ्यः परम् the mind is superior to the senses (because it directs them) बुद्धिः तु मनसः परा and the intelligence is superior to the mind, यः तु बुद्धेः परतः सः and that which is superior to intelligence, is he (the soul).«

तद्-साक्षित्वेन अवस्थितः Which resides as the witness of all this सर्व-अन्तरः and the innermost सः आत्मा that is the soul.

||3.43||

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना । जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥

एवम् बुद्धेः परम् बुद्ध्वा संस्तभ्य आत्मानम् आत्मना जहि शत्रुम् महा-बाहो काम-रूपम् दुरासदम्

महा-बाहो »O Arjuna! एवम् बुद्धेः परम् बुद्ध्वा [After] thus knowing [the soul] to be superior to intelligence आत्मना आत्मानम् संस्तभ्य and [after] steadying the mind by the intelligence, दुरासदम् काम-रूपम् शत्रुम् the enemy in the form of desire, so difficult to conquer जहि you must slay.«

**||4.1||**

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥
इमम् विवस्वते योगम् प्रोक्तवान् अहम् अ-व्ययम् विवस्वान् मनवे प्राह मनुः इक्ष्वाकवे अब्रवीत्

इमम् अ-व्ययम् योगम् »This imperishable [Karma-]Yoga अहम् विवस्वते प्रोक्तवान् I instructed to Vivasvān, विवस्वान् मनवे प्राह Vivasvān instructed [his son] Vaivasvata Manu, मनुः इक्ष्वाकवे अब्रवीत् and Vaivasvata Manu spoke to [his son] Ikshvāku.«

Vivasvān was the eighth son of Aditi. The son of Vivasvān, Shrāddhadeva, became the seventh (the present) Vaivasvata Manu. His son was Ikshvāku, founder of the solar dynasty of the kings of Ayodhyā, whose son was Nimi.

**||4.2||**

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः । स कालेनेह महता योगो नष्टः परन्तप ॥
एवम् परम्परा-प्राप्तम् इमम् राज-ऋषयः विदुः सः कालेन इह महता योगः नष्टः परन्तप

परम्परया प्राप्तः इति परम्परा-प्राप्तः _received by Paramparā.

एवम् परम्परा-प्राप्तम् »Thus received by disciplic succession इमम् राज-ऋषयः विदुः saintly kings (like Nimi) know this [Karma-yoga]. परन्तप महता कालेन O Arjuna! by great time सः योगः इह नष्टः that [Karma-]Yoga is distinct in this world.«

**||4.3||**

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः । भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥
सः एव अयम् मया ते अद्य योगः प्रोक्तः पुरातनः भक्तः असि मे सखा च इति रहस्यम् हि एतद् उत्तमम्

सः एव अयम् पुरातनः योगः »That same ancient Yoga अद्य तुभ्यम्/ते मया प्रोक्तः is today instructed by me to you [alone] मम/मे भक्तः सखा च असि इति who are my devotee and friend, एतद् हि उत्तमम् रहस्यम् [because] it is a supreme secret.«

**||4.4||**

अपरं भवतो जन्म परं जन्म विवस्वतः । कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥
अपरम् भवतः जन्म परम् जन्म विवस्वतः कथम् एतद् विजानीयाम् त्वम् आदौ प्रोक्तवान् इति

भवतः जन्म अपरम् »Your birth is later विवस्वतः जन्म परम् and Vivasvān's birth is earlier त्वम् आदौ प्रोक्तवान् इति that in the beginning you instructed [him] एतद् कथम् विजानीयाम् how can I understand this

**||4.5||**

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन । तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥
बहूनि मे व्यतीतानि जन्मानि तव च अर्जुन तानि अहम् वेद सर्वाणि न त्वम् वेत्थ परन्तप

अर्जुन »O Arjuna! मम/मे तव च Of me and you बहूनि जन्मानि व्यतीतानि many births have passed. परन्तप O Arjuna! अहम् तानि सर्वाणि वेद I know them all त्वम् न वेत्थ [but] you do not know.

**||4.6||**

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥

अ-जः अपि सन् अव्यय-आत्मा भूतानाम् ईश्वरः अपि सन् प्रकृतिम् स्वाम् अधिष्ठाय सम्भवामि आत्म-मायया

अ-जः अपि सन् अव्यय-आत्मा »Though being unborn and of imperishable nature भूतानाम् ईश्वरः अपि सन् and though being the Lord of [all] beings, स्वाम् प्रकृतिम् अधिष्ठाय [after] presiding over my material energy आत्म-मायया सम्भवामि I manifest (descend) [myself] by my energy (Māyā).«

**||4.7||**

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

यदा यदा हि धर्मस्य ग्लानिः भवति भारत अभ्युत्थानम् अ-धर्मस्य तदा आत्मानम् सृजामि अहम्

भारत »O Arjuna! यदा यदा हि धर्मस्य ग्लानिः भवति Whenever there is a decline of righteousness अ-धर्मस्य अभ्युत्थानम् and a rise of unrighteousness, तदा अहम् आत्मानम् सृजामि at that time I manifest myself.«

**||4.8||**

परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

परित्राणाय साधूनाम् विनाशाय च दुष्कृताम् धर्म-संस्थापन-अर्थाय सम्भवामि युगे युगे

धर्मस्य संस्थापनस्य अर्थः इति धर्म-संस्थापन-अर्थः _the purpose of the establishment of Dharma.

साधूनाम् परित्राणाय »For the protection of the pious दुष्कृताम् विनाशाय for the destruction of the evil-doers धर्म-संस्थापन-अर्थाय च and [thus] for the sake establishment of righteousness युगे युगे सम्भवामि I manifest (descend) in every millenium.«

**||4.9||**

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥

जन्म कर्म च मे दिव्यम् एवम् यः वेत्ति तत्त्वतः त्यक्त्वा देहम् पुनः जन्म न एति माम् एति सः अर्जुन

अर्जुन »O Arjuna! मम/मे जन्म कर्म च दिव्यम् My birth and activity is divine. यः एवम् तत्त्वतः वेत्ति One who thus knows it truly, देहम् त्यक्त्वा [after] leaving the body (after giving up attachment for the body) सः पुनः जन्म न एति he does not take birth again, माम् एति [but] attains me.«

मे जन्म My birth स्व-इच्छा-कृतम् is by My free will कर्म च धर्म-पालन-रूपम् and My work consists of the protection of righteousness (Dharma). तत्त्वतः 'Truly' means पर-अनुग्रह-अर्थम् एव that it is just for the good of others. कथम् जन्म-कर्म-ज्ञानेन त्वद्-प्राप्तिः स्यात् How can one attain You [just] by knowledge of Your birth and activities? ...

**||4.10||**

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः। बहवो ज्ञानतपसा पूता मद्भावमागताः॥

वीत-राग-भय-क्रोधाः मन्मयाः माम् उपाश्रिताः बहवः ज्ञान-तपसा पूताः मद्-भावम् आगताः

ज्ञानम् च तपः च इति ज्ञान-तपः _knowledge and renunciation (in Samāhāra), or ज्ञानम् एव तपः इति ज्ञान-तपः the austerity of knowledge.

वीत-राग-भय-क्रोधाः »Freed from attachment, fear and anger मन्मयाः माम् उपाश्रिताः absorbed in me and taking shelter of me (understanding My supreme compassion, that I descend for their benefit) ज्ञान-तपसा पूताः purified by knowledge and renunciation बहवः मद्-भावम् आगताः many [already] attained my [transcendental] nature.«

नतु अधुना एव प्रवृत्तः अयम् मद्-भक्ति-मार्गः It is not that this path of Bhakti is made newly. इति अर्थः This is the idea. ननु But: तर्हि किम् त्वयि अपि वैषम्यम् अस्ति Then there is partiality in You too? यस्मात् एवम् त्वद्-एक-शरणानाम् एव आत्म-भावम् ददासि Because thus You give Your nature only to those who take exclusive shelter in You न अन्येषाम् स-कामानाम् and not to others who have desires. [In 4.11-14 the Lord's partiality is refuted:] ...

**||4.11||**

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

ये यथा माम् प्रपद्यन्ते तान् तथा एव भजामि अहम् मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः

ये यथा माम् प्रपद्यन्ते »As those who surrender to me (with or without desires), तथा एव अहम् तान् भजामि so I reward them. पार्थ O Arjuna! मनुष्याः मम वर्त्म सर्वशः अनुवर्तन्ते [Because all] men follow my path in all respects.«

नतु ये स-कामाः माम् विहाय इन्द्र-आदीन् एव भजन्ते तान् अहम् उपेक्षे इति मन्तव्यम् Do not think that I ignore those who, ignoring Me, worship only Indra a.o. ... इन्द्र-आदि-रूपेण अपि मम एव सेव्यत्वात् Because even in the form of Indra a.o. I alone am worshiped.

Either one worships the Supreme directly, without motivation (nishkāma), or else through Devas for material gain (sa-kāma) – everyone worships the Lord alone (follows His 'path of worship'), because all these forms also come from Him.

तर्हि मोक्ष-अर्थम् एव किम् इति सर्वे त्वाम् न भजन्ति Then why don't worship You all for attaining liberation alone? ...

**||4.12||**

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥

काङ्क्षन्तः कर्मणाम् सिद्धिम् यजन्ते इह देवताः क्षिप्रम् हि मानुषे लोके सिद्धिः भवति कर्मजा

कर्मणाम् सिद्धिम् काङ्क्षन्तः »Those desiring the success of activities, मानुषे लोके in the human world इह देवताः यजन्ते [generally] they worship the Devas in this world, कर्म-जा सिद्धिः क्षिप्रम् हि भवति because the success of [such] rituals comes quickly.«

नतु ज्ञान-फलम् कैवल्यम् And not liberation, the fruit of knowledge दुष्प्राप्यत्वात् ज्ञानस्य as knowledge is hard to attain.

**||4.13||**

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥

चातुर्वर्ण्यम् मया सृष्टम् गुण-कर्म-विभागशः तस्य कर्तारम् अपि माम् विद्धि अ-कर्तारम् अ-व्ययम्

गुणानाम् च कर्मणाम् च विभागशः इति गुण-कर्म-विभागशः _according to the divisions of Guna and Karma.

गुण-कर्म-विभागशः »According to the divisions of Guna and Karma चातुर्वर्ण्यम् मया सृष्टम् the system of four Varnas was created by me. तस्य कर्तारम् अपि Although [I am] its creator माम् अ-व्ययम् अ-कर्तारम् विद्धि know me as the unchangeable non-doer.«

The three Gunas are Sattva, Rajas and Tamas. The predominance of a certain Guna or mixture determines the quality of one's work. The idea is that a person's profession (Varna) is determined by his qualities, and not by mere birth. Jāti (rank) can help of course, to perfect a certain quality.

**||4.14||**

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा। इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥

न माम् कर्माणि लिम्पन्ति न मे कर्म-फले स्पृहा इति माम् यः अभिजानाति कर्मभिः न सः बध्यते

कर्मणः फलम् इति कर्म-फलम् _the fruit of activity.

कर्माणि माम् न लिम्पन्ति »Activities do not stain me, कर्म-फले मम/मे न स्पृहा there is not my desire for the fruit of activity – इति यः माम् अभिजानाति [even] one who understands me thus, सः कर्मभिः न बध्यते he is [also] not bound by activities.«

**||4.15||**

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः। कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्॥

एवम् ज्ञात्वा कृतम् कर्म पूर्वैः अपि मुमुक्षुभिः कुरु कर्म एव तस्मात् त्वम् पूर्वैः पूर्वतरम् कृतम्

एवम् ज्ञात्वा »[After] thus knowing (that work done without egotism does no bind) पूर्वैः मुमुक्षुभिः अपि even by previous seekers for liberation [like Janaka] कर्म कृतम् work was done [for purification]. तस्मात् Therefore पूर्वैः पूर्वतरम् कृतम् as done by the ancestors before त्वम् कर्म एव कुरु you should perform work.«

तद् च And that तत्त्व-विद्भिः सह विचार्य कर्तव्यम् should be done after discussing with the knowers of Truth न लोक-परम्परा-मात्रेण and not merely according to the popular view ...

**||4.16||**

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः। तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥

किम् कर्म किम् अ-कर्म इति कवयः अपि अत्र मोहिताः तद् ते कर्म प्रवक्ष्यामि यद् ज्ञात्वा मोक्ष्यसे अ-शुभात्

किम् कर्म किम् अ-कर्म इति »'What is Karma' and 'what is A-karma' अत्र कवयः अपि मोहिताः in this even the wise are bewildered. यद् ज्ञात्वा [After] knowing which अ-शुभात् मोक्ष्यसे you will be freed from the misfortune [of Samsāra], तद् कर्म तुभ्यम्/ते प्रवक्ष्यामि that Karma I will explain to you.«

ननु But: लोक-प्रसिद्धम् एव Is it not well known कर्म देहादि-व्यापार-आत्मकम् that Karma means the activity with body, etc. अ-कर्म च तद्-अ-व्यापार-आत्मकम् and that A-karma means non-ativity with those? अतः कथम् उच्यते Then why is it said [by You] कवयः अपि अत्र मोहम् प्राप्ताः that even the wise are deluded in this matter? इति तत्र आह This is then stated ...

**||4.17||**

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः । अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥

कर्मणः हि अपि बोद्धव्यम् बोद्धव्यम् च विकर्मणः अ-कर्मणः च बोद्धव्यम् गहना कर्मणः गतिः

The implied word gati (way) is taken as the missing subject. But boddhavyam can also be taken as bhāve prayoga – 'the act of understanding should be done', and then there is no need of a subject.

कर्मणः [गति] हि अपि बोद्धव्यम् »[The way] of [prescribed] activity should be understood, विकर्मणः च बोद्धव्यम् [the way] of forbidden activity (Vikarman) should be understood, अ-कर्मणः च बोद्धव्यम् [and the way] of [true] inactivity (A-karman) should be understood. कर्मणः गतिः गहना The way of Karma is deep (hard to understand).

**||4.18||**

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥

कर्मणि अ-कर्म यः पश्येत् अ-कर्मणि च कर्म यः सः बुद्धिमान् मनुष्येषु सः युक्तः कृत्स्न-कर्म-कृत्

कृत्स्नम् कर्म करोति यः सः कृत्स्न-कर्म-कृत् _who does all work.

यः कर्मणि अ-कर्म पश्येत् »One who can see [true] A-karma in activity यः अ-कर्मणि कर्म च and who [can see] Karma in inactivity, सः मनुष्येषु बुद्धिमान् he is intelligent among men. सः कृत्स्न-कर्म-कृत् युक्तः He is a Yogī [though] doing all work.«

परमेश्वर-आराधन-लक्षणे कर्मणि विषये In activity done as worship of the Lord अ-कर्म [seeing] [true] inactivity (A-karma). तस्य ज्ञान-हेतुत्वेन बन्धकत्व-अभावात् Because it is free from bondage since it leads to knowledge (Jnāna). ... अ-कर्मणि च विहित-अ-करणे In inaction, in the non-performance of what is prescribed कर्म [seeing] Karma. तस्य प्रत्यवाय-आपादकत्वेन बन्ध-हेतुत्वात् Because it causes bondage since it results in sin ('the reverse'). तद् एव स्पष्टयति That is being clarified [in verses 4.19-23] ...

**||4.19||**

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥

यस्य सर्वे समारम्भाः काम-सङ्कल्प-वर्जिताः ज्ञान-अग्नि-दग्ध-कर्माणम् तम् आहुः पण्डितम् बुधाः

कामस्य सङ्कल्पेन वर्जितः यः सः काम-सङ्कल्प-वर्जितः _who is free from the desire for sense gratification. ज्ञानस्य अग्निना दग्धानि कर्माणि यस्य सः ज्ञान-अग्नि-दग्ध-कर्मा _whose Karmas are burned by the fire of knowlege.

यस्य सर्वे समारम्भाः »He whose all endeavors काम-सङ्कल्प-वर्जिताः are free from the desire for sense gratification, तम् ज्ञान-अग्नि-दग्ध-कर्माणम् him whose Karma is burned by the fire of knowledge बुधाः पण्डितम् आहुः the wise call a learned man.«

**||4.20||**

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥

त्यक्त्वा कर्म-फल-आसङ्गम् नित्य-तृप्तः निराश्रयः कर्मणि अभिप्रवृत्तः अपि न एव किञ्चिद् करोति सः

कर्मणः फले आसङ्गः इति कर्म-फल-आसङ्गः _attachment to the fruit of activity.

कर्म-फल-आसङ्गम् त्यक्त्वा »[After] giving up attachment for the fruit of activity नित्य-तृप्तः निराश्रयः ever satisfied and independent कर्मणि अभिप्रवृत्तः अपि though fully engaged in work, सः न एव किञ्चिद् करोति he never does anything.«

||4.21||

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

निराशीः यत-चित्त-आत्मा त्यक्त-सर्व-परिग्रहः शारीरम् केवलम् कर्म कुर्वन् आप्नोति किल्बिषम्

यतौ चित्तम् च आत्मा च यस्य सः यत-चित्त-आत्मा _whose mind and intelligence are controlled. त्यक्तः सर्वः परिग्रहः येन सः त्यक्त-सर्व-परिग्रहः _by whom all proprietorship is given up.

निराशीः यत-चित्त-आत्मा »Free from hankering and self-controlled त्यक्त-सर्व-परिग्रहः free from all proprietorship केवलम् शारीरम् कर्म कुर्वन् [while] doing only work for the bodily necessities किल्बिषम् न आप्नोति he does not incur sin.«

||4.22||

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

यदृच्छा-लाभ-सन्तुष्टः द्वन्द्व-अतीतः विमत्सरः समः सिद्धौ अ-सिद्धौ च कृत्वा अपि न निबध्यते

यदृच्छया लाभेन सन्तुष्टः यः सः यदृच्छा-लाभ-सन्तुष्टः _who is satisfied with gain which comes on its own.

यदृच्छा-लाभ-सन्तुष्टः »Being satisfied with gain which comes unsought द्वन्द्व-अतीतः विमत्सरः free from duality (tolerant), non-envious सिद्धौ अ-सिद्धौ च समः and steady in success and failure कृत्वा अपि न निबध्यते even [after] acting he is not bound.«

||4.23||

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥

गत-सङ्गस्य मुक्तस्य ज्ञान-अवस्थित-चेतसः यज्ञाय आचरतः कर्म समग्रम् प्रविलीयते

गतः सङ्गः यस्य सः गत-सङ्गः _whose attachment is gone. ज्ञाने अवस्थितम् चेतः यस्य सः ज्ञान-अवस्थित-चेताः _whose mind is established in knowledge.

गत-सङ्गस्य मुक्तस्य »Who is free from attachment and liberated ज्ञान-अवस्थित-चेतसः whose mind is situated in knowledge यज्ञाय आचरतः and who is working for the purpose of sacrifice, कर्म समग्रम् प्रविलीयते [his] Karma completely dissolves.«

यज्ञाय परमेश्वर-अर्थम् For Yajna means for the sake of the Lord. ... तद् एवम् परमेश्वर-आराधन-लक्षणम् कर्म Thus work as worship of the Lord ज्ञान-हेतुत्वेन since it leads to knowledge बन्धकत्व-अ-भावात् and since it does not bind अ-कर्म एव is certainly [true] inactivity (A-karma). इदानीम् Now कर्मणि तद्-अङ्गेषु च ब्रह्म एव अनुस्यूतम् पश्यतः by seeing Brahma as pervading rituals and their means कर्म-प्रविलयम् आह the dissolution of Karma is stated ...

||4.24||

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

ब्रह्म-अर्पणम् ब्रह्म हविः ब्रह्म-अग्नौ ब्रह्मणा हुतम् ब्रह्म एव तेन गन्तव्यम् ब्रह्म-कर्म-समाधिना

ब्रह्मणे अर्पणम् इति ब्रह्म-अर्पणम् _offering to Brahma. ब्रह्म एव अग्निः इति ब्रह्म-अग्निः _the fire which is Brahma. ब्रह्म-कर्मणि समाधि यस्य सः ब्रह्म-कर्म-समाधि _whose absorption is in spiritual activity.

ब्रह्म-अर्पणम् »'Offering to the Brahma' [means:] हविः ब्रह्म The oblation (ghee) is spritual ब्रह्मणा ब्रह्म-अग्नौ हुतम् offered by the spirit soul [which is Brahma] into the spiritual fire. तेन ब्रह्म-कर्म-समाधिना By that one [thus] absorbed in spiritual activities ब्रह्म एव गन्तव्यम् Brahma alone is attained.«

[Now] अधिकारि-भेदेन according to differences amongst the aspirants ज्ञान-उपाय-भूतान् बहून् यज्ञान् आह many sacrifices which are means to the attainment of this knowledge (that Brahma is everything) are now stated ...

**||4.25||**

दैवमेवापरे यज्ञं योगिनः पर्युपासते । ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥

दैवम् एव अपरे यज्ञम् योगिनः पर्युपासते ब्रह्म-अग्नौ अपरे यज्ञम् यज्ञेन एव उपजुह्वति

अपरे योगिनः »Others, the [Karma-]Yogīs दैवम् यज्ञम् एव पर्युपासते perform sacrifice to the Devas (Daiva-yajna). अपरे यज्ञेन एव Others (Jnāna-yogīs) by Yajna ब्रह्म-अग्नौ यज्ञम् उपजुह्वति they offer sacrifice (Jnāna-yajna) into the fire of Brahma.«

**||4.26||**

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति । शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥

श्रोत्र-आदीनि इन्द्रियाणि अन्ये संयम-अग्निषु जुह्वति शब्द-आदीन् विषयान् अन्ये इन्द्रिय-अग्निषु जुह्वति

श्रोत्रम् आदिः यस्य सः श्रोत्र-आदिः _whose first is the ear (hearing). संयमस्य अग्निः इति संयम-अग्निः _the fire of restraint. इन्द्रियाणाम् अग्निः इति इन्द्रिय-अग्निः _fire of the senses.

अन्ये »Others (Brahmacārīs) श्रोत्र-आदीनि इन्द्रियाणि the senses like hearing संयम-अग्निषु जुह्वति they offer into the fires of sense-control. अन्ये Others (Grihasthas) शब्द-आदीन् विषयान् the sense objects like sound इन्द्रिय-अग्निषु जुह्वति they offer in the fires of the [controlled] senses [even at the time of enjoying the sense objects].«

Fire symbolizes sacrifice. To sacrifice some kind of personal sense gratification means to 'offer' it into the 'fire' of that specific sacrifice. The Brahmacārīs (celibate students), e.g., 'sacrifice' all sense gratification, beginning with hearing, by dedicating the hearing process to hearing the Vedas etc. Grihasthas (housholders) practice detachment by regulating their sense gratification according to the injunctions of the Vedas.

**||4.27||**

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥

सर्वाणि इन्द्रिय-कर्माणि प्राण-कर्माणि च अपरे आत्म-संयम-योग-अग्नौ जुह्वति ज्ञान-दीपिते

इन्द्रियाणाम् कर्म इति इन्द्रिय-कर्म _activity of the senses. प्राणस्य कर्म इति प्राण-कर्म _activity of the vital force. ज्ञानेन दीपितः इति ज्ञान-दीपितः _kindled by knowledge. आत्मनः संयमः एव योगः तस्य अग्निः इति आत्म-संयम-योग-अग्निः _the fire of the Yoga of self-control.

अपरे »Others (Dhyāna-yogīs) सर्वाणि इन्द्रिय-कर्माणि all sensory activities (like hearing) प्राण-कर्माणि च and the vital functions (like Prāna and Apāna) ज्ञान-दीपिते आत्म-संयम-योग-अग्नौ in the fire of the Yoga of self-control, kindled by knowledge जुह्वति they offer.«
By concentrating the mind on Brahma, they stop all sensory activities.

**||4.28||**

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥
द्रव्य-यज्ञाः तपः-यज्ञाः योग-यज्ञाः तथा अपरे स्वाध्याय-ज्ञान-यज्ञाः च यतयः संशित-व्रताः

द्रव्येण यज्ञः यस्य सः द्रव्य-यज्ञः _whose sacrifice is by wealth. तपः यज्ञः यस्य सः तपः-यज्ञः _whose sacrifice is austerity. योगः यज्ञः यस्य सः योग-यज्ञः _whose sacrifice is Yoga. स्वाध्याय-ज्ञानेन यज्ञः यस्य सः स्वाध्याय-ज्ञान-यज्ञः _whose sacrifice is through knowledge of the Vedas.

तथा अपरे »And others द्रव्य-यज्ञाः offer sacrifice through items (charity), तपः-यज्ञाः sacrifice through austerity, योग-यज्ञाः or sacrifice through Yoga. संशित-व्रताः यतयः Renunciates who follow strict vows स्वाध्याय-ज्ञान-यज्ञाः च sacrifice through knowledge by study.«

**||4.29||**

अपाने जुह्वति प्राणं प्राणे ऽपानं तथापरे । प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।
अपाने जुह्वति प्राणम् प्राणे अपानम् तथा अपरे प्राण-अपान-गती रुद्ध्वा प्राणायाम-परायणाः
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥
अपरे नियत-आहाराः प्राणान् प्राणेषु जुह्वति

प्राणस्य च अपानस्य च गती इति प्राण-अपान-गती _the movements of Prāna and Apāna. नियतः आहारः यस्य सः नियत-आहारः _whose eating is regulated.

प्राणायाम-परायणाः अपरे »Others, dedicated to breath control प्राणम् अपाने जुह्वति offer the exhalation (Prāna) into the inhalation (Apāna) [during Pūraka], तथा प्राण-अपान-गती रुद्ध्वा and [after] stopping the movements of exhalation and inhalation [by Kumbhaka] अपानम् प्राणे [they offer] the inhalation into the exhalation [during Recaka]. नियत-आहाराः अपरे Others, regulating their eating प्राणान् प्राणेषु जुह्वति offer the Prānas into the Prānas.«

तद् एवम् उक्तानाम् द्वादशानाम् यज्ञ-विदाम् फलम् आह Now the result for these twelve knowers of sacrifice mentioned above (4.25-29) is stated ...

**||4.30||**

सर्वे ऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः । यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥
सर्वे अपि एते यज्ञ-विदः यज्ञ-क्षपित-कल्मषाः यज्ञ-शिष्ट-अमृत-भुजः यान्ति ब्रह्म सनातनम्

यज्ञेन क्षपितम् कल्मषम् यस्य सः यज्ञ-क्षपित-कल्मषः _whose impurity is destroyed by sacrifice. कुरूणाम् सत्तमः इति कुरु-सत्तमः _best of the Kurus.

सर्वे अपि एते यज्ञ-विदः »And all these knowers of sacrifice यज्ञ-क्षपित-कल्मषाः freed from sin by this sacrifice यज्ञ-शिष्ट-अमृत-भुजः they taste the nectar left after sacrifice सनातनम् ब्रह्म यान्ति [and] attain the eternal Absolute (Brahma).«

||4.31||

नायं लोको ऽस्त्ययज्ञस्य कुतो ऽन्यः कुरुसत्तम ॥

न अयम् लोकः अस्ति अ-यज्ञस्य कुतः अन्यः कुरु-सत्तम

कुरु-सत्तम »O Arjuna! अ-यज्ञस्य Of one who does not perform sacrifice न अयम् लोकः अस्ति is not even this world.«

अयम् अल्प-सुखः अपि मनुष्य-लोकः Even this mortal world with its little happiness. कुतः अन्यः how then the other (heaven).

Even in this material world (or this life) one has to perform some sort of sacrifice to become happy. And to attain heaven, where there is a much higher standard of happiness, one certainly has to perform sacrifice in this world (or life).

ज्ञान-यज्ञम् स्तोतुम् In order to praise the knowledge-sacrifice उक्तान् यज्ञान् उपसंहरति the sacrifices mentioned above are being summarized ...

||4.32||

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे । कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥

एवम् बहु-विधाः यज्ञाः वितताः ब्रह्मणः मुखे कर्म-जान् विद्धि तान् सर्वान् एवम् ज्ञात्वा विमोक्ष्यसे

एवम् बहु-विधाः यज्ञाः »Thus the many types of sacrifices ब्रह्मणः मुखे वितताः spread (prescribed) by the Veda (Brahma) तान् सर्वान् कर्म-जान् विद्धि know all these to be born from work. एवम् ज्ञात्वा [After] knowing them as such (being devoted to spiritual knowledge) विमोक्ष्यसे you will be liberated.«

तथापि Still, तान् सर्वान् वाक्-मनः-काय-कर्म-जनितान् आत्म-स्वरूप-संस्पर्श-रहितान् विद्धि you must know all these to be born from the activities of speech, mind and body and [therefore] without connection with the self.

||4.33||

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप । सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥

श्रेयान् द्रव्यमयात् यज्ञात् ज्ञान-यज्ञः परन्तप सर्वम् कर्म अ-खिलम् पार्थ ज्ञाने परिसमाप्यते

परन्तप »O Arjuna! द्रव्यमयात् यज्ञात् Compared to the sacrifice with materials (like charity) ज्ञान-यज्ञः श्रेयान् the knowledge sacrifice is better. पार्थ O Arjuna! सर्वम् अ-खिलम् कर्म [Because] all complete Karma ज्ञाने परिसमाप्यते is completed in [spiritual] knowledge.«

एवम्भूत-आत्म-ज्ञाने साधनम् आह The means to such knowledge of the self is stated ...

||4.34||

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥

तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनः तत्त्व-दर्शिनः

प्रणिपातेन परिप्रश्नेन सेवया »By submission, inquiry and [personal] service तद् ज्ञानम् विद्धि you must understand that [spiritual] knowledge. तत्त्व-दर्शिनः ज्ञानिनः The wise who know the truth तुभ्यम्/ते उपदेक्ष्यन्ति will instruct you.«

ज्ञान-फलम् आह The fruit of knowledge is stated ...

||4.35||

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव । येन भूतान्यशेषाणि द्रक्ष्यस्यात्मन्यथो मयि ॥

यद् ज्ञात्वा न पुनः मोहम् एवम् यास्यसि पाण्डव येन भूतानि अ-शेषाणि द्रक्ष्यसि आत्मनि अथो मयि

पाण्डव »O Arjuna! यद् ज्ञात्वा [After] knowing that येन अ-शेषाणि भूतानि आत्मनि अथो मयि द्र क्ष्यसि by which you will see all beings in the self, and therefore in me, पुनः एवम् मोहम् न यास्यसि you will not again attain such illusion (of 'killing kinsmen', etc.).«

||4.36||

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः । सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥

अपि चेद् असि पापेभ्यः सर्वेभ्यः पाप-कृत्तमः सर्वम् ज्ञान-प्लवेन एव वृजिनम् सन्तरिष्यसि

ज्ञानस्य प्लवः इति ज्ञान-प्लवः _boat of knowledge.

सर्वेभ्यः पापेभ्यः »Among all sinners पाप-कृत्तमः अपि असि चेद् even if you are the greatest sinner, ज्ञान-प्लवेन एव with the boat of [spiritual] knowledge alone सर्वम् वृजिनम् सन्तरिष्यसि you will cross [the ocean of] all sin.«

||4.37||

यथैधांसि समिद्धो ऽग्निर्भस्मसात्कुरुते ऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

यथा एधांसि समिद्धः अग्निः भस्मसात् कुरुते अर्जुन ज्ञान-अग्निः सर्व-कर्माणि भस्मसात् कुरुते तथा

ज्ञानस्य अग्निः इति ज्ञान-अग्निः _fire of knowledge.

अर्जुन »O Arjuna! यथा समिद्धः अग्निः As a blazing fire एधांसि भस्मसात् कुरुते burns fuels to ashes, तथा ज्ञान-अग्निः so does the fire of [spiritual] knowledge सर्व-कर्माणि भस्मसात् कुरुते burn to ashes all Karma.«

... प्रारब्ध-कर्म-व्यतिरिक्तानि सर्वाणि कर्माणि All Karma, except the Prārabdha-karma.

||4.38||

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

न हि ज्ञानेन सदृशम् पवित्रम् इह विद्यते तद् स्वयम् योग-संसिद्धः कालेन आत्मनि विन्दति

ज्ञानेन सदृशम् पवित्रम् »Something as purifying as [spiritual] knowledge इह न हि विद्यते does not exist in this world. कालेन योग-संसिद्धः One who is in due course of time perfected by Karma-yoga तद् स्वयम् आत्मनि विन्दति obtains that (knowledge) within himself.«

||4.39||

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

श्रद्धावान् लभते ज्ञानम् तद्-परः संयत-इन्द्रियः ज्ञानम् लब्ध्वा पराम् शान्तिम् अ-चिरेण अधिगच्छति

तद् परः यस्य सः तद्-परः _whose supreme [shelter or master] is that. संयतानि इन्द्रियाणि यस्य सः संयत-इन्द्रियः _whose senses are controlled.

तद्-परः संयत-इन्द्रियः »Being dedicated to that [knowledge] and sense-controlled श्रद्धावान् ज्ञानम् लभते a faithful man obtains [spiritual] knowledge, ज्ञानम् लब्ध्वा [and after] obtaining [spiritual] knowledge अ-चिरेण पराम् शान्तिम् अधिगच्छति he quickly attains supreme peace.«

श्रद्धावान् 'Faithful' means गुरु-उपदिष्टे अर्थे आस्तिक्य-बुद्धिमान् one who believes in the meaning of the teachings of the Guru.

**||4.40||**

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति । नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥

अ-ज्ञः च अ-श्रद्दधानः च संशय-आत्मा विनश्यति न अयम् लोकः अस्ति न परः न सुखम् संशय-आत्मनः

न जानाति यः सः अ-ज्ञः _who does not know.

अ-ज्ञः च अ-श्रद्दधानः च »Being ignorant and faithless संशय-आत्मा विनश्यति one who is doubtful is lost. संशय-आत्मनः न अयम् लोकः अस्ति For a doubtful man is neither this world (because earning wealth, marriage, etc., are not possible for him) न परः nor the next (because he can not acquire virtue) न सुखम् nor happiness (because even enjoyment is not possible with that very doubt).«

**||4.41||**

योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् । आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥

योग-सन्न्यस्त-कर्माणम् ज्ञान-सञ्छिन्न-संशयम् आत्मवन्तम् न कर्माणि निबध्नन्ति धनञ्जय

योगेन सन्न्यस्तम् कर्म येन सः योग-सन्न्यस्त-कर्मा _by whom [the fruit of] work is renounced by Yoga. ज्ञानेन सञ्छिन्नः संशयः यस्य सः ज्ञान-सञ्छिन्न-संशयः _whose doubt is cut by knowledge.

धनञ्जय »O Arjuna! योग-सन्न्यस्त-कर्माणम् One who has renounced work by [Karma-]Yoga ज्ञान-सञ्छिन्न-संशयम् whose doubt is destroyed by knowledge आत्मवन्तम् and who is situated in the self कर्माणि न निबध्नन्ति activities do not bind [him].«

**||4.42||**

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः । छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥

तस्मात् अज्ञान-सम्भूतम् हृद्-स्थम् ज्ञान-असिना आत्मनः छित्त्वा एनम् संशयम् योगम् आतिष्ठ उत्तिष्ठ भारत

अ-ज्ञानात् सम्भूतः इति अज्ञान-सम्भूतः _born from ignorance. ज्ञानस्य असिः इति ज्ञान-असिः _the sword of knowledge, (or:) ज्ञान एव असिः इति ज्ञान-असिः _the sword which is knowlege.

तस्मात् भारत »Therefore, O Arjuna! अज्ञान-सम्भूतम् Born from ignorance हृद्-स्थम् एनम् संशयम् this doubt, situated in the heart आत्मनः ज्ञान-असिना छित्त्वा [after] cutting it with the sword of knowledge of the soul, योगम् आतिष्ठ resort to [Karma-]Yoga, उत्तिष्ठ [and therefore] stand up (to fight).«

देह-आत्म-विवेक-ज्ञान-खड्गेन With the sword of knowledge of discrimination between body and soul. ... परमात्म-ज्ञान-उपाय-भूतम् कर्म-योगम् आतिष्ठ Resort to Karma-yoga, which is a means to the knowledge of the supreme self.

**||5.1||**

सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि। यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्॥

सन्न्यासम् कर्मणाम् कृष्ण पुनः योगम् च शंससि यद् श्रेयः एतयोः एकम् तद् मे ब्रूहि सुनिश्चितम्

कृष्ण »O Lord! कर्मणाम् सन्न्यासम् शंससि [First] you praise renunciation (Sannyāsa) of [all] work (=Karma-sannyāsa, see 3.17,4.33) पुनः योगम् च and again [Karma-]Yoga (see 4.22). यद् एतयोः श्रेयः That which is better of these two तद् एकम् that alone मह्यम्/मे सुनिश्चितम् ब्रूहि tell to me definitely.«

नच कर्म-सन्न्यासः कर्म-योगः च एकदा एव सम्भवतः Because it is not possible to practice Karma-sannyāsa and Karma-yoga at the same time विरुद्ध-स्वरूपत्वात् as this is contradictory.

**||5.2||**

सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते॥

सन्न्यासः कर्म-योगः च निःश्रेयस-करौ उभौ तयोः तु कर्म-सन्न्यासात् कर्म-योगः विशिष्यते

कर्मणः सन्न्यासः इति कर्म-सन्न्यासः _renunciation of work.

सन्न्यासः कर्म-योगः च »[Karma-]Sannyāsa and Karma-yoga उभौ निःश्रेयस-करौ both lead to liberation, तयोः तु but of the two कर्म-सन्न्यासात् कर्म-योगः विशिष्यते Karma-yoga is better than Karma-sannyāsa.«

कुतः How is this? सन्न्यासित्वेन कर्म-योगम् स्तुवन् By praising Karma-yoga as being [real] renunciation तस्य श्रेष्ठत्वम् दर्शयति He shows its superiority ...

**||5.3||**

ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति। निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥

ज्ञेयः सः नित्य-सन्न्यासी यः न द्वेष्टि न काङ्क्षति निर्द्वन्द्वः हि महा-बाहो सुखम् बन्धात् प्रमुच्यते

यः न द्वेष्टि न काङ्क्षति »He who neither hates nor desires सः नित्य-सन्न्यासी ज्ञेयः he is to be known as always renounced, महा-बाहो [because] O Arjuna! निर्द्वन्द्वः हि Being free from duality बन्धात् सुखम् प्रमुच्यते he is easily freed from bondage.«

राग-द्वेषादि-द्वन्द्व-शून्यः हि Freedom from the dualities of [opposites like] attachment and aversion शुद्ध-चित्तः means purity of mind. ... राग-द्वेषादि-राहित्येन परमेश्वर-अर्थम् कर्माणि यः अनुतिष्ठति He who performs activities for the Lord free from attachment and aversion, etc. सः नित्यम्/कर्म-अनुष्ठान-काले अपि सन्न्यासि he is always, even at the time of work, a Sannyāsī.

**||5.4||**

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥

साङ्ख्य-योगौ पृथक् बालाः प्रवदन्ति न पण्डिताः एकम् अपि आस्थितः सम्यक् उभयोः विन्दते फलम्

साङ्ख्यः च योगः च इति साङ्ख्य-योगौ _Sānkhya and Yoga.

साङ्ख्य-योगौ पृथक् »'Jnāna-yoga (Sānkhya) and Karma-yoga are different' बालाः प्रवदन्ति [thus only] children declare न पण्डिताः not the learned, एकम् अपि सम्यक् आस्थितः [because] having

resorted to even one [path] completely उभयोः फलम् विन्दते one gets the fruit of both [i.e., liberation].«

**||5.5||**

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥
यद् साङ्ख्यैः प्राप्यते स्थानम् तद् योगैः अपि गम्यते एकम् साङ्ख्यम् च योगम् च यः पश्यति सः पश्यति

यद् स्थानम् साङ्ख्यैः प्राप्यते »The position which is attained by Jnāna-yogīs (Sānkhyas) (i.e., liberation) तद् योगैः अपि गम्यते that is also reached by [Karma-]Yogīs. साङ्ख्यम् च योगम् च एकम् [That] Jnāna-yoga (Sānkhya) and Karma-yoga are one यः पश्यति he who sees, सः पश्यति he sees [truly].«

**||5.6||**

सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः । योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥
सन्न्यासः तु महा-बाहो दुःखम् आप्तुम् अ-योगतः योग-युक्तः मुनिः ब्रह्म न चिरेण अधिगच्छति

योगे युक्तः इति योग-युक्तः _engaged in Yoga, (or:) योगेन युक्तः इति योग-युक्तः _endowed with Yoga.

महा-बाहो »O Arjuna! अ-योगतः तु But without [first practicing] [Karma-]Yoga (to achieve purity of mind) सन्न्यासः दुःखम् आप्तुम् [Karma-]Sannyāsa is difficult to obtain (i.e., impossible), योग-युक्तः मुनिः [but] the sage who is engaged in Karma-yoga न चिरेण ब्रह्म अधिगच्छति quickly attains the Supreme (Brahma).«

अतः चित्त-शुद्धेः प्राक् Therefore, before purity of mind [is achieved] कर्म-योगः एव सन्न्यासात् विशिष्यते Karma-yoga is better than [Karma-]Sannyāsa.

**||5.7||**

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥
योग-युक्तः विशुद्ध-आत्मा विजित-आत्मा जित-इन्द्रियः सर्वभूत-आत्मभूत-आत्मा कुर्वन् अपि न लिप्यते

सर्वेषाम् भूतानाम् आत्म-भूतः आत्मा यस्य सः सर्वभूत-आत्मभूत-आत्मा _‘whose self has become [like] the self of all beings’, i.e., who feels, how they feel.

योग-युक्तः »Being engaged in [Karma-]Yoga विशुद्ध-आत्मा [thus] completely pure in mind विजित-आत्मा जित-इन्द्रियः [and thus] mind- and sense-controlled सर्वभूत-आत्मभूत-आत्मा and feeling for all beings कुर्वन् अपि न लिप्यते even [while] working he is not stained.«

**||5.8-9||**

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् । पश्यन् शृण्वन्स्पृशन् जिघ्रन्नश्नन्गच्छन्स्वपन् श्वसन् ॥
न एव किञ्चिद् करोमि इति युक्तः मन्येत तत्त्व-विद् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन्
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥
प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रिय-अर्थेषु वर्तन्ते इति धारयन्

तत्त्व-विद् युक्तः »The Karma-yogī (yukta), knowing the truth पश्यन् शृण्वन् स्पृशन् जिघ्रन् [while] seeing, hearing, touching, smelling अश्नन् गच्छन् स्वपन् श्वसन् [while] eating, walking, sleeping,

breathing प्रलपन् विसृजन् गृह्णन् [while] talking, evacuating, taking उन्मिषन् निमिषन् अपि and even [while] opening and closing the eyes, इन्द्रियाणि इन्द्रिय-अर्थेषु वर्तन्ते that 'the senses are engaged in sense objects' इति धारयन् [while] thus considering न एव किञ्चिद् करोमि 'I [myself] am not at all doing anything ' इति मन्येत thus he should think.«

... अभिमान-अभावात् Because of being free from the idea of agency.

**||5.10||**

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

ब्रह्मणि आधाय कर्माणि सङ्गम् त्यक्त्वा करोति यः लिप्यते न सः पापेन पद्म-पत्रम् इव अम्भसा

पद्मस्य पत्रम् इति पद्म-पत्रम् _petal of a lotus.

कर्माणि ब्रह्मणि आधाय »[After] dedicating [all] activities to the Supreme सङ्गम् त्यक्त्वा and [after] giving up attachment यः करोति one who acts, सः पापेन न लिप्यते he is not stained by sin पद्म-पत्रम् इव अम्भसा like a lotus leaf [is not touched] by water.«

**||5.11||**

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥

कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि योगिनः कर्म कुर्वन्ति सङ्गम् त्यक्त्वा आत्म-शुद्धये

आत्मनः शुद्धिः इति आत्म-शुद्धिः _purification of the mind.

सङ्गम् त्यक्त्वा »[After] giving up attachment, कायेन मनसा बुद्ध्या with body, mind, intelligence केवलैः इन्द्रियैः अपि and also with purified senses आत्म-शुद्धये for the purification of the mind योगिनः कर्म कुर्वन्ति [Karma-]Yogīs perform work.«

**||5.12||**

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते ॥

युक्तः कर्म-फलम् त्यक्त्वा शान्तिम् आप्नोति नैष्ठिकीम् अ-युक्तः काम-कारेण फले सक्तः निबध्यते

कर्म-फलम् त्यक्त्वा »[After] giving up the fruit of work युक्तः नैष्ठिकीम् शान्तिम् आप्नोति the Karma-yogī attains perfect peace, अ-युक्तः [but] one who is not a Karma-yogī काम-कारेण फले सक्तः being attached to the fruit [of work] because of desire निबध्यते he is bound.«

युक्तः Yukta means परमेश्वर-एक-निष्ठः who is dedicated to the Lord alone. एवम् तावत् Thus so far चित्त-शुद्धि-शून्यस्य सन्न्यासात् कर्म-योगः विशिष्यते that for one without purity of mind Karma-Yoga is better than [Karma-]Sannyāsa इति एतद् प्रपञ्चितम् this has been expounded. इदानीम् शुद्ध-चित्तस्य सन्न्यासः श्रेष्ठः इति आह Now it is stated that for one pure-minded Karma-Sannyāsa is better ...

**||5.13||**

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥

सर्व-कर्माणि मनसा सन्न्यस्य आस्ते सुखम् वशी नव-द्वारे पुरे देही न एव कुर्वन् न कारयन्

सर्व-कर्माणि मनसा सन्न्यस्य »[After] renouncing all activities with his discrimination न एव कुर्वन् न कारयन् [while] neither acting nor causing to act, वशी देही the [self-]controlled embodied being नव-द्वारे पुरे सुखम् आस्ते resides happily in the city of nine gates.«

नेत्रे नासिके कर्णौ मुखम् च The eyes, nostrils, ears and mouth इति सप्त शिरः-गतानि these seven [gates] are in the head अधः-गते द्वे पायु-उपस्थ-रूपे and the organs of excretion and generation are two that go down.

**||5.14||**

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥

न कर्तृत्वम् न कर्माणि लोकस्य सृजति प्रभुः न कर्म-फल-संयोगम् स्व-भावः तु प्रवर्तते

कर्मस्य फलेन संयोगः इति कर्म-फल-संयोगः _the contact with the fruit of activity.

प्रभुः लोकस्य कर्तृत्वम् न सृजति »The Lord does not create the doership of people न कर्माणि nor activities न कर्म-फल-संयोगम् nor the connection with the fruit of work, स्व-भावः तु प्रवर्तते rather, one's own nature acts.«

स्व-भावः अविद्या Sva-bhāva means ignorance. अनादि-अविद्या-काम-वशात् प्रवृत्ति-स्वभावम् जीव-लोकम् The world of beings whose nature is to be active, because of desire (Kāma) which arises from beginningless ignorance ईश्वरः कर्मसु नियुङ्क्ते the Lord engages [it] in activity. नतु स्वयम् एव कर्तृत्वादिकम् उत्पादयति But He does not Himself create agency /doership, etc. इति अर्थः This is the idea.

**||5.15||**

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥

न आदत्ते कस्यचिद् पापम् न च एव सुकृतम् विभुः अ-ज्ञानेन आवृतम् ज्ञानम् तेन मुह्यन्ति जन्तवः

विभुः कस्यचिद् पापम् न आदत्ते »The Lord does not accept anyone's sin न च एव सुकृतम् and not even piety. ज्ञानम् अ-ज्ञानेन आवृतम् Knowledge is covered by ignorance तेन जन्तवः मुह्यन्ति and thereby beings are bewildered.«

यदि हि स्वार्थ-कामनया कारयेत् If He would direct [beings] to actions out of his selfish desire तर्हि तथा स्यात् than it would be so [that He would acquire sin and virtue]. नतु एतद् अस्ति But it is not so. आप्त-कामस्य एव For He, with His desires already fulfilled अचिन्त्य-निज-मायया through His inconceivable power of Māyā तद्-तद्-पूर्व-कर्म-अनुसारेण प्रवर्तकत्वात् He directs beings according to their respective previous actions.

**||5.16||**

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥

ज्ञानेन तु तद् अ-ज्ञानम् येषाम् नाशितम् आत्मनः तेषाम् आदित्यवत् ज्ञानम् प्रकाशयति तद् परम्

येषाम् तु तद् अ-ज्ञानम् »But those whose that ignorance आत्मनः ज्ञानेन नाशितम् is destroyed by knowledge of the soul, तेषाम् आदित्यवत् ज्ञानम् for them sun-like knowledge तद् परम् प्रकाशयति reveals that Supreme.«

तद् परम्/परिपूर्णम् ईश्वर-स्वरूपम् प्रकाशयति It reveals that Supreme, the nature of the perfect Lord. यथा आदित्यः Even as the sun तमः निरस्य destroying darkness समस्तम् वस्तु-जातम् प्रकाशयति reveals all things.

||5.17||

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः । गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥

तद्-बुद्धयः तद्-आत्मानः तद्-निष्ठाः तद्-परायणाः गच्छन्ति अपुनः आवृत्तिम् ज्ञान-निर्धूत-कल्मषाः

तस्मिन् बुद्धिः यस्य सः तद्-बुद्धिः _whose intelligence is in that. तस्मिन् आत्मा यस्य सः तद्-आत्मा _whose mind is in that. तस्मिन् निष्ठा यस्य सः तद्-निष्ठः _whose faith is in that. तद् परम् अयनम् यस्य सः तद्-परायणः _whose supreme path (shelter) is that. ज्ञानेन निर्धूतम् कल्मषम् यस्य सः ज्ञान-निर्धूत-कल्मषः _whose impurity is removed by knowledge.

तद्-बुद्धयः तद्-आत्मानः »Their intelligence and mind fixed in that (the nature of the Lord) तद्-निष्ठाः तद्-परायणाः their faith and refuge fixed in that ज्ञान-निर्धूत-कल्मषाः their impurities removed by knowledge अपुनः-आवृत्तिम् गच्छन्ति they attain liberation ('no more return').«

||5.18||

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

विद्या-विनय-सम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च एव श्व-पाके च पण्डिताः सम-दर्शिनः

विद्यया च विनयेन च सम्पन्नः इति विद्या-विनय-सम्पन्नः _endowed with learning and gentleness.

विद्या-विनय-सम्पन्ने ब्राह्मणे »In a Brāhmana who is endowed with learning and good behavior गवि हस्तिनि in a cow and an elephant शुनि च एव श्व-पाके च in a dog and also an outcaste ('who cooks dogs) पण्डिताः सम-दर्शिनः the learned see the same (i.e., brahma or the soul).«

विषमेषु अपि समम् ब्रह्म एव द्रष्टुम् शीलम् येषाम् Those whose habit is to see the same brahma in things which are dissimilar ते पण्डिताः/ज्ञानिनः they are wise.

||5.19||

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥

इह एव तैः जितः सर्गः येषाम् साम्ये स्थितम् मनः निर्दोषम् हि समम् ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः

येषाम् मनः साम्ये स्थितम् »Those whose mind is situated in [such] equality [of vision] इह एव even here [in this life] तैः सर्गः जितः the material existence is conquered by them. ब्रह्म निर्दोषम् समम् हि [Because] the Supreme (Brahma) is flawless and equal तस्मात् ते ब्रह्मणि स्थिताः therefore they are situated in the Supreme (Brahma).«

यस्मात् ब्रह्म समम् निर्दोषम् च Because the Brahma is flawless and equal तस्मात् ते सम-दर्शिनः ब्रह्मणि एव स्थिताः therefore those who have equal vision are situated in Brahma ब्रह्म-भावम् प्राप्ताः इति अर्थः i.e., they have attained the nature of Brahma.

||5.20||

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥

न प्रहृष्येत् प्रियम् प्राप्य न उद्विजेत् प्राप्य च अ-प्रियम् स्थिर-बुद्धिः अ-सम्मूढः ब्रह्म-विद् ब्रह्मणि स्थितः

स्थिरा बुद्धिः यस्य सः स्थिर-बुद्धिः _whose intelligence is steady.

स्थिर-बुद्धिः अ-सम्मूढः »With steady intelligence and unbewildered ब्रह्मणि स्थितः ब्रह्म-विद् the knower of the Supreme, situated in the Supreme (Brahma) प्रियम् प्राप्य [after] achieving what is pleasant न प्रहृष्येत् he will not rejoice, अ-प्रियम् च प्राप्य and [after] achieving what is unpleasant न उद्विजेत् he will not be agitated.«

**||5.21||**

## बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् । स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥

बाह्य-स्पर्शेषु अ-सक्त-आत्मा विन्दति आत्मनि यद् सुखम् सः ब्रह्म-योग-युक्त-आत्मा सुखम् अ-क्षयम् अश्नुते

बाह्यः स्पर्शः इति बाह्य-स्पर्शः _'external touch', contact with sense objects. न सक्तः आत्मा यस्य सः अ-सक्त-आत्मा _whose mind is not attached. ब्रह्मणि योगेन युक्तः आत्मा यस्य सः ब्रह्म-योग-युक्त-आत्मा _whose mind is fixed in Brahma by meditation.

बाह्य-स्पर्शेषु अ-सक्त-आत्मा »Unattached towards external sense objects आत्मनि यद् सुखम् विन्दति he obtains that happiness which is in the self. ब्रह्म-योग-युक्त-आत्मा Being absorbed in the Supreme सः अ-क्षयम् सुखम् अश्नुते he obtains unending happiness.«

**||5.22||**

## ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥

ये हि संस्पर्श-जाः भोगाः दुःख-योनयः एव ते आदि-अन्तवन्तः कौन्तेय न तेषु रमते बुधः

दुःखस्य योनिः इति दुःख-योनिः _the source of misery.

कौन्तेय »O Arjuna! ये हि संस्पर्श-जाः भोगाः Those pleasures which are born from sense objects आदि-अन्तवन्तः having beginning and end ते दुःख-योनयः एव they are just sources of misery. बुधः तेषु न रमते A wise man does not delight in them.«

वर्तमान-काले अपि Even at present (the time of enjoyment) स्पर्धा-असूयादि-व्याप्तत्वात् because they are attended by competition, envy, etc. मोक्षः एव परः पुरुषार्थः As liberation is the highest goal of man तस्य च काम-क्रोध-वेगः अतिप्रतिपक्षः and as the urge of lust and anger is a great enemy of this (liberation) अतः therefore तद्-सहन-समर्थः एव only one who is able to tolerate this [urge] मोक्ष-भाक् attains liberation ...

**||5.23||**

## शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् । कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥

शक्नोति इह एव यः सोढुम् प्राक् शरीर-विमोक्षणात् काम-क्रोध-उद्भवम् वेगम् सः युक्तः सः सुखी नरः

शरीरात् विमोक्षणः इति शरीर-विमोक्षणः _liberation from the body. कामात् च क्रोधात् च उद्भवः यस्य सः काम-क्रोध-उद्भवः _whose generation is from lust and anger.

इह एव »Here [in this very life] शरीर-विमोक्षणात् प्राक् before giving up the body काम-क्रोध-उद्भवम् वेगम् the urge born from lust and anger यः सोढुम् शक्नोति one who is able to tolerate [it], सः युक्तः he is a Yogī (yukta), सः सुखी नरः he is a happy man.«

न केवलम् काम-क्रोध-वेग-संहरण-मात्रेण Not merely by tolerating the urge of lust and anger मोक्षम् प्राप्नोति one attains liberation ...

**||5.24||**

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः । स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥

यः अन्तः-सुखः अन्तः-आरामः तथा अन्तः-ज्योतिः एव यः सः योगी ब्रह्म-निर्वाणम् ब्रह्म-भूतः अधिगच्छति

अन्तः आरामः यस्य सः अन्तः-आरामः _whose delight is within. अन्तः ज्योतिः यस्य सः अन्त-कालः _whose light is within. ब्रह्मणि निर्वाणम् इति ब्रह्म-निर्वाणम् _Nirvāna in Brahma.

यः अन्तः-सुखः अन्तः-आरामः »Who has happiness and delight within तथा एव यः अन्तः-ज्योतिः and who has his vision ('light') within [and not outside], सः ब्रह्म-भूतः योगी that self-realized Yogī ब्रह्म-निर्वाणम् अधिगच्छति attains liberation (Nirvāna) in the Supreme.«

**||5.25||**

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः । छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥

लभन्ते ब्रह्म-निर्वाणम् ऋषयः क्षीण-कल्मषाः छिन्न-द्वैधाः यत-आत्मानः सर्व-भूत-हिते रताः

छिन्नम् द्वैधम् यस्य सः छिन्न-द्वैधः _whose doubt is cut. यतः आत्मा यस्य सः यत-आत्मा _whose mind is controlled. सर्वेषाम् भूतानाम् हितः इति सर्व-भूत-हितः _the welfare of all beings. क्षीणम् कल्मषम् यस्य सः क्षीण-कल्मषः _whose impurity is destroyed.

छिन्न-द्वैधाः यत-आत्मानः »Being free from doubt, self-controlled सर्व-भूत-हिते रताः and [full of compassion] engaged in the welfare of all beings क्षीण-कल्मषाः ऋषयः [such] sages who are free from sin ब्रह्म-निर्वाणम् लभन्ते attain liberation (Nirvāna) in the Supreme.«

**||5.26||**

कामक्रोधविमुक्तानां यतीनां यतचेतसाम् । अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥

काम-क्रोध-विमुक्तानाम् यतीनाम् यत-चेतसाम् अभितः ब्रह्म-निर्वाणम् वर्तते विदित-आत्मनाम्

यतम् चेतः यस्य सः यत-चेताः _whose mind is controlled.

काम-क्रोध-विमुक्तानाम् »Of those who are free from lust and anger यत-चेतसाम् विदित-आत्मनाम् self-controlled and realized यतीनाम् of those who endeavor ब्रह्म-निर्वाणम् अभितः वर्तते liberation (Nirvāna) in the Supreme is near.«

अभितः 'Near' means उभयतः मृतानाम् जीवताम् च on both sides, whether living or death.

**||5.27-28||**

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः । प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥

स्पर्शान् कृत्वा बहिः बाह्यान् चक्षुः च एव अन्तरे भ्रुवोः प्राण-अपानौ समौ कृत्वा नासा-अभ्यन्तर-चारिणौ

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥

यत-इन्द्रिय-मनः-बुद्धिः मुनिः मोक्ष-परायणः विगत-इच्छा-भय-क्रोधः यः सदा मुक्तः एव सः

नासायाः अभ्यन्तरे चारी इति नासा-अभ्यन्तर-चारी _which moves inside of the nose. यताः इन्द्रियाणि च मनः च बुद्धिः च यस्य सः यत-इन्द्रिय-मनः-बुद्धिः _whose senses, mind and intelligence are controlled. मोक्षः पर-अयणम् यस्य सः मोक्ष-परायणः _whose supreme path (shelter) is liberation.

बाह्यान् स्पर्शान् बहिः कृत्वा »[After] shutting out external sense perceptions चक्षुः च एव भ्रुवोः अन्तरे and [after fixing one's] vision in between the two eyebrows नासा-अभ्यन्तर-चारिणौ प्राण-अपानौ and Prāna and Apāna, which move inside the nose [only] समौ कृत्वा [after] balancing [both], यः यत-इन्द्रिय-मनः-बुद्धिः one who has senses, mind and intelligence controlled विगत-इच्छा-भय-क्रोधः who is free from desire, fear and anger मोक्ष-परायणः मुनिः a sage whose goal is liberation, सः सदा मुक्तः एव he is certainly always (even while living) liberated.«

अत्यन्तम् नेत्रयोः निमीलने When the eyes are too much closed निद्रया मनः लीयते the mind is merged in sleep. उन्मीलने च And when [the eyes are] wide open बहिः प्रसरति it (the mind) goes out. तद् उभय-दोष-परिहार-अर्थम् Therefore, to avoid both defects अर्ध-निमीलनेन भ्रू-मध्ये दृष्टिम् निधाय with half-closed eyes the gaze is fixed between the eyebrows. इति अर्थः This is the idea.

In (6.13) the instruction is to stare at nāsikā-agra – 'the forepart of the nose'. This can refer either to the tip of the nose, or its highest part, which is between the eyebrows. In any case, the important thing is, not to close the eyes completely.

न तावत्-मात्रेण Not just by that (sense-control) [one achieves liberation] किन्तु ज्ञान-द्वारेण but also by knowledge ...

**||5.29||**

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥

भोक्तारम् यज्ञ-तपसाम् सर्व-लोक-महेश्वरम् सुहृदम् सर्व-भूतानाम् ज्ञात्वा माम् शान्तिम् ऋच्छति

सर्वेषाम् लोकानाम् महा-ईश्वरः इति सर्व-लोक-महेश्वरः _the great Lord of all worlds.

यज्ञ-तपसाम् भोक्तारम् »As the enjoyer of [all] sacrifices and austerities सर्व-लोक-महेश्वरम् as the great Lord of all worlds सर्व-भूतानाम् सुहृदम् and as the friend of all beings माम् ज्ञात्वा [after] knowing me [thus] शान्तिम् ऋच्छति one attains peace (liberation).«

मद्-प्रसादेन शान्तिम्/मोक्षम् ऋच्छति One attains peace, liberation, through my grace.

**||6.1||**

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः । स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥

अनाश्रितः कर्म-फलम् कार्यम् कर्म करोति यः सः सन्न्यासी च योगी च न निरग्निः न च अ-क्रियः

कर्म-फलम् अनाश्रितः »Not resorting to the fruit of activity यः कार्यम् कर्म करोति one who does the prescribed duty सः सन्न्यासी च योगी च he is a Sannyāsī and a Yogī न निरग्निः and not he who has no [ritualistic] fire न च अ-क्रियः nor he who does no pious work.«

निरग्निः Niragni means अग्निसाध्य-इष्ट-आख्य-कर्म-त्यागी one who gives up rites called Ishta which are performed with the sacrificial fire. ... अ-क्रियः अनग्निसाध्य-पूर्त-आख्य-कर्म-त्यागी A-kriya means one who gives up philantrophic acts called Pūrta which are performed without the sacred fire. कुतः Why [is he a Sannyāsī and a Yogī]? ...

**||6.2||**

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव । न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥

यम् सन्न्यासम् इति प्राहुः योगम् तम् विद्धि पाण्डव न हि अ-सन्न्यस्त-सङ्कल्पः योगी भवति कश्चन

न सन्न्यस्तः सङ्कल्पः येन सः अ-सन्न्यस्त-सङ्कल्पः _by whom desire is not renounced.

पाण्डव »O Arjuna! यम् सन्न्यासम् इति प्राहुः That which is [highly] spoken of as Sannyāsa तम् योगम् विद्धि that know to be [the same as] [Karma-]Yoga. अ-सन्न्यस्त-सङ्कल्पः Without having renounced desire न हि कश्चन योगी भवति not anybody becomes a Yogī.«

फल-सङ्कल्प-त्याग-साम्यात् Owing to the common factor, viz., the renunciation of the desire for the fruit [of action] सन्न्यासी च he (the Karma-yogī) is also a Sannyāsī. ... फल-सङ्कल्प-त्यागात् एव And because of this renunciation of desire for the fruit चित्त-विक्षेप-अभावात् and the [resultant] ceasing of mental distractions योगी च भवति he is also a Yogī [according to Patanjali]. तर्हि यावत् जीवम् Then all through life कर्म-योगः एव प्राप्तः one will have to practice Karma-yoga? ...

||6.3||

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥

आरुरुक्षोः मुनेः योगम् कर्म कारणम् उच्यते योग-आरूढस्य तस्य एव शमः कारणम् उच्यते

योगम् आरूढः इति योग-आरूढः _ascended to Yoga.

योगम् आरुरुक्षोः मुनेः »Of a sage who wants to attain [purity of] Yoga कर्म कारणम् उच्यते work is said to be the means (because it purifies the mind), तस्य एव योग-आरूढस्य but of him who has attained [purity of] Yoga शमः कारणम् उच्यते cessation [of work] is said to be the means.«

चित्त-विक्षेप-कर्म-उपरमः Cessation of all work that distracts the mind [from meditation] ज्ञान-परिपाके कारणम् उच्यते is said to be the means for the maturity of knowledge. कीदृशः असौ योग-आरूढः What is this person like who has attained to Yoga? ...

||6.4||

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते ॥

यदा हि न इन्द्रिय-अर्थेषु न कर्मसु अनुषज्जते सर्व-सङ्कल्प-सन्न्यासी योग-आरूढः तदा उच्यते

सर्वेषाम् सङ्कल्पानाम् सन्न्यासी इति सर्व-सङ्कल्प-सन्न्यासी _a renouncer of all desires.

यदा हि सर्व-सङ्कल्प-सन्न्यासी »When one who has renounced all desires न इन्द्रिय-अर्थेषु अनुषज्जते neither has attachment in sense objects न कर्मसु nor in activities (which are a means to sense objects), तदा योग-आरूढः उच्यते then he is said to have attained Yoga.«

अतः Therefore विषय-आसक्ति-त्यागे मोक्षम् that giving up attachment to sense objects means liberation तद्-आसक्तौ च बन्धम् and attachment to them means bondage पर्यालोच्य realizing that, रागादि-स्वभावम् त्यजेत् proneness to attachment etc. should be given up:

||6.5||

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥

उद्धरेत् आत्मना आत्मानम् न आत्मानम् अवसादयेत् आत्मा एव हि आत्मनः बन्धुः आत्मा एव रिपुः आत्मनः

आत्मना आत्मानम् उद्धरेत् »Through the mind one should elevate oneself [from Samsāra] आत्मानम् न अवसादयेत् and not degrade oneself, आत्मा एव हि आत्मनः बन्धुः [because] the mind

alone [when free from attachment] is one's friend आत्मा एव आत्मनः रिपुः and the mind alone is one's enemy.«

**||6.6||**

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः। अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥
बन्धुः आत्मा आत्मनः तस्य येन आत्मा एव आत्मना जितः अन्-आत्मनः तु शत्रुत्वे वर्तेत आत्मा एव शत्रुवत्

न आत्मा यस्य सः अन्-आत्मा _whose mind is not [conquered].

येन आत्मना आत्मा एव जितः »By whose self the mind is conquered तस्य आत्मनः आत्मा बन्धुः for his self the mind is a friend, अन्-आत्मनः तु but for one who has not [conquered] the mind आत्मा एव शत्रुवत् शत्रुत्वे वर्तेत the mind, like an enemy, will act in enmity.«

जित-आत्मनः स्वस्मिन् बन्धुत्वम् स्फुटयति The friendliness of the controlled mind to himself is elucidated ...

**||6.7||**

जितात्मनः प्रशान्तस्य परमात्मा समाहितः। शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥
जित-आत्मनः प्रशान्तस्य परम् आत्मा समाहितः शीत-उष्ण-सुख-दुःखेषु तथा मान-अपमानयोः

मानः च अपमानः च इति मान-अपमानौ _honor and dishonor.

जित-आत्मनः प्रशान्तस्य »Of one who has conquered the mind and is [thus] pacified शीत-उष्ण-सुख-दुःखेषु in cold and heat, happiness and distress तथा मान-अपमानयोः and in honor and dishonor परम् आत्मा समाहितः the transendental /pure soul (or Supersoul) is established.«

**||6.8||**

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः। युक्त इत्युच्यते योगी समलोष्ट्राश्मकाञ्चनः ॥
ज्ञान-विज्ञान-तृप्त-आत्मा कूट-स्थः विजित-इन्द्रियः युक्तः इति उच्यते योगी सम-लोष्ट्र-अश्म-काञ्चनः

ज्ञानेन च विज्ञानेन च तृप्तः आत्मा यस्य सः ज्ञान-विज्ञान-तृप्त-आत्मा _whose self is satisfied by knowledge and realization. समानि लोष्ट्रः च अश्मा च काञ्चनम् च यस्य सः सम-लोष्ट्र-अश्म-काञ्चनः _for whom earth, stone and gold are the same.

ज्ञान-विज्ञान-तृप्त-आत्मा »Being satisfied by knowledge and realization कूट-स्थः विजित-इन्द्रियः situated in transcendence and sense-controlled सम-लोष्ट्र-अश्म-काञ्चनः regarding alike a lump of earth, stone and gold योगी युक्तः इति उच्यते the Yogī is said to have attained Yoga.«

**||6.9||**

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु। साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥
सुहृद्-मित्र-अरि-उदासीन-मध्यस्थ-द्वेष्य-बन्धुषु साधुषु अपि च पापेषु सम-बुद्धिः विशिष्यते

समा बुद्धिः यस्य सः सम-बुद्धिः _whose intelligence is equal.

सुहृद्-मित्र-अरि-उदासीन- »Towards well-wishers, friends, enemies, neutrals, -मध्यस्थ-द्वेष्य-बन्धुषु mediators, detestables and relatives साधुषु पापेषु अपि च and also towards the pious and sinners सम-बुद्धिः विशिष्यते he who is equal-minded is [even] superior [to the one mentioned in (6.8)].«

सुहृद् स्व-भावेन एव हित-आशंसी A well-wisher is by nature well-disposed. मित्रम् स्नेह-वशेन उपकारकः A friend does good through affection. अरिः घातकः An enemy does harm. उदासीनः विवदमानयोः उभयोः अपि उपेक्षकः A neutral is indifferent to both the contending parties. मध्य-स्थः विवदमानयोः उभयोः अपि हित-आशंसी A mediator is a well-wisher of both the contending parties. द्वेष्यः द्वेष-विषयः A detestable person is an object of aversion.

**||6.10||**

योगी युञ्जीत सततमात्मानं रहसि स्थितः। एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥

योगी युञ्जीत सततम् आत्मानम् रहसि स्थितः एकाकी यत-चित्त-आत्मा निराशीः अ-परिग्रहः

रहसि स्थितः एकाकी »Living in seclusion and alone यत-चित्त-आत्मा his mind and body controlled निराशीः अ-परिग्रहः without desire and proprietorship योगी आत्मानम् सततम् युञ्जीत the Yogī should always engage himself.«

योगी योग-आरूढः The Yogī is one who has attained to Yoga. आसन-नियमम् दर्शयन् Showing the rule regarding the Āsana आह it is stated ...

**||6.11-12||**

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥

शुचौ देशे प्रतिष्ठाप्य स्थिरम् आसनम् आत्मनः न अत्युच्छ्रितम् न अतिनीचम् चैल-अजिन-कुश-उत्तरम्

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः। उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥

तत्र एक-अग्रम् मनः कृत्वा यत-चित्त-इन्द्रिय-क्रियः उपविश्य आसने युञ्ज्यात् योगम् आत्म-विशुद्धये

चैलम् च अजिनम् च कुशेभ्यः उत्तरे यस्मिन् तद् चैल-अजिन-कुश-उत्तरम् _in which there is cloth and skin on Kusha grasses. आत्मनः विशुद्धिः इति आत्म-विशुद्धिः _purification of the mind.

शुचौ देशे »In a sanctified place न अत्युच्छ्रितम् न अतिनीचम् neither too high nor too low चैल-अजिन-कुश-उत्तरम् with cloth and deerskin on Kusha grass आत्मनः स्थिरम् आसनम् प्रतिष्ठाप्य [after thus] establishing one's firm seat, तत्र आसने उपविश्य [after] sitting down there on that seat मनः एक-अग्रम् कृत्वा [and after] concentrating the mind यत-चित्त-इन्द्रिय-क्रियः controlling the activities of mind and senses आत्म-विशुद्धये योगम् युञ्ज्यात् for the purification of the mind one should practice Yoga.«

**||6.13-14||**

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥

समम् काय-शिरः-ग्रीवम् धारयन् अ-चलम् स्थिरः सम्प्रेक्ष्य नासिका-अग्रम् स्वम् दिशः च अनवलोकयन्

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥

प्रशान्त-आत्मा विगत-भीः ब्रह्मचारि-व्रते स्थितः मनः संयम्य मद्-चित्तः युक्तः आसीत मद्-परः

नासिकायाः अग्रम् इति नासिका-अग्रम् _the tip of the nose. प्रशान्तः आत्मा यस्य सः प्रशान्त-आत्मा _whose mind is peaceful. अहम् परः यस्य सः मद्-परः _whose supreme [shelter or master] am I.

काय-शिरः-ग्रीवम् »Body, head and neck समम् अ-चलम् धारयन् [while] holding [them easily] straight and unmoving स्थिरः [and thus being] steady स्वम् नासिका-अग्रम् सम्प्रेक्ष्य [after] staring

at one's nose-tip (see note under 5.27) दिशः च अनवलोकयन् and [while] not looking around प्रशान्त-आत्मा विगत-भीः being peaceful in mind and free from fear ब्रह्मचारि-व्रते स्थितः situated in the vow of a celibate (Brahmacārī) मनः संयम्य [after thus] controlling the mind युक्तः मद्-चित्तः मद्-परः आसीत the Yogī should remain thinking of me and being devoted to me.«

**||6.15||**

युञ्जन्नेवं सदात्मानं योगी नियतमानसः । शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥

युञ्जन् एवम् सदा आत्मानम् योगी नियत-मानसः शान्तिम् निर्वाण-परमाम् मद्-संस्थाम् अधिगच्छति

नियतम् मानसम् यस्य सः नियत-मानसः _whose mind is controlled. निर्वाणम् परमम् यस्याम् सा निर्वाण-परमा _in which the supreme is liberation.

एवम् सदा आत्मानम् युञ्जन् »Thus always concentrating himself नियत-मानसः योगी the Yogī, his mind controlled निर्वाण-परमाम् मद्-संस्थाम् शान्तिम् the peace of liberation (Nirvāna), which is my residence अधिगच्छति he attains.«

**||6.16||**

नात्यश्नतस्तु योगो ऽस्ति न चैकान्तमनश्नतः । न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥

न अत्यश्नतः तु योगः अस्ति न च एकान्तम् अनश्नतः न च अतिस्वप्न-शीलस्य जाग्रतः न एव च अर्जुन

अति स्वप्तुम् शीलम् यस्य सः अतिस्वप्न-शीलः _whose habit is to sleep too much.

अर्जुन »O Arjuna! अत्यश्नतः तु योगः न अस्ति But there is no Yoga (mind-control) of one who eats too much न च एकान्तम् अनश्नतः and not of one who is only fasting न च अतिस्वप्न-शीलस्य nor of one whose habit is to sleep too much न एव च जाग्रतः and never for one who stays awake [too much].«

**||6.17||**

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

युक्त-आहार-विहारस्य युक्त-चेष्टस्य कर्मसु युक्त-स्वप्न-अवबोधस्य योगः भवति दुःख-हा

युक्तौ आहारः च विहारः च यस्य सः युक्त-आहार-विहारः _whose food and lifestyle are regulated. युक्ता चेष्टा यस्य सः युक्त-चेष्टः _whose engagement is regulated. युक्तौ स्वप्नः च अवबोधः च यस्य सः युक्त-स्वप्न-अवबोधः _whose sleeping and waking are regulated.

युक्त-आहार-विहारस्य »For one whose food and lifestyle are regulated कर्मसु युक्त-चेष्टस्य whose engagement in activities is regulated युक्त-स्वप्न-अवबोधस्य whose sleeping and waking are regulated दुःख-हा योगः भवति there is Yoga, the destroyer of misery.«

**||6.18||**

यदा विनियतं चित्तमात्मन्येवावतिष्ठते । निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥

यदा विनियतम् चित्तम् आत्मनि एव अवतिष्ठते निस्पृहः सर्व-कामेभ्यः युक्तः इति उच्यते तदा

यदा विनियतम् चित्तम् »When the well-controlled mind आत्मनि एव अवतिष्ठते stays in the self alone सर्व-कामेभ्यः निस्पृहः and when one is free from hankering for all enjoyments तदा युक्तः इति उच्यते then one is said to be in Yoga.«

**||6.19||**

**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता । योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥**

यथा दीपः निवात-स्थः न इङ्गते सा उपमा स्मृता योगिनः यत-चित्तस्य युञ्जतः योगम् आत्मनः

निवाते तिष्ठति यः सः निवात-स्थः _which stays in a windless place. यतम् चित्तम् यस्य सः यत-चित्तः _whose mind is controlled.

यथा निवात-स्थः दीपः »As a lamp in a windless place न इङ्गते does not flicker – आत्मनः योगम् युञ्जतः यत-चित्तस्य योगिनः of a Yogī of controlled mind, practicing meditation of the self सा उपमा स्मृता that comparison is given.«

**||6.20-23||**

**यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥**

यत्र उपरमते चित्तम् निरुद्धम् योग-सेवया यत्र च एव आत्मना आत्मानम् पश्यन् आत्मनि तुष्यति

**सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् । वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥**

सुखम् आत्यन्तिकम् यद् तद् बुद्धि-ग्राह्यम् अतीन्द्रियम् वेत्ति यत्र न च एव अयम् स्थितः चलति तत्त्वतः

**यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः । यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥**

यम् लब्ध्वा च अपरम् लाभम् मन्यते न अधिकम् ततः यस्मिन् स्थितः न दुःखेन गुरुणा अपि विचाल्यते

**तं विद्याद् दुःखसंयोगवियोगं योगसञ्ज्ञितम् ॥**

तम् विद्यात् दुःख-संयोग-वियोगम् योग-सञ्ज्ञितम्

योगस्य सेवा इति योग-सेवा _resort to Yoga. बुद्ध्या ग्राह्यम् इति बुद्धि-ग्राह्यम् _to be grasped by intelligence. दुःख-संयोगेन वियोगः इति दुःख-संयोग-वियोगः _separation from contact with miseries.

यत्र »Where (i.e., in which state of concentration) योग-सेवया निरुद्धम् चित्तम् the mind, controlled by Yoga practice उपरमते calmes down [that is Yoga] (thus the primary characteristic of Yoga is stated, as Patanjali defines it: Yoga is the controll of the mind’s activities), यत्र च एव and in where आत्मना आत्मानम् पश्यन् [while] seeing the self by the [pure] mind आत्मनि तुष्यति one is satisfied in the self, यत्र [and] where यद् तद् आत्यन्तिकम् अतीन्द्रियम् that infinite and transcendental बुद्धि-ग्राह्यम् सुखम् happiness, experienced by intelligence वेत्ति one knows, स्थितः च and being situated [in which state] अयम् तत्त्वतः न एव चलति this [Yogī therefore] never diverts from the truth (the self), यम् च लब्ध्वा and [after] gaining which [state] ततः अधिकम् greater than that अपरम् लाभम् न मन्यते another gain he does not know, यस्मिन् स्थितः and situated in which [state] गुरुणा दुःखेन अपि even by heavy misery न विचाल्यते he is not perturbed, तम् दुःख-संयोग-वियोगम् that [state of] freedom from misery योग-सञ्ज्ञितम् विद्यात् one should know as Yoga.«

परमात्मना क्षेत्र-ज्ञस्य योजनम् योगः The union of the embodied soul with the Supersoul (Paramātmā) is called Yoga. कर्मणि तु योग-शब्दः But the application of the word Yoga in the

sense of action (as in Karma-yoga) तद्-उपायत्वात् औपचारिकः एव is only figurative, it (Karma) being a means to Yoga.

||6.24||

स निश्चयेन योक्तव्यो योगो ऽनिर्विण्णचेतसा । सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
सः निश्चयेन योक्तव्यः योगः अ-निर्विण्ण-चेतसा सङ्कल्प-प्रभवान् कामान् त्यक्त्वा सर्वान् अ-शेषतः
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥
मनसा एव इन्द्रिय-ग्रामम् विनियम्य समन्ततः

अ-निर्विण्णम् चेतः इति अ-निर्विण्ण-चेतः _a mind which is not depressed. सङ्कल्पात् प्रभवः यस्य सः सङ्कल्प-प्रभवः _whose birth is from desire. इन्द्रियाणाम् ग्रामः इति इन्द्रिय-ग्रामः _the group of the senses.

निश्चयेन अ-निर्विण्ण-चेतसा »With determination and an undepressed mind सर्वान् सङ्कल्प-प्रभवान् कामान् all desires born of fancy (all desires which are obstructions for the attainment of Yoga) अ-शेषतः त्यक्त्वा [after] completely giving up (together with the latent impressions in the mind) मनसा एव and with the mind इन्द्रिय-ग्रामम् समन्ततः विनियम्य [after] completely controlling the group of senses (wandering in all directions), सः योगः योक्तव्यः that Yoga is to be practiced.«

||6.25||

शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥
शनैः शनैः उपरमेत् बुद्ध्या धृति-गृहीतया आत्म-संस्थम् मनः कृत्वा न किञ्चिद् अपि चिन्तयेत्

धृत्या गृहीता इति धृति-गृहीता _grasped /controlled with determination. आत्मनि सम्यक् तिष्ठति यद् तद् आत्म-संस्थम् _which is established in the self.

धृति-गृहीतया बुद्ध्या »With intelligence, controlled by concentration मनः आत्म-संस्थम् कृत्वा [after] making the mind fixed in the self शनैः शनैः उपरमेत् one should gradually calm down न किञ्चिद् अपि चिन्तयेत् [i.e.] one should not think anything.«

['Gradually' means] अभ्यास-क्रमेण नतु सहसा by gradual practice, not all of a sudden.

||6.26||

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥
यतः यतः निश्चलति मनः चञ्चलम् अस्थिरम् ततः ततः नियम्य एतद् आत्मनि एव वशम् नयेत्

यतः यतः »After whatever चञ्चलम् अ-स्थिरम् मनः निश्चलति the flickering and unsteady mind wanders, ततः ततः एतद् नियम्य [after] restraining it from that [by such Pratyāhāra] आत्मनि एव वशम् नयेत् one should bring it under the control in the self alone.«

||6.27||

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥
प्रशान्त-मनसम् हि एनम् योगिनम् सुखम् उत्तमम् उपैति शान्त-रजसम् ब्रह्म-भूतम् अ-कल्मषम्

शान्तम् रजः यस्य सः शान्त-रजसः _whose passion is pacified. प्रशान्तम् मनः यस्य सः प्रशान्त-मनसः _whose mind is pacified. In this verse, uttamam sukham is the Kartā, and shānta-rajasam ... yoginam is the Karma.

शान्त-रजसम् प्रशान्त-मनसम् »[Thus] of calmed passions and pacified mind अ-कल्मषम् ब्रह्म-भूतम् sinless and self-realized एनम् योगिनम् हि to this Yogī alone उत्तमम् सुखम् उपैति comes supreme happiness [of Samādhi].«

**||6.28||**

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥

युञ्जन् एवम् सदा आत्मानम् योगी विगत-कल्मषः सुखेन ब्रह्म-संस्पर्शम् अत्यन्तम् सुखम् अश्नुते

ब्रह्मणः संस्पर्शः यस्मिन् तद् ब्रह्म-संस्पर्शम् _in which there is perception of Brahma.

एवम् आत्मानम् सदा युञ्जन् »[While] thus always engaging himself ब्रह्म-संस्पर्शम् अत्यन्तम् सुखम् the unlimited happiness of the experience of the Supreme विगत-कल्मषः योगी सुखेन अश्नुते the sinless Yogī obtains with ease. जीवन्-मुक्तः भवति He attains liberation even while living.«

ब्रह्म-साक्षात्कारम् एव दर्शयति Now He describes realization of Brahma ...

**||6.29||**

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

सर्व-भूत-स्थम् आत्मानम् सर्व-भूतानि च आत्मनि ईक्षते योग-युक्त-आत्मा सर्वत्र सम-दर्शनः

समम् दर्शनम् यस्य सः सम-दर्शनः _whose vision is equal. योगेन युक्तः आत्मा यस्य सः योग-युक्त-आत्मा _whose self is realized by Yoga. सर्वेषु भूतेषु तिष्ठति यः सः सर्व-भूत-स्थः _who is situated in all beings.

सर्वत्र सम-दर्शनः »One who has equal vision everywhere (who sees the same Brahma everywhere) योग-युक्त-आत्मा who is self-realized by Yoga आत्मानम् सर्व-भूत-स्थम् ईक्षते he sees the Supersoul situated in all beings सर्व-भूतानि च आत्मनि and all beings in the Supersoul.«

We follow Baladeva who explains ātmānam as paramātmānam, because the next verse confirms it: yah mām sarvatra pashyati...

**||6.30||**

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

यः माम् पश्यति सर्वत्र सर्वम् च मयि पश्यति तस्य अहम् न प्रणश्यामि सः च मे न प्रणश्यति

यः माम् सर्वत्र पश्यति »One who sees me [as Supersoul] everywhere (in every being) सर्वम् च मयि पश्यति and sees everything in me, तस्य अहम् न प्रणश्यामि for him I do not disappear सः च मम/मे न प्रणश्यति and he also does not disappear for me.«

प्रत्यक्षः भूत्वा Manifesting Myself before him कृपा-दृष्ट्या तम् विलोक्य and looking at him graciously अनुगृह्णामि I favour him. इति अर्थः This is the idea. एवम्-भूतः विधि-किङ्करः स्यात् Such a person will not be subject to any [scriptural] injunction ...

||6.31||

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥

सर्व-भूत-स्थितम् यः माम् भजति एकत्वम् आस्थितः सर्वथा वर्तमानः अपि सः योगी मयि वर्तते

एकत्वम् आस्थितः »Resorting to [the vision of] unity यः सर्व-भूत-स्थितम् माम् भजति one who worships me as being situated in all beings सर्वथा वर्तमानः अपि even living in all circumstances (even by giving up all work /duty), सः योगी मयि वर्तते that Yogī lives in me.«

मुच्यते He is liberated नतु भ्रश्यति and does not degrade. इति अर्थः This is the idea.

||6.32||

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

आत्म-औपम्येन सर्वत्र समम् पश्यति यः अर्जुन सुखम् वा यदि वा दुःखम् सः योगी परमः मतः

आत्मनः औपम्यः इति आत्म-औपम्यः _similarity to oneself.

अर्जुन »O Arjuna! आत्म-औपम्येन By comparison with himself यदि सुखम् वा दुःखम् वा whether happiness or distress यः सर्वत्र समम् पश्यति one who sees equally everywhere, सः योगी परमः मतः that Yogī is [by me] considered best [among the above Yogīs].«

यथा मम सुखम् प्रियम् As pleasure is pleasing to me दुःखम् च अ-प्रियम् and pain is displeasing तथा अन्येषाम् अपि so are they to others also. इति सर्वत्र समम् पश्यन् thus seeing equally everywhere सुखम् एव सर्वेषाम् यः वाञ्छति he wishes only pleasure to all creatures नतु कस्य अपि दुःखम् and not pain to any one.

||6.33||

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन । एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥

यः अयम् योगः त्वया प्रोक्तः साम्येन मधुसूदन एतस्य अहम् न पश्यामि चञ्चलत्वात् स्थितिम् स्थिराम्

मधुसूदन »O Lord! यः अयम् योगः This Yoga which साम्येन त्वया प्रोक्तः was described by you by 'equanimity' चञ्चलत्वात् because of unsteadiness [of the mind] एतस्य स्थिराम् स्थितिम् its stable position अहम् न पश्यामि I do not see.«

||6.34||

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

चञ्चलम् हि मनः कृष्ण प्रमाथि बलवत् दृढम् तस्य अहम् निग्रहम् मन्ये वायोः इव सुदुष्करम्

कृष्ण »O Lord! मनः हि Because the mind चञ्चलम् प्रमाथि बलवत् दृढम् is restless, turbulent, strong and obstinate तस्य निग्रहम् अहम् सुदुष्करम् मन्ये its control I think to be very difficult वायोः इव like [the control] of the wind.«

देह-इन्द्रिय-क्षोभकम् ['Turbulent' means] agitating body and senses. बलवत् विचारेण अपि जेतुम् अ-शक्यम् 'Strong' means hard to control even by discrimination.

||6.35||

असंशयं महाबाहो मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

अ-संशयम् महा-बाहो मनः दुर्निग्रहम् चलम् अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते

महा-बाहो कौन्तेय »O hero Arjuna! अ-संशयम् Undoubtedly चलम् मनः दुर्निग्रहम् the restless mind is difficult to control अभ्यासेन तु वैराग्येण च but by practice and detachment गृह्यते it is controlle.«

||6.36||

असंयतात्मना योगो दुष्प्राप इति मे मतिः । वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥

अ-संयत-आत्मना योगः दुष्प्रापः इति मे मतिः वश्य-आत्मना तु यतता शक्यः अवाप्तुम् उपायतः

न संयतः आत्मा यस्य सः अ-संयत-आत्मा _whose mind is not controlled. वश्यः आत्मा यस्य सः वश्य-आत्मा _whose mind is controlled.

अ-संयत-आत्मना »By one whose mind is not controlled योगः दुष्प्रापः Yoga is difficult to attain इति मम/मे मतिः this is my opinion, वश्य-आत्मना तु but by one whose mind is controlled उपायतः यतता and who is endeavoring by [suitable] means अवाप्तुम् शक्यः it (Yoga) is possible to attain.«

||6.37||

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥

अ-यतिः श्रद्धया उपेतः योगात् चलित-मानसः अ-प्राप्य योग-संसिद्धिम् काम् गतिम् कृष्ण गच्छति

योगस्य संसिद्धिः इति योग-संसिद्धिः _the perfection of Yoga.

कृष्ण »O Lord! श्रद्धया उपेतः [Although] endowed with faith (not hypocritically) योगात् चलित-मानसः अ-यतिः the A-yati whose mind deviates from Yoga योग-संसिद्धिम् अ-प्राप्य [after] not attaining the success of Yoga [i.e., Jnāna] काम् गतिम् गच्छति what destination does he attain?«

अ-यतिः न सम्यक् यतते An A-yati does not endeavor completely शिथिल-अभ्यासः इति अर्थः i.e., he is slack in practice. तथा योगात् चलितम् मानसम् Thus his mind deviates from Yoga विषय-प्रवणम् चित्तम् i.e., his mind is inclined towards sense objects.

||6.38||

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति । अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥

कच्चिद् न उभय-विभ्रष्टः छिन्न-अभ्रम् इव नश्यति अ-प्रतिष्ठः महा-बाहो विमूढः ब्रह्मणः पथि

उभयतः विभ्रष्टः यः सः उभय-विभ्रष्टः _who has fallen from both. छिन्नम् अभ्रम् इति छिन्न-अभ्रम् _a riven cloud.

महा-बाहो »O Lord! ब्रह्मणः पथि विमूढः When bewildered on the path of the Absolute अ-प्रतिष्ठः उभय-विभ्रष्टः without support and fallen from both कच्चिद् न नश्यति does he not perish छिन्न-अभ्रम् इव like a riven cloud?«

कर्मणाम् ईश्वरे अर्पितत्वात् Because of dedicating all work to the Lord [and not to the Devas] न तावत् कर्म-फलम् स्वर्गादिकम् प्राप्नोति he does not achieve its result, heaven etc. योग-अनिष्पत्तेः च And because of not having attained Yoga न मोक्षम् प्राप्नोति he does not attain liberation. ... यथा छिन्नम् अभ्रम् As a detached cloud पूर्वस्मात् अभ्रात् विश्लिष्टम् being disconnected from the

previous cloud अभ्र-अन्तरम् च अ-प्राप्तम् सन् and not attaining another cloud मध्ये एव विलीयते is dissolved in the interval.

||6.39||

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः । त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥
एतद् मे संशयम् कृष्ण छेत्तुम् अर्हसि अ-शेषतः त्वद्-अन्यः संशयस्य अस्य छेत्ता न हि उपपद्यते

The use of etad (neut.) with samshayam (masc.), instead of enam (masc.), is Ārsha-prayoga.

कृष्ण »O Lord! एतद् मम/मे संशयम् This my doubt अ-शेषतः छेत्तुम् अर्हसि you should completely dispel, त्वद्-अन्यः अस्य संशयस्य छेत्ता [because] a dispeller of this doubt other than you न हि उपपद्यते does not exist.«

||6.40||

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ॥
पार्थ न एव इह न अमुत्र विनाशः तस्य विद्यते न हि कल्याण-कृत् कश्चिद् दुर्गतिम् तात गच्छति

कल्याणम् करोति यः सः कल्याण-कृत् _who does good.

पार्थ तात »My dear Arjuna! न एव इह न अमुत्र Neither here (in this life) nor there (in the next life) तस्य विनाशः विद्यते there is his destruction, कश्चिद् कल्याण-कृत् [because] anyone who does good दुर्गतिम् न हि गच्छति never attains misfortune.«

इह लोके नाशः 'Destruction in this world' means उभय-भ्रंशात् पातित्यम् the status of 'being fallen' from both (heaven and liberation), अमुत्र पर-लोके नाशः 'destruction hereafter', in the other world, means नरक-प्राप्तिः going to hell. ... अयम् च शुभ-कारी And he is [certainly] a doer of good श्रद्धया योगे प्रवृत्तत्वात् since he has taken to Yoga with faith.

||6.41||

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥
प्राप्य पुण्य-कृताम् लोकान् उषित्वा शाश्वतीः समाः शुचीनाम् श्रीमताम् गेहे योग-भ्रष्टः अभिजायते

योगात् भ्रष्टः इति योग-भ्रष्टः _fallen from Yoga.

पुण्य-कृताम् लोकान् प्राप्य »[After] attaining the planets of those who did piety (worshiping by Ashvamedha etc.) शाश्वतीः समाः उषित्वा [and after] dwelling [there] many years (experiencing the pleasure of living there) योग-भ्रष्टः one who has fallen from Yoga शुचीनाम् श्रीमताम् गेहे in the house of the pious and wealthy अभिजायते he is born.«

अल्प-काल-अभ्यस्त-योग-भ्रंशे गतिः The goal [attained] when falling from Yoga after having practiced a short time इयम् उक्ता this has been stated. चिर-अभ्यस्त-योग-भ्रंशे तु But when falling from Yoga after having practiced a long time पक्ष-अन्तरम् this is another case ...

||6.42||

अथवा योगिनामेव कुले भवति धीमताम् । एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥
अथवा योगिनाम् एव कुले भवति धीमताम् एतद् हि दुर्लभतरम् लोके जन्म यद् ईदृशम्

अथवा »Or else [if he was more advanced in Yoga] धीमताम् योगिनाम् एव कुले certainly in the family of wise Yogīs भवति he is born. ईदृशम् यद् जन्म Such a birth एतद् हि लोके दुर्लभतरम् this is more rare in this world (as it leads to liberation).«

**||6.43||**

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥

तत्र तम् बुद्धि-संयोगम् लभते पौर्व-देहिकम् यतते च ततः भूयः संसिद्धौ कुरु-नन्दन

बुद्ध्या संयोगः इति बुद्धि-संयोगः _the contact with intelligence.

कुरु-नन्दन »O Arjuna! तम् पौर्व-देहिकम् बुद्धि-संयोगम् That contact with previous life's knowledge (about the soul) तत्र लभते he gets there (in both kinds of births 6.41-42), ततः च भूयः and then again संसिद्धौ यतते he endeavors for perfection (liberation).«

तत्र हेतुः The reason is given ...

**||6.44||**

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो ऽपि सः । जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥

पूर्व-अभ्यासेन तेन एव ह्रियते हि अ-वशः अपि सः जिज्ञासुः अपि योगस्य शब्द-ब्रह्म अतिवर्तते

पूर्वः अभ्यासः इति पूर्व-अभ्यासः _previous practice.

तेन एव पूर्व-अभ्यासेन »[Because] by that previous practice (Abhyāsa) [of Yoga] अ-वशः अपि सः ह्रियते हि even unwillingly he is carried. योगस्य जिज्ञासुः अपि Even though a mere beginner ('inquirer') of Yoga (although he has fallen from Yoga) शब्द-ब्रह्म अतिवर्तते he surpasses the Vedas.«

कुतश्चिद् अन्तरायात् अनिच्छन् अपि Even if unwilling because of some obstacle. विषयेभ्यः परावर्त्य Being turned away from sense-objects ब्रह्म-निष्ठः क्रियते he is made to be firmly established in the soul. ... वेद-उक्त-कर्म-फलानि अतिक्रामति He surpasses the results of rituals prescribed by the Vedas. तेभ्यः अधिकम् फलम् प्राप्य i.e., achieving a result greater than those मुच्यते he is liberated.

**||6.45||**

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः । अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥

प्रयत्नात् यतमानः तु योगी संशुद्ध-किल्बिषः अनेक-जन्म-संसिद्धः ततः याति पराम् गतिम्

संशुद्धम् किल्बिषम् यस्य सः संशुद्ध-किल्बिषः _whose sin is purified. अनेक-जन्मभिः संसिद्धः इति अनेक-जन्म-संसिद्धः _perfected by many births.

प्रयत्नात् यतमानः योगी तु »The Yogī who is endeavoring with effort संशुद्ध-किल्बिषः being completely purified of sin अनेक-जन्म-संसिद्धः and perfected after many births ततः पराम् गतिम् याति then he attains the supreme destination.«

**||6.46||**

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥

तपस्विभ्यः अधिकः योगी ज्ञानिभ्यः अपि मतः अधिकः कर्मिभ्यः च अधिकः योगी तस्मात् योगी भव अर्जुन

अर्जुन »O Arjuna! योगी तपस्विभ्यः अधिकः मतः [Such] an [Ashtānga] Yogī is regarded more than ascetics (who do penance like fasting) ज्ञानिभ्यः अपि अधिकः even more than Jnānīs (who know scriptures). योगी कर्मिभ्यः च अधिकः The Yogī is greater also (of course) than Karmīs (who perform rites like Ishta and Pūrta), तस्मात् योगी भव therefore be an [Ashtānga-]Yogī.«
The indicated order is Karmī – Tapasvī – Jnānī – Yogī.

योगिनाम् अपि And even among Yogīs यम-नियमादि-पराणाम् मध्ये i.e., among those devoted to Yama, Niyama, etc. (Ashtānga-yoga) मद्-भक्तः श्रेष्ठः My devotee is superior. इति आह This is being stated ...

**||6.47||**

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥
योगिनाम् अपि सर्वेषाम् मद्-गतेना अन्तः-आत्मना श्रद्धावान् भजते यः माम् सः मे युक्ततमः मतः

सर्वेषाम् योगिनाम् अपि »And of all Yogīs मद्-गतेन अन्तः-आत्मना with his heart attached to me यः श्रद्धावान् माम् भजते the faithful one who worships me (the Lord), सः युक्ततमः मम/मे मतः he is the best Yogī in my opinion.«

अतः मद्भक्तः भव Therefore be My devotee. इति भावः That is the purport.

कीदृशः त्वम् यस्य भक्तिः कर्तव्या Of what nature are You whose worship is to be done? ...

**||7.1||**

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः। असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥
मयि आसक्त-मनाः पार्थ योगम् युञ्जन् मद्-आश्रयः असंशयम् समग्रम् माम् यथा ज्ञास्यसि तद् शृणु

आसक्तम् मनः यस्य सः आसक्त-मनाः _whose mind is attached. अहम् आश्रयः यस्य सः मद्-आश्रयः _whose shelter am I.

पार्थ »O Arjuna! मयि आसक्त-मनाः Being absorbed in me मद्-आश्रयः योगम् युञ्जन् [while] performing Yoga under my [exclusive] shelter यथा समग्रम् अ-संशयम् how completely and without doubt माम् ज्ञास्यसि you will know me, तद् शृणु hear that.«

**||7.2||**

ज्ञानं ते ऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयो ऽन्यज्ज्ञातव्यमवशिष्यते॥
ज्ञानम् ते अहम् स-विज्ञानम् इदम् वक्ष्यामि अ-शेषतः यद् ज्ञात्वा न इह भूयः अन्यत् ज्ञातव्यम् अवशिष्यते

स-विज्ञानम् इदम् ज्ञानम् »This knowledge with its realization [i.e., meditation] अहम् तुभ्यम्/ते अ-शेषतः वक्ष्यामि I will speak to you in full, यद् ज्ञात्वा [after] knowing which इह भूयः न अन्यत् ज्ञातव्यम् अवशिष्यते there remains nothing else to be known here.«

मद्-भक्तिम् विना तु But without devotion to Me मद्-ज्ञानम् दुर्लभम् knowledge about Me is impossible. अ-सङ्ख्यातानाम् जीवानाम् मध्ये मनुष्य-व्यतिरिक्तानाम् Among the innumerable creatures, excepting men श्रेयसि प्रवृत्तिः एव न अस्ति there is no inclination at all for the ultimate best (liberation) ...

||7.3||

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥

मनुष्याणाम् सहस्रेषु कश्चिद् यतति सिद्धये यतताम् अपि सिद्धानाम् कश्चिद् माम् वेत्ति तत्त्वतः

सहस्रेषु मनुष्याणाम् »Among thousands of men कश्चिद् सिद्धये यतति someone endeavors for perfection (liberation), यतताम् सिद्धानाम् अपि and among [those] endeavoring, and even among the perfected (who are liberated) कश्चिद् माम् तत्त्वतः वेत्ति [only] someone knows me in truth.«

['Liberation' means:] प्रकृष्ट-पुण्य-वशात् Through great merit (acquired in a previous life) आत्मानम् वेत्ति one knows the soul. ... कश्चिद् एव Only a rare one माम् परमात्मानम् मद्-प्रसादेन तत्त्वतः वेत्ति knows Me truly, the Supersoul, by My mercy. तद् एवम् अतिदुर्लभम् अपि मद्-ज्ञानम् Therefore, though this knowledge about Myself is thus very rare तुभ्यम् अहम् वक्ष्यामि [yet] I shall tell it to you. इति अर्थः This is the idea. एवम् श्रोतारम् अभिमुखी-कृत्या After thus making the listener attentive इदानीम् प्रकृति-द्वारा सृष्ट्यादि-कर्तृत्वेन ईश्वर-तत्त्वम् निरूपयिष्यन् now, describing the nature of the Lord as doer of creation through His energy (Prakriti) पर-अपर-भेदेन प्रकृति-द्वयम् आह the twofold Prakriti, differentiated as higher and lower, is mentioned ...

||7.4||

भूमिरापो ऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥

भूमिः आपः अनलः वायुः खम् मनः बुद्धिः एव च अहङ्कारः इति इयम् मे भिन्ना प्रकृतिः अष्टधा

भूमिः आपः अनलः वायुः »Earth, water, fire, air खम् मनः बुद्धिः अहङ्कारः एव च ether, mind, intelligence and also false ego – इति इयम् this is मम/मे अष्टधा भिन्ना प्रकृतिः my separated eightfold Prakriti.«

||7.5||

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

अपरा एयम् इतः तु अन्याम् प्रकृतिम् विद्धि मे पराम् जीव-भूताम् महा-बाहो यया इदम् धार्यते जगत्

महा-बाहो »O Arjuna! इयम् अपरा This is [my] inferior [Prakriti]. इतः तु अन्याम् But besides this, another one यया इदम् जगत् धार्यते by which this world is sustained [by work] मम/मे पराम् जीव-भूताम् प्रकृतिम् my superior Prakriti comprising the [conscious] Jīvas विद्धि you should know.«

अनयोः प्रकृतित्वम् दर्शयन् By showing the energetic nature of these two स्वस्य तद्-द्वारा सृष्ट्यादि-कारणत्वम् आह His being the cause of creation, etc., through these [energies] is stated:

||7.6||

एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥

एतद्-योनीनि भूतानि सर्वाणि इति उपधारय अहम् कृत्स्नस्य जगतः प्रभवः प्रलयः तथा

एते योनी यस्य तद् एतद्-योनि _whose two sources are these two.

सर्वाणि भूतानि एतद्-योनीनि »All beings have these [two Prakritis] as their source – इति उपधारय thus you must understand. कृत्स्नस्य जगतः [Thus] of the whole world अहम् प्रभवः तथा प्रलयः I am the creation and dissolution.«

तत्र Of these जडा प्रकृतिः the inert Prakriti देह-रूपेण परिणमते evolves in the form of the bodies. चेतना तु But the sentient [Prakriti] मद्-अंश-भूता being part of Me भोक्तृत्वेन देहेषु प्रविश्य entering into all bodies as experiencer स्व-कर्मणा तानि धारयति it sustains them through its works. ... ते च मदीये प्रकृती मत्तः सम्भूते These two Prakritis of Mine being born from Me परम-कारणम् अहम् [therefore] I am the ultimate cause [of creation, etc.]. इति अर्थः This is the idea.

||7.7||

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

मत्तः परतरम् न अन्यत् किञ्चिद् अस्ति धनञ्जय मयि सर्वम् इदम् प्रोतम् सूत्रे मणि-गणाः इव

धनञ्जय »[Therefore] O Arjuna! मत्तः परतरम् Superior to me (as creator) अन्यत् किञ्चिद् न अस्ति there is nothing else. सर्वम् इदम् मयि प्रोतम् All this [world] rests ('is strung') on me (as sustainer) सूत्रे मणि-गणाः इव like pearls on a thread.«

जगतः स्थिति-हेतुत्वम् प्रपञ्चयति How He is the cause of sustenance is described [in five verses] ...

||7.8||

रसो ऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

रसः अहम् अप्सु कौन्तेय प्रभा अस्मि शशि-सूर्ययोः प्रणवः सर्व-वेदेषु शब्दः खे पौरुषम् नृषु

शशी च सूर्यः च इति शशि-सूर्यौ _moon and sun.

कौन्तेय »O Arjuna! अप्सु अहम् रसः In [the element] water I am the taste (as its substratum), शशि-सूर्ययोः प्रभा अस्मि in moon and sun I am the light, सर्व-वेदेषु प्रणवः in all Vedas [their root] the Om (Pranava), खे शब्दः in [the element] ether the sound, नृषु पौरुषम् and in men enterprise ('ability').«

||7.9||

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ । जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥

पुण्यः गन्धः पृथिव्याम् च तेजः च अस्मि विभावसौ जीवनम् सर्व-भूतेषु तपः च अस्मि तपस्विषु

पृथिव्याम् पुण्यः गन्धः च »And in [the element] earth [I am] pure (or sweet) fragrance, विभावसौ तेजः च अस्मि and in fire I am brightness, सर्व-भूतेषु जीवनम् in all beings vitality ('life'), तपस्विषु तपः च अस्मि and in the ascetics I am austerity.«

द्वन्द्व-सहन-रूपम् तपः 'Austerity' means [here] the capacity to tolerate extremes (like heat and cold).

||7.10||

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् । बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥

बीजम् माम् सर्व-भूतानाम् विद्धि पार्थ सनातनम् बुद्धिः बुद्धिमताम् अस्मि तेजः तेजस्विनाम् अहम्

पार्थ »O Arjuna! सर्व-भूतानाम् सनातनम् बीजम् As the eternal seed of all beings माम् विद्धि know me, बुद्धिमताम् बुद्धिः अस्मि of the intelligent I am intelligence, तेजस्विनाम् अहम् तेजः of the powerful I am prowess.«

बीजम् ‘Seed’ means here सजातीय-कार्य-उत्पादन-सामर्थ्यम् the ability to produce effects of the same species. सनातनम् ‘Eternal’ means here नित्यम् उत्तरोत्तर-सर्व-कार्येषु अनुस्यूतम् [this ability] continues eternally in all successive effects.

**||7.11||**

बलं बलवतां चाहं कामरागविवर्जितम् । धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥

बलम् बलवताम् च अहम् काम-राग-विवर्जितम् धर्म-अविरुद्धः भूतेषु कामः अस्मि भरत-ऋषभ

धर्मेण न विरुद्धः इति धर्म-अ-विरुद्धः _which is not opposed by Dharma.

भरत-ऋषभ »O Arjuna! बलवताम् च And of the strong अहम् काम-राग-विवर्जितम् बलम् I am strength which is free from desire and attachment, भूतेषु in all beings धर्म-अ-विरुद्धः कामः अस्मि I am sex life which is not opposed to virtue.«

कामः ‘Desire’ (Kāma) means अ-प्राप्ते वस्तुनि अभिलाषः the wish for something unobtained राजसः and this is in Rajo-guna. रागः पुनः And ‘attachment’ (Rāga) means अभिलषिते अर्थे प्राप्ते अपि even when the desired object has been obtained पुनः अधिके अर्थे चित्त-रञ्जनात्मकः a coloring of the mind for again more of an object तृष्णा-पर्यायः compared to thirst तामसः and this is in Tamo-guna. सात्त्विकम् स्वधर्म-अनुष्ठान-सामर्थ्यम् अहम् I am the strength in Sattva-guna, the ability to perform one’s duty. इति अर्थः This is the idea.

**||7.12||**

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये । मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥

ये च एव सात्त्विकाः भावाः राजसाः तामसाः च ये मत्तः एव इति तान् विद्धि न तु अहम् तेषु ते मयि

ये च एव सात्त्विकाः भावाः »Whichever states are in goodness ये राजसाः तामसाः च [but] also which are in passion and ignorance मत्तः एव [they are] from me alone – इति तान् विद्धि thus know them. अहम् तु न तेषु But I am not in them (not subject to them like an individual soul), ते मयि [rather] they are in me (under My control).«

सात्त्विकाः भावाः States in Sattva-guna शम-दमादयः like mind-control and sense-control. ... राजसाः च हर्ष-दर्पादयः States of Rajo-guna, like pleasure and pride तामसाः च ये शोक-मोहादयः and those of Tamo-guna, like lamentation and delusion.

**||7.13||**

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥

त्रिभिः गुणमयैः भावैः एभिः सर्वम् इदम् जगत् मोहितम् न अभिजानाति माम् एभ्यः परम् अ-व्ययम्

एभिः त्रिभिः गुणमयैः भावैः »By these three states made of the Gunas मोहितम् being deluded इदम् सर्वम् जगत् this whole world एभ्यः परम् अ-व्ययम् माम् me, who am beyond these [states] and [thus] unchangeable (being their ruler) न अभिजानाति does not know.«

के तर्हि त्वाम् जानन्ति Then who are those who know You?

**||7.14||**

दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥
दैवी हि एषा गुणमयी मम माया दुरत्यया माम् एव ये प्रपद्यन्ते मायाम् एताम् तरन्ति ते

एषा गुणमयी मम दैवी माया »This my divine energy (Māyā), made of the Gunas दुरत्यया हि is certainly difficult to overcome, ये माम् एव प्रपद्यन्ते [but] those who surrender to me alone ते एताम् मायाम् तरन्ति they cross this Māyā.«

ततः माम् जानन्ति And then they know Me. किम् इति तर्हि सर्वे त्वाम् एव न भजन्ति Then why do not all worship You? ...

**||7.15||**

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। माययापहृतज्ञाना आसुरं भावमाश्रिताः॥
न माम् दुष्कृतिनः मूढाः प्रपद्यन्ते नर-अधमाः मायया अपहृत-ज्ञानाः आसुरम् भावम् आश्रिताः

नरेषु अधमः इति नर-अधमः _lowest among men. अपहृतम् ज्ञानम् यस्य सः अपहृत-ज्ञानः _whose knowledge is taken away.

मूढाः नर-अधमाः »(1) Fools (without discrimination), (2) lowest of men मायया अपहृत-ज्ञानाः (3) those whose knowledge is stolen by Māyā आसुरम् भावम् आश्रिताः (4) and those who partake of anxatheistic mentality (see 16.4) – दुष्कृतिनः माम् न प्रपद्यन्ते [these four] sinners do not surrender to me.«

Shrīdhara Svāmī explains these as four qualities of one person, the sinner (Dushkritī) – he is (1) a fool, therefore (2) low, therefore (3) his scriptural knowledge is stolen, and therefore (4) he has an demoniac attitude.

**||7.16||**

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन। आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥
चतुः-विधाः भजन्ते माम् जनाः सुकृतिनः अर्जुन आर्तः जिज्ञासुः अर्थ-अर्थी ज्ञानी च भरत-ऋषभ

अर्थम् अर्थयते यः सः अर्थ-अर्थी _who wants wealth.

भरत-ऋषभ अर्जुन »O hero Arjuna! आर्तः जिज्ञासुः अर्थ-अर्थी The (1) distressed, (2) inquisitive, (3) desirer of wealth ज्ञानी च and (4) one in knowledge [of the soul] – चतुः-विधाः सुकृतिनः जनाः [these] four kinds of pious men माम् भजन्ते worship me.«

आर्तः रोगादि-अभिभूतः The distressed one is overcome by disease etc. सः यदि पूर्वकृत-पुण्यः If he has done good deeds (Punya) in the past [lives] तर्हि माम् भजति then he worships Me. अन्यथा क्षुद्र-देवता-भजनेन संसरति Otherwise he worships minor deities and transmigrates. एवम् उत्तरत्र अपि द्रष्टव्यम् This should be seen in the other [three] cases also. जिज्ञासुः आत्म-ज्ञान-इच्छुः The inquisitive desires knowledge of the self.

**||7.17||**

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥
तेषाम् ज्ञानी नित्य-युक्तः एक-भक्तिः विशिष्यते प्रियः हि ज्ञानिनः अत्यर्थम् अहम् सः च मम प्रियः

एकस्मिन् भक्तिः यस्य सः एक-भक्तिः _whose devotion is in one.

नित्य-युक्तः एक-भक्तिः ज्ञानी »The one in knowledge [of the soul], always engaged in exclusive devotion तेषाम् विशिष्यते is best of those, अहम् हि ज्ञानिनः अत्यर्थम् प्रियः [therefore] I am very dear to this Jnānī सः च मम प्रियः and he is also dear to me.«

तर्हि किम् इतरे त्रयः त्वद्-भक्ताः संसरन्ति Then do the other three types of Your devotees undergo transmigration? नहि नहि No, never ...

**||7.18||**

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्। आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥

उदाराः सर्वे एव एते ज्ञानी तु आत्मा एव मे मतम् आस्थितः सः हि युक्त-आत्मा माम् एव अन्-उत्तमाम् गतिम्

युक्तः आत्मा यस्य सः युक्त-आत्मा _whose mind is fixed. न अस्ति उत्तमा यस्याः सा अनुत्तमा _whose superior does not exist.

एते सर्वे एव उदाराः »All of them are noble (they certainly attain liberation ज्ञानी तु but the one in knowledge [of the soul] आत्मा एव मम/मे मतम् I consider as my very self, सः हि युक्त-आत्मा [because] he, his mind fixed [on me] अन्-उत्तमाम् गतिम् माम् एव to me alone, the supreme goal आस्थितः he has resorted.«

**||7.19||**

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥

बहूनाम् जन्मनाम् अन्ते ज्ञानवान् माम् प्रपद्यते वासुदेवः सर्वम् इति सः महा-आत्मा सुदुर्लभः

महान् आत्मा यस्य सः महा-आत्मा _whose soul is great.

बहूनाम् जन्मनाम् अन्ते »In the final of many births (with the accumulation of virtue) सर्वम् वासुदेवः इति ज्ञानवान् he knows that ‘everything is Vāsudeva’ (the Supersoul) माम् प्रपद्यते and he surrenders to me. सः महा-आत्मा सुदुर्लभः Such a great soul is very rare.«

तद् एवम् कामिनः अपि सन्तः Therefore even though being possessed of desires काम-प्राप्तये परमेश्वरम् एव ये भजन्ति those who worship the Lord for the fulfilment of [those] desires ते कामान् प्राप्य they, after obtaining [those] desires शनैः मुच्यन्ते become gradually liberated. इति उक्तम् This has been stated. ये तु अत्यन्तम् राजसाः तामसाः च But those who are extremely passionate (Rājasa) or dull (Tāmasa) काम-अभिभूताः [thus] overpowered by their desires क्षुद्र-देवताः सेवन्ते they worship minor deities (Devatā) ते संसरन्ति and they transmigrate. इति आह This is being stated ...

**||7.20||**

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्ते ऽन्यदेवताः। तं तं नियममास्थाय प्रकृत्या नियताः स्वया॥

कामैः तैः तैः हृत-ज्ञानाः प्रपद्यन्ते अन्य-देवताः तम् तम् नियमम् आस्थाय प्रकृत्या नियताः स्वया

तैः तैः कामैः हृत-ज्ञानाः »Those whose intelligence is stolen by particular desires स्वया प्रकृत्या नियताः being controlled by their own nature (impressions from a previous life’s habit) तम् तम्

नियमम् आस्थाय [after] resorting to such a particular observance अन्य-देवताः प्रपद्यन्ते they worship other (lesser) gods.«

||7.21||

योयो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥

यः यः याम् याम् तनुम् भक्तः श्रद्धया अर्चितुम् इच्छति तस्य तस्य अ-चलाम् श्रद्धाम् ताम् एव विदधामि अहम्

यः यः भक्तः »The particular worshiper याम् याम् तनुम् whatever [deity] form (which is but an image of Myself) श्रद्धया अर्चितुम् इच्छति he wants to worship with faith, तस्य तस्य of that particular [worshiper] ताम् एव श्रद्धाम् that very faith अहम् अ-चलाम् विदधामि I (as Supersoul) make steady.«

||7.22||

स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हि तान् ॥

सः तया श्रद्धया युक्तः तस्याः आराधनम् ईहते लभते च ततः कामान् मया एव विहितान् हि तान्

We follow Shrīdhara Svāmī who reads tasyāh ārādhanam → tasyā āradhanam → further Sandhi by Ārsha-prayoga to tasyārādhanam.

तया श्रद्धया युक्तः »Endowed with that [particular] faith सः तस्याः आराधनम् ईहते he desires the worship of that [particular deity form], ततः च and from that [deity] मया एव हि विहितान् [actually] bestowed by me alone तान् कामान् लभते he obtains those desires.«

तद्-तद्-देवता-अन्तर्यामिणा By [Me as] the Supersoul of that particular deity. एतद् देवतानाम् अपि मद्-अधीनत्वात् Because those deities are also under My control मम मूर्तित्वात् च and because they are but forms of Mine.

तथापि तु But still साक्षात् मद्-भक्तानाम् च तेषाम् च between My direct devotees (Bhakta) and them फल-वैषम्यम् भवति there is a difference of result ...

||7.23||

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् । देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥

अन्तवत् तु फलम् तेषाम् तद् भवति अल्प-मेधसाम् देवान् देव-यजः यान्ति मद्-भक्ताः यान्ति माम् अपि

अल्पम् मेधस् यस्य सः अल्प-मेधाः _whose intelligence is small. मम भक्तः इति मद्-भक्तः _my devotee.

तेषाम् अल्प-मेधसाम् तु »But of those less intelligent तद् फलम् अन्तवत् भवति that result is temporary (although it is given by Me), देव-यजः देवान् यान्ति [because] worshipers of the Devas attain the Devas (whatever the temporary Devas can offer is also temorary) मद्-भक्ताः अपि माम् यान्ति and similarly my devotees attain me (who am unending bliss).«

ननु च But: समाने प्रयासे when there is the same endeavor महति च फल-विशेषे सति while the difference in the result is great सर्वे अपि किम् इति देवता-अन्तरम् हित्वा त्वाम् एव न भजन्ति why do not all worship You alone, giving up other deities? ...

||7.24||

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः। परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥

अव्यक्तम् व्यक्तिम् आपन्नम् मन्यन्ते माम् अ-बुद्धयः परम् भावम् अ-जानन्तः मम अ-व्ययम् अनुत्तमम्

अ-बुद्धयः »The unintelligent मम अ-व्ययम् अनुत्तमम् परम् भावम् my eternal, unsurpassed, spiritual nature अ-जानन्तः not knowing अ-व्यक्तम् माम् me who am unmanifest व्यक्तिम् आपन्नम् मन्यन्ते they consider as having assumed a [material] manifestation.«

जगत्-रक्षार्थम् लीलया As a pastime (Līlā) for the protection of the world आविष्कृत-नाना-विशुद्ध-ऊर्जित-सत्त्व-मूर्तिम् having manifested diverse forms of pure and excellent Sattva माम् परमेश्वरम् च Me, the Supreme Lord स्वकर्म-निर्मित-भौतिक-देहम् च देवता-अन्तर-समम् पश्यन्तः viewing to be equal to other Devatā with material bodies fashioned according to their own Karma मन्द-मतयः माम् न अतीव आद्रियन्ते the dull-witted do not rever Me much प्रत्युत but rather क्षिप्र-फलम् देवता-अन्तरम् एव भजन्ति they worship other gods who bestow quick results.

||7.25||

नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥

न अहम् प्रकाशः सर्वस्य योग-माया-समावृतः मूढः अयम् न अभिजानाति लोकः माम् अ-जम् अ-व्ययम्

योग-मायया समावृतः इति योग-माया-समावृतः _covered by Yoga-māyā.

योग-माया-समावृतः »[Being] covered by [my] mysterious power (Yoga-māyā) अहम् सर्वस्य न प्रकाशः I am not visible to all, अयम् मूढः लोकः [therefore] this bewildered world अ-जम् अ-व्ययम् माम् me, the unborn and eternal न अभिजानाति it does not know.«

प्रसिद्धम् हि लोके It is indeed known in this world मायायाः स्व-आश्रय-अधीनत्वम् that energy is subservient to the person in whom she rests अन्य-मोहकत्वम् च while she deludes others.

||7.26||

वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन ॥

वेद अहम् समतीतानि वर्तमानानि च अर्जुन भविष्याणि च भूतानि माम् तु वेद न कश्चन

अर्जुन »O Arjuna! समतीतानि भूतानि [All] past beings वर्तमानानि च भविष्याणि च and present and future [beings] अहम् वेद I know, माम् तु न कश्चन वेद but me no one knows.«

||7.27||

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत। सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥

इच्छा-द्वेष-समुत्थेन द्वन्द्व-मोहेन भारत सर्व-भूतानि सम्मोहम् सर्गे यान्ति परन्तप

इच्छायाः च द्वेषात् च समुत्थः इति इच्छा-द्वेष-समुत्थः _risen from desire and hatred. द्वन्द्वस्य मोहः इति द्वन्द्व-मोहः _delusion of duality.

भारत परन्तप »O Arjuna, hero! सर्गे At birth इच्छा-द्वेष-समुत्थेन द्वन्द्व-मोहेन by the illusion of dualities, arisen from desire and hatred सर्व-भूतानि सम्मोहम् यान्ति all beings attain delusion.«

तद्-अनुकूले इच्छा Desire for what is pleasing to it (the body) तद्-प्रतिकूले च द्वेषः and hatred for what is displeasing to it. ... तेन And by that [duality] सर्व-भूतानि सम्मोहम् अहम् एव सुखी दुःखी च

इति गाढतरम् अभिनिवेशम् प्राप्नुवन्ति all beings attain illusion, i.e., the very deep (gādha.tara) impression of 'I am happy', 'I am miserable'. अतः तानि मद्-ज्ञान-अभावात् न माम् भजन्ति Therefore, having no knowledge of Me, they do not worship Me. इति भावः This is the idea.

**||7.28||**

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् । ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥

येषाम् तु अन्त-गतम् पापम् जनानाम् पुण्य-कर्मणाम् ते द्वन्द्व-मोह-निर्मुक्ताः भजन्ते माम् दृढ-व्रताः

पुण्यम् कर्म यस्य सः पुण्य-कर्मा _whose work is pious. द्वन्द्वस्य मोहात् निर्मुक्तः इति द्वन्द्व-मोह-निर्मुक्तः _freed from the delusion of duality. दृढम् व्रतम् यस्य सः दृढ-व्रतः _he whose vow is strict.

पुण्य-कर्मणाम् जनानाम् तु »But those men of pious acts येषाम् पापम् अन्त-गतम् whose sin has come to an end द्वन्द्व-मोह-निर्मुक्ताः freed from the delusion of dualities (Dvandva) दृढ-व्रताः and firm in their vows ते माम् भजन्ते they worship me.«

एवम् च माम् भजन्तः Thus worshiping Me ते सर्वम् विज्ञेयम् विज्ञाय they come to know all that is to be known ...

**||7.29||**

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥

जरा-मरण-मोक्षाय माम् आश्रित्य यतन्ति ये ते ब्रह्म तद् विदुः कृत्स्नम् अध्यात्मम् कर्म च अ-खिलम्

माम् आश्रित्य »[After] taking shelter of me ये जरा-मरण-मोक्षाय यतन्ति those who endeavor for freedom from old age and death ते तद् कृत्स्नम् ब्रह्म विदुः they know that Brahma अध्यात्मम् अ-खिलम् कर्म च and Adhyātma and all about Karma.«

तम् देहादि-व्यतिरिक्तम् शुद्धम् आत्मानम् च जानन्ति And they know the pure soul, distinct from the body, etc. तद्-साधन-भूतम् अ-खिलम्/स-रहस्यम् कर्म च जानन्ति And they know all about rituals (Karma), together with the secrets (esoteric teachings, the means to this realization).

नच एवम्-भूतानाम् योग-भ्रंश-शङ्का अपि For such people there is not even the fear of falling from Yoga ...

**||7.30||**

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः । प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥

स-अधिभूत-अधिदैवम् माम् स-अधियज्ञम् च ये विदुः प्रयाण-काले अपि च माम् ते विदुः युक्त-चेतसः

युक्तम् चेतः यस्य सः युक्त-चेताः _whose mind is absorbed. प्रयाणस्य कालः इति प्रयाण-कालः _time of death.

स-अधिभूत-अधिदैवम् »Together with Adhibhūta and Adhidaiva स-अधियज्ञम् च and with Adhiyajna ये माम् विदुः those who know me युक्त-चेतसः their minds fixed [on me] प्रयाण-काले अपि च even at the time of death ते माम् विदुः they know me.«

नतु तदा अपि Not even at that time व्याकुली-भूय they are disturbed माम् विस्मरन्ति and forget Me.

||8.1||

किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम । अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥

किम् तद् ब्रह्म किम् अध्यात्मम् किम् कर्म पुरुष-उत्तम अधिभूतम् च किम् प्रोक्तम् अधिदैवम् किम् उच्यते

पुरुष-उत्तम »O Lord! तद् ब्रह्म किम् What is that Brahma, अध्यात्मम् किम् what is Adhyātma, कर्म किम् what is Karma, अधिभूतम् च किम् प्रोक्तम् what is called Adhibhūta, अधिदैवम् किम् उच्यते what is called Adhidaiva?«

||8.2||

अधियज्ञः कथं कोऽत्र देहे ऽस्मिन्मधुसूदन । प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥

अधियज्ञः कथम् कः अत्र देहे अस्मिन् मधुसूदन प्रयाण-काले च कथम् ज्ञेयः असि नियत-आत्मभिः

नियतः आत्मा यस्य सः नियत-आत्मा _whose mind is controlled.

मधुसूदन »O Lord! अधियज्ञः कः Who is Adhiyajna, कथम् अत्र अस्मिन् देहे how [does He exist] here in this body, कथम् प्रयाण-काले च and how at the time of death नियत-आत्मभिः ज्ञेयः असि you are known by the self-controlled?«

अधियज्ञः अधिष्ठाता Adhiyajna means presiding deity प्रयोजकः फल-दाता director of action, and bestower of its fruit.

||8.3||

अक्षरं ब्रह्म परमं स्वभावो ऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः ॥

अक्षरम् ब्रह्म परमम् स्व-भावः अध्यात्मम् उच्यते भूत-भाव-उद्भव-करः विसर्गः कर्म-सञ्ज्ञितः

परमम् अ-क्षरम् ब्रह्म »The supreme indestructible is Brahma स्व-भावः अध्यात्मम् उच्यते and its [individual] nature is called Adhyātma, भूत-भाव-उद्भव-करः विसर्गः the creative force which causes the origin and development of all beings कर्म-सञ्ज्ञितः is called Karma.«

ननु But: जीवः अपि अ-क्षरः Is the Jīva not also A-kshara? तत्र आह To answer this He says: परमम् यद् अ-क्षरम् The A-kshara which is supreme जगतः मूल-कारणम् i.e., the primal cause of the world तद् ब्रह्म that Brahma. ... स्वस्य एव ब्रह्मणः एव अंशतः जीव-रूपेण भवनम् स्व-भावः Of that Brahma its own coming into existence in part as the Jīva (individual soul) is called Sva-bhāva. सः एव That same [Brahma] आत्मानम् देहम् अधिकृत्य presiding over its body भोक्तृत्वेन वर्तमानः and existing as the experiencer अध्यात्म-शब्देन उच्यते is designated by the word Adhyātma. … (Verse without Sandhi und Samāsa:) अग्नौ प्रास्ता आहुतिः The oblation offered into the fire सम्यक् आदित्यम् उपतिष्ठते reaches in full the sun. आदित्यात् जायते वृष्टिः From the sun comes rain वृष्टेः अन्नम् from rain food ततः प्रजाः and from that (food) beings. (मनु-संहिता 3.76) ... देवता-उद्देशेन द्रव्य-त्याग-रूपः यज्ञः Sacrifice (Yajna) consisting of offering things to some deity सर्व-कर्मणाम् उपलक्षणम् एतद् includes by implication all rituals (Karma). सः कर्म-शब्द-वाच्यः That is the meaning of the word Karma.

||8.4||

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् । अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥

अधिभूतम् क्षरः भावः पुरुषः च अधिदैवतम् अधियज्ञः अहम् एव अत्र देहे देह-भृताम् वर

देह-भृताम् वर »O best of the embodied [Arjuna]! क्षरः भावः अधिभूतम् The destructible nature [forming bodies etc.] is Adhibhūta पुरुषः च अधिदैवतम् and the [Virāta-]Purusha is Adhidaiva, अहम् एव I am myself [as Supersoul] अत्र देहे अधियज्ञः the Adhiyajna in this body.«

[Adhidaiva:] सूर्य-मण्डलम् अध्यवर्ती Who resides over the [center of the] solar orb स्व-अंश-भूत-सर्व-देवतानाम् अधिपतिः who is the Lord of all Devas who are but parts of Him. ... [Adhiyajna:] यज्ञ-अधिष्ठात्री देवता [I am] the presiding deity of sacrifices यज्ञादि-कर्म-प्रवर्तकः the promoter of rituals like Yajnas तद्-फल-दाता च and giver of their fruits. कथम् इति 'How?' (8.2) अस्य उत्तरम् अनेन एव उक्तम् Its answer is given by this very statement. अन्तर्यामिणः अ-सङ्गत्व-आदिभिः गुणैः जीव-वैलक्षण्येन देह-अन्तः-वर्तित्वस्य प्रसिद्धत्वात् Because it is well known that the Supersoul (Antaryāmī) is different from the individual soul (Jīva) owing to qualities like non-attachment, and that He resides within the body. प्रयाण-काले च कथम् ज्ञेयः असि And how are You known at the time of death? (8.2) ...

||8.5||

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥

अन्त-काले च माम् एव स्मरन् मुक्त्वा कलेवरम् यः प्रयाति सः मद्-भावम् याति न अस्ति अत्र संशयः

अन्तस्य कालः इति अन्त-कालः _time of death. मम भावः इति मद्-भावः _my nature.

अन्त-काले च »And at the time of death माम् एव स्मरन् [while] remembering me alone कलेवरम् मुक्त्वा [after] giving up the body यः प्रयाति one who departs सः मद्-भावम् याति he attains my nature – अत्र संशयः न अस्ति of this there is no doubt.«

||8.6||

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥

यम् यम् वा अपि स्मरन् भावम् त्यजति अन्ते कलेवरम् तम् तम् एव एति कौन्तेय सदा तद्-भाव-भावितः

तद्-भावेन भावितः इति तद्-भाव-भावितः _filled with that thought.

कौन्तेय अन्ते »O Arjuna! At death यम् यम् भावम् वा अपि स्मरन् [while] remembering which particular existence कलेवरम् त्यजति one gives up the body तम् तम् एव एति to that [existence] alone he goes, सदा तद्-भाव-भावितः being [all the time] filled with that thought (which is the cause of remembering a particular object at the time of death).«

||8.7||

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च । मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥

तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च मयि अर्पित-मनः-बुद्धिः माम् एव एष्यसि अ-संशयः

अर्पिते मनः च बुद्धिः च येन सः अर्पित-मनः-बुद्धिः _by whom mind and intelligence are dedicated.

तस्मात् »Therefore सर्वेषु कालेषु माम् अनुस्मर at all times remember me युध्य च and fight. मयि अर्पित-मनः-बुद्धिः Having dedicated mind and intelligence to me माम् एव एष्यसि to me alone you will come, अ-संशयः no doubt.«

[Remember me always] यस्मात् पूर्व-वासना एव because it is a previous impression अन्त-काले स्मृति-हेतुः that causes remembrance at the time of death नहि तदा विवशस्य स्मरण-उद्यमः सम्भवति and [because] it is not possible for one helpless [at death] to make any effort at remembrance at that time. ... सन्तत-स्मरणम् च And constant remembrance चित्त-शुद्धिम् विना न भवति is not possible without purity of mind. अतः युद्धच च Therefore fight. चित्त-शुद्धि-अर्थम् For attaining purity of mind युद्ध-आदिकम् स्व-धर्मम् च अनुतिष्ठ perform your specific duty like fighting.

**||8.8||**

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना। परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥

अभ्यास-योग-युक्तेन चेतसा न अन्य-गामिना परमम् पुरुषम् दिव्यम् याति पार्थ अनुचिन्तयन्

अभ्यास-योगेन युक्तः इति अभ्यास-योग-युक्तः _concentrated by means of practice.

पार्थ »O Arjuna! अभ्यास-योग-युक्तेन By being concentrated through the means (Yoga) of practice (Abhyāsa) न अन्य-गामिना चेतसा with [such] an undeviating mind दिव्यम् परमम् पुरुषम् अनुचिन्तयन् [while] meditating on the effulgent Supreme Lord याति one attains [Him].«

**||8.9-10||**

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।

कविम् पुराणम् अनुशासितारम् अणोः अणीयांसम् अनुस्मरेत् यः

सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्॥

सर्वस्य धातारम् अ-चिन्त्य-रूपम् आदित्य-वर्णम् तमसः परस्तात्

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव।

प्रयाण-काले मनसा अ-चलेन भक्त्या युक्तः योग-बलेन च एव

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्॥

भ्रुवोः मध्ये प्राणम् आवेश्य सम्यक् सः तम् परम् पुरुषम् उपैति दिव्यम्

न चिन्त्यम् रूपम् यस्य सः अ-चिन्त्य-रूपः _whose form is not conceivable. आदित्यस्य वर्णः यस्य सः आदित्य-वर्णः _whose effulgence is that of the sun.

कविम् पुराणम् अनुशासितारम् »On the omniscient, primeval controller अणोः अणीयांसम् who is smaller than the smallest (than even ether, time and directions) सर्वस्य धातारम् who is the maintainer of all अ-चिन्त्य-रूपम् of inconceivable form (for those of impure mind and intelligence) आदित्य-वर्णम् who is effulgent like the sun (like the sun, his effulgence or nature manifests Himself and other things) तमसः परस्तात् and beyond darkness (matter), यः अनुस्मरेत् one who can meditate [on that person] प्रयाण-काले अ-चलेन मनसा at the time of death with a steady mind भक्त्या युक्तः endowed with Bhakti योग-बलेन च एव and by the power of Yoga भ्रुवोः

मध्ये प्राणम् सम्यक् आवेश्य [i.e., after] properly fixing the life-breath (Prāna) in between the eyebrows, सः तम् दिव्यम् परम् पुरुषम् उपैति he attains that effulgent Supreme Lord (Paramātmā).«

योग-बलेन By the power of Yoga सम्यक् सुषुम्ना-मार्गेण भ्रुवोः मध्ये प्राणम् आवेश्य having raised the lifebreath properly, through the channel of the Sushumnā, and fixed it in between the eyebrows. प्रयाण-काले अ-चलेन मनसा [and thus] with a steady mind [even] at the time of death.

**||8.11||**

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।

यद् अ-क्षरम् वेद-विदः वदन्ति विशन्ति यद् यतयः वीत-रागाः

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥

यद् इच्छन्तः ब्रह्म-चर्यम् चरन्ति तद् ते पदम् सङ्ग्रहेण प्रवक्ष्ये

वेदान् वेत्ति यः सः वेद-विद् _who knows the Vedas. वीतः रागः यस्य सः वीत-रागः _whose attachment is gone.

यद् वेद-विदः अ-क्षरम् वदन्ति »That which the knowers of the Vedas describe as imperishable यद् वीत-रागाः यतयः विशन्ति which sages free from attachment enter यद् इच्छन्तः ब्रह्म-चर्यम् चरन्ति and desiring which they practice Brahmacarya, तद् पदम् तुभ्यम्/ते सङ्ग्रहेण प्रवक्ष्ये that destination I will explain to you in summary.«

The A-kshara (Brahma) has two forms – the Vācaka (denotation) is the Om, and the Vācya (object itself) is the Supreme. Baladeva says that the A-kshara of the first line is the Vācaka (Om), the A-kshara of the second line is the Vācya (the Supreme) and the A-kshara of the third line refers to both.

प्रतिज्ञातम् उपायम् स-अङ्गम् आह The proposed means together with its accessories are stated ...

**||8.12-13||**

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च । मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥

सर्व-द्वाराणि संयम्य मनः हृदि निरुध्य च मूर्ध्नि आधाय आत्मनः प्राणम् आस्थितः योग-धारणाम्

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

ओम् इति एक-अक्षरम् ब्रह्म व्याहरन् माम् अनुस्मरन् यः प्रयाति त्यजन् देहम् सः याति परमाम् गतिम्

योगस्य धारणा इति योग-धारणा _steadiness of Yoga.

सर्व-द्वाराणि संयम्य »[After] controlling (withdrawing) all the gates (senses) (not perceiving external objects through the eyes, etc.) मनः हृदि निरुध्य च and [after] fixing the mind in the heart (not remembering external objects) आत्मनः प्राणम् मूर्ध्नि आधाय [after] placing one's Prāna 'on the head' (between the eye-brows) योग-धारणाम् आस्थितः established in concentration (Dhāranā) by Yoga देहम् त्यजन् [and then while] giving up the body ओम् इति एक-अक्षरम् ब्रह्म व्याहरन् pronouncing the monosyllable Om, which is Brahma Itself (as Vācaka or symbol, see note 8.11) माम् अनुस्मरन् and contemplating me [as Vācya of Om], यः प्रयाति one who [thus] departs सः परमाम् गतिम् याति attains [me,] the supreme destination.«

अन्त-काले धारणया मद्-प्राप्तिः Attaining Me at the time of death through concentration नित्य-अभ्यासवतः एव भवति is possible only for one who practices daily न अन्यस्य and for none else. इति पूर्व-उक्तम् एव अनुस्मारयति This earlier statement is recalled ...

**||8.14||**

अनन्यचेताः सततं यो मां स्मरति नित्यशः । तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥

अनन्य-चेताः सततम् यः माम् स्मरति नित्यशः तस्य अहम् सुलभः पार्थ नित्य-युक्तस्य योगिनः

न अन्यस्मिन् चेतः यस्य सः अनन्य-चेताः _whose mind is on nothing else.

पार्थ »O Arjuna! यः अन्-अन्य-चेताः One who is single-minded नित्यशः सततम् माम् स्मरति and every day always thinks of me तस्य नित्य-युक्तस्य योगिनः for such a constantly absorbed Yogī अहम् सुलभः I am easy to obtain.«

**||8.15||**

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥

माम् उपेत्य पुनः जन्म दुःख-आलयम् अ-शाश्वतम् न आप्नुवन्ति महा-आत्मानः संसिद्धिम् परमाम् गताः

महा-आत्मानः »Great souls माम् उपेत्य [after] attaining me परमाम् संसिद्धिम् गताः having achieved the supreme perfection (liberation) पुनः दुःख-आलयम् अ-शाश्वतम् जन्म again a miserable and temporary birth न आप्नुवन्ति they do not take.«

**||8.16||**

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥

आब्रह्म-भुवनात् लोकाः पुनः-आवर्तिनः अर्जुन माम् उपेत्य तु कौन्तेय पुनः जन्म न विद्यते

अर्जुन कौन्तेय »O Arjuna! आब्रह्म-भुवनात् Upto the world of Brahmā (Brahma-loka) लोकाः पुनः-आवर्तिनः [all] worlds are places of rebirth, माम् उपेत्य तु but [after] attaining me पुनः जन्म न विद्यते there is no more birth.«

**||8.17||**

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥

सहस्र-युग-पर्यन्तम् अहः यद् ब्रह्मणः विदुः रात्रिम् युग-सहस्र-अन्ताम् ते अहः-रात्र-विदः जनाः

सहस्रम् युगानि पर्यन्तः यस्य तद् सहस्र-युग-पर्यन्तः _whose extent is one thousand Yugas. युगानाम् सहस्रेण अन्तः यस्याः सा युग-सहस्र-अन्ता _whose end is after one thousand Divya-yugas. अहः च रात्रम् च वेत्ति यः सः अहः-रात्र-विद् _who knows day and night.

यद् ब्रह्मणः अहः »That a day of Brahmā सहस्र-युग-पर्यन्तम् lasts one thousand [Divya-]Yugas रात्रिम् युग-सहस्र-अन्ताम् and [his] night lasts one thousand [Divya-]Yugas विदुः those who know [this] ते अहः-रात्र-विदः जनाः they are men who know day and night.«

युग-शब्देन अत्र Here by the word Yuga चतुर्युगम् अभिप्रेतम् a Catur-yuga (all four Yugas) [also called Divya-yuga] is meant. येषाम् तु केवलम् चन्द्र-अर्क-गत्या एव ज्ञानम् But those whose knowledge [of day and night] comes only from the motion of moon and sun ते तथा अहः-रात्र-

विदः न भवन्ति they are not such knowers of day and night अल्प-दर्शित्वात् for their vision is limited.

**||8.18||**

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसञ्ज्ञके ॥

अव्यक्तात् व्यक्तयः सर्वाः प्रभवन्ति अहः-आगमे रात्रि-आगमे प्रलीयन्ते तत्र एव अव्यक्त-सञ्ज्ञके

अह्नः आगमः इति अहः-आगमः _the advent of day. रात्रेः आगमः इति रात्रि-आगमः _the arrival of night. अव्यक्तः इति सञ्ज्ञा यस्य सः अ-व्यक्त-सञ्ज्ञकः _whose name is Avyakta.

अहः-आगमे »At the advent of [Brahmā's] day अ-व्यक्तात् सर्वाः व्यक्तयः प्रभवन्ति from the unmanifest (A-vyakta, Pradhāna) all manifestations are born, रात्रि-आगमे at the arrival of [his] night तत्र एव अव्यक्त-सञ्ज्ञके प्रलीयन्ते they dissolve into that very unmanifest (A-vyakta).«

वैराग्य-अर्थम् To infuse a spirit of dispassion (Vairāgya) सृष्टि-प्रलय-प्रवाहस्य अ-विच्छेदम् दर्शयति He shows that the current of creation and dissolution is unbroken ...

**||8.19||**

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते । रात्र्यागमे ऽवशः पार्थ प्रभवत्यहरागमे ॥

भूत-ग्रामः सः एव अयम् भूत्वा भूत्वा प्रलीयते रात्रि-आगमे अ-वशः पार्थ प्रभवति अहः-आगमे

पार्थ »O Arjuna! सः एव अयम् भूत-ग्रामः That very multitude of beings (that which existed before, and none other) भूत्वा भूत्वा [after] being born again and again रात्रि-आगमे प्रलीयते at the arrival of night it dissolves अहः-आगमे अ-वशः प्रभवति and at the advent of day it helplessly manifests.«

अहः-आगमे At the advent of day अवशः कर्मादि-परतन्त्रः प्रभवति it manifests helplessly, subject to its past Karma, etc. लोकानाम् अ-नित्यत्वम् प्रपञ्च्य After elucidating the impermanence of the worlds परमेश्वर-स्वरूपस्य नित्यत्वम् प्रपञ्चयति He elaborates the eternity of the Lord's nature ...

**||8.20||**

परस्तस्मात्तु भावो ऽन्यो ऽव्यक्तो ऽव्यक्तात्सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥

परः तस्मात् तु भावः अन्यः अ-व्यक्तः अ-व्यक्तात् सनातनः यः सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति

तस्मात् अ-व्यक्तात् तु परः »But beyond that A-vyakta (unmanifest matter, Pradhāna) अन्यः अ-व्यक्तः भावः is another A-vyakta nature (spirit) यः सनातनः which is eternal सर्वेषु भूतेषु नश्यत्सु when all beings are perishing सः न विनश्यति that does not perish

अ-विनाशे प्रमाणम् दर्शयन् Giving evidence for its imperishable nature आह He says ...

**||8.21||**

अव्यक्तो ऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥

अ-व्यक्तः अ-क्षरः इति उक्तः तम् आहुः परमाम् गतिम् यम् प्राप्य न निवर्तन्ते तद् धाम परमम् मम

अ-क्षरः इति उक्तः अ-व्यक्तः »The [spiritual] A-vyakta which is called imperishable (A-kshara) तम् परमाम् गतिम् आहुः that is said to be the supreme goal, यम् प्राप्य न निवर्तन्ते [after] attaining which they do not return तद् मम परमम् धाम that is my supreme abode.«

||8.22||

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥

पुरुषः सः परः पार्थ भक्त्या लभ्यः तु अनन्यया यस्य अन्तः-स्थानि भूतानि येन सर्वम् इदम् ततम्

पार्थ »O Arjuna! यस्य अन्तः-स्थानि भूतानि In whom all beings reside येन इदम् सर्वम् ततम् and by whom all this [world] is pervaded, सः परः पुरुषः [me] that Supreme Lord अनन्यया तु भक्त्या लभ्यः is to be attained only by unalloyed devotion.«

तद् एवम् Thus [it has been stated that] परमेश्वर-उपासकाः the worshipers of the Lord तद्-पदम् प्राप्य after having attained His abode न निवर्तन्ते they do not return. अन्ये तु आवर्तन्ते But others return ...

||8.23||

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥

यत्र काले तु अनावृत्तिम् आवृत्तिम् च एव योगिनः प्रयाताः यान्ति तम् कालम् वक्ष्यामि भरत-ऋषभ

भरत-ऋषभ »O Arjuna! यत्र काले तु प्रयाताः योगिनः Yogīs, on which path ('time') having departed अनावृत्तिम् आवृत्तिम् च एव यान्ति they attain liberation or rebirth तम् कालम् वक्ष्यामि that [respective] path I shall explain.«

काल-शब्देन By the word 'time' काल-अभिमानिनीभिः अतिवाहिकीभिः देवताभिः प्राप्यः मार्गः उपलक्ष्यते the path is meant which is attained under the guidance of deities presiding time [who guide the soul].

||8.24||

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥

अग्निः ज्योतिः अहः शुक्लः षड्-मासाः उत्तर-अयणम् तत्र प्रयाताः गच्छन्ति ब्रह्म ब्रह्म-विदः जनाः

ब्रह्म वेत्ति यः सः ब्रह्म-विद् _who knows Brahma.

ब्रह्म-विदः जनाः »Men who know Brahma अग्निः ज्योतिः अहः शुक्लः [of the deities of] fire, light, day, the bright fortnight उत्तर-अयनम् षड्-मासाः and the six months of the [sun's] northern course तत्र प्रयाताः having departed on that [path] ब्रह्म गच्छन्ति they attain Brahma.«

||8.25||

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥

धूमः रात्रिः तथा कृष्णः षड-मासाः दक्षिण-अयनम् तत्र चान्द्रमसम् ज्योतिः योगी प्राप्य निवर्तते

योगी »[Whereas] the Yogī धूमः रात्रिः तथा कृष्णः [of the deities of] smoke, night and the dark fortnight दक्षिण-अयनम् षड्-मासाः and the six months of the [sun's] southern course तत्र on that [path] चान्द्रमसम् ज्योतिः प्राप्य [after] attaining heaven निवर्तते he returns.«

काम्य-कर्मभिः च Through rituals for special desires स्वर्ग-भोग-अनन्तरम् after enjoyment in heaven आवृत्तिः one returns [to this world]. निषिद्ध-कर्मभिः तु Through prohibited actions नरक-भोग-अनन्तरम् after suffering in hell आवृत्तिः one [also] returns. क्षुद्र-कर्मणाम् तु जन्तूनाम् तु While for creatures of trifling actions अत्र एव पुनः पुनः जन्म there is birth after birth in this world.

The 'light of the moon' means Svarga, which begins with the moon. The moon is sometimes identified as Pitri-loka.

**||8.26||**

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः॥
शुक्ल-कृष्णे गती हि एते जगतः शाश्वते मते एकया याति अनावृत्तिम् अन्यया आवर्तते पुनः

शुक्ला च कृष्णा च इति शुक्ल-कृष्णे _bright and dark.

शुक्ल-कृष्णे एते जगतः गती »'Bright' and 'dark' – these two paths of the world शाश्वते मते हि are considered to be eternal; एकया अनावृत्तिम् याति by one (the 'bright' path) one attains liberation अन्यया पुनः आवर्तते and by the other (the 'dark' path) one again returns.«

**||8.27||**

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन॥
न एते सृती पार्थ जानन् योगी मुह्यति कश्चन तस्मात् सर्वेषु कालेषु योग-युक्तः भव अर्जुन

पार्थ अर्जुन »O Arjuna! एते सृती जानन् Knowing these two paths कश्चन योगी न मुह्यति a Yogī is not bewildered [by so-called heaven] तस्मात् सर्वेषु कालेषु therefore, at all times योग-युक्तः भव be engaged in Yoga.«

मोक्ष-संसार-प्रापकौ जानन् Knowing them to lead to liberation or rebirth कश्चिद् अपि न मुह्यति no one is deluded सुख-बुद्ध्या स्वर्गादि-फलम् न कामयते i.e., he does not desire results like heaven as something pleasurable किन्तु परमेश्वर-निष्ठः एव भवति but is devoted to the Lord alone. इति अर्थः That is the idea.

**||8.28||**

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्।
वेदेषु यज्ञेषु तपःसु च एव दानेषु यद् पुण्य-फलम् प्रदिष्टम्
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥
अत्येति तद् सर्वम् इदम् विदित्वा योगी परम् स्थानम् उपैति च आद्यम्

पुण्यस्य फलम् इति पुण्य-फलम् _the result of piety.

वेदेषु यज्ञेषु »Through [study of] the Vedas and [performance of] sacrifices (Yajna) तपःसु दानेषु च एव through austerities and charities यद् पुण्य-फलम् प्रदिष्टम् whatever result of piety is ordained [by the scriptures] इदम् विदित्वा [after] knowing this [to be temporary] योगी तद् सर्वम् अत्येति the Yogī surpasses all that परम् आद्यम् स्थानम् उपैति च and attains the supreme primeval abode [of the Lord].«

परम्/उत्कृष्टम् The supreme, i.e., best आद्यम्/जगत्-मूलभूत-स्थानम् and primeval, i.e., which is the origin of this world विष्णोः परमम् पदम् प्राप्नोति He attains that supreme abode of Vishnu.

सप्तम-अष्टमयोः In the seventh and eighth chapters स्वीयम् पारमेश्वरम् तत्त्वम् भक्त्या एव सुलभम् न अन्यथा इति उक्त्वा after telling that His, the Lord's, existence is easily attained by devotion alone and by no other means इदानीम् now अ-चिन्त्यम् स्वकीयम् ऐश्वर्यम् भक्तेः च अ-साधारण-प्रभावम्

प्रपञ्चयिष्यन् in order to expound His own inconceivable glory and the extraordinary power of Bhakti [Shrī Krishna says] ...

**||9.1||**

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे। ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥

इदम् तु ते गुह्यतमम् प्रवक्ष्यामि अनसूयवे ज्ञानम् विज्ञान-सहितम् यद् ज्ञात्वा मोक्ष्यसे अ-शुभात्

इदम् तु गुह्यतमम् ज्ञानम् »This most confidential knowledge [about me] विज्ञान-सहितम् along with its realization (i.e., devotion) अनसूयवे तुभ्यम्/ते to you, who are not envious प्रवक्ष्यामि I will explain, यद् ज्ञात्वा [after] knowing this अ-शुभात् मोक्ष्यसे you will [instantly] be liberated from misfortune (material existence).«

गुह्यम् 'Secret' (Guhya) means धर्म-ज्ञानम् knowledge about duty /religion. ततः देहादि-व्यतिरिक्त-आत्म-ज्ञानम् गुह्यतरम् Knowledge about the soul as different from the body etc. is a greater secret (Guhyatara) than that. ततः अपि And even than that परमात्म-ज्ञानम् अतिरहस्यत्वात् गुह्यतमम् knowledge about the Supersoul is the greatest secret (Guhyatama), being a great mystery.

**||9.2||**

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्। प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥

राज-विद्या राज-गुह्यम् पवित्रम् इदम् उत्तमम् प्रत्यक्ष-अवगमम् धर्म्यम् सुसुखम् कर्तुम् अ-व्ययम्

गुह्यानाम् राजा इति राज-गुह्यम् _the king (best) of secrets. प्रत्यक्षेण अवगमः यस्य सः प्रत्यक्ष-अवगमम् _whose understanding is by direct perception.

इदम् राज-विद्या राज-गुह्यम् »It is the best ('king') of all knowledge and secrets उत्तमम् पवित्रम् supremely purifying प्रत्यक्ष-अवगमम् धर्म्यम् directly experienced and virtuous (including the fruit of all Dharma (virtuous acts) सुसुखम् कर्तुम् अ-व्ययम् very easy to perform and imperishable (its fruit is everlasting).«

ननु But: एवम् अस्य अतिसुकरत्वे If it were so easy to perform के नाम संसारिणः स्युः who would be subject to transmigration? ...

**||9.3||**

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप। अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥

अ-श्रद्दधानाः पुरुषाः धर्मस्य अस्य परन्तप अ-प्राप्य माम् निवर्तन्ते मृत्यु-संसार-वर्त्मनि

मृत्यु-संसारस्य वर्त्म इति मृत्यु-संसार-वर्त्म _the path of the cycles of deaths.

परन्तप »O Arjuna! अस्य धर्मस्य अ-श्रद्दधानाः पुरुषाः Persons without faith for this Dharma माम् अ-प्राप्य [after] not attaining me मृत्यु-संसार-वर्त्मनि निवर्तन्ते they return to the path of death and rebirth.«

**||9.4||**

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥

मया ततम् इदम् सर्वम् जगत् अव्यक्त-मूर्तिना मद्-स्थानि सर्व-भूतानि न च अहम् तेषु अवस्थितः

अ-व्यक्ता मूर्तिः यस्य सः अव्यक्त-मूर्तिः _whose form is unmanifest.

अव्यक्त-मूर्तिना मया »By me, in an unmanifest form इदम् सर्वम् जगत् ततम् all this world is pervaded (as cause). सर्व-भूतानि मद्-स्थानि All beings are situated in me अहम् तेषु न च अवस्थितः but I am not situated in (attached to) them.«

... आकाशवत्-अ-सङ्गत्वात् Because of being unattached like the sky [in which everything rests]. As subtle and remote cause, maintainer and destroyer the Lord can be said to be inside (pervading) everything. No being exists outside His energy, all beings are in Him. At the same time the Lord is unattached to His creation, free from any sense of Ahankāra (which is so typical for the Jīvas). In this sense He is not in this world.

**||9.5||**

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥

न च मद्-स्थानि भूतानि पश्य मे योगम् ऐश्वरम् भूत-भृत् न च भूत-स्थः मम आत्मा भूत-भावनः

भूतानि बिभर्ति यः सः भूत-भृत् _who maintains all beings. भूतेषु तिष्ठति यः सः भूत-स्थः _who stays in all beings. भूतानि भावयति यः सः भूत-भावनः _who creates all beings.

भूतानि न च मद्-स्थानि »Nor are the beings situated in me (which seems to contradict the previous statement (9.4) that He pervades everything. Therefore He admits that this is beyond mundane logic:). मम/मे ऐश्वरम् योगम् पश्य Behold my uncommon mysticism – मम आत्मा भूत-भावनः भूत-भृत् my self is the creator and maintainer of beings न च भूत-स्थः but not situated in (attached to) them.«

यथा जीवः Like the Jīva देहम् बिभ्रत् पालयन् च which is sustaining and protecting the body अहङ्कारेण तद्-संश्लिष्टः तिष्ठति and thus is attached to it by false ego एवम् अहम् भूतानि धारयन् पालयन् अपि although I am similarly sustaining and protecting the living beings न तेषु तिष्ठामि I am not in them (not attached to them) निरहङ्कारत्वात् because of being free from false ego. अ-संश्लिष्टयोः अपि Even between two objects not in contact with each other आधार-आधेय-भावम् there is a relation of supporter and supported दृष्टान्तेन आह [this] is being stated through an example ...

**||9.6||**

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥

यथा आकाश-स्थितः नित्यम् वायुः सर्वत्र-गः महान् तथा सर्वाणि भूतानि मद्-स्थानि इति उपधारय

सर्वत्र गच्छति यः सः सर्वत्र-गः _who goes everywhere. आकाशे स्थितः इति आकाश-स्थितः _situated in the sky.

यथा सर्वत्र-गः महान् वायुः »Just as the great wind, blowing everywhere नित्यम् आकाश-स्थितः is always situated in space (without space there is no possibility for any object to exist), तथा सर्वाणि भूतानि मद्-स्थानि so do all beings stay in me, इति उपधारय thus understand.«

तद् एवम् अ-सङ्गस्य योग-मायया स्थिति-हेतुत्वम् उक्तम् Thus it has been stated that the unattached [Lord] is the cause of sustenance through His mysterious power (Yoga-māyā). तया एव सृष्टि-

प्रलय-हेतुत्वम् च [His] being the cause of creation and dissolution also through that same [Yoga-māyā] आह is being stated [now] ...

**||9.7||**

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
सर्व-भूतानि कौन्तेय प्रकृतिम् यान्ति मामिकाम् कल्प-क्षये पुनः तानि कल्प-आदौ विसृजामि अहम्

कल्पस्य क्षयः इति कल्प-क्षयः _the decay (end) of a Kalpa. कल्पस्य आदिः इति कल्प-आदिः _the beginning of a Kalpa.

कौन्तेय »O Arjuna! कल्प-क्षये At the end of a creation (Kalpa) सर्व-भूतानि मामिकाम् प्रकृतिम् यान्ति all beings attain (are dissolved in) my Prakriti, कल्प-आदौ at the beginning of a [next] creation अहम् तानि पुनः विसृजामि I release (create) them again.«

ननु अ-सङ्गः निर्विकारः च But being unattached and changeless त्वम् कथम् सृजसि How do You create? ...

**||9.8||**

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥
प्रकृतिम् स्वाम् अवष्टभ्य विसृजामि पुनः पुनः भूत-ग्रामम् इमम् कृत्स्नम् अ-वशम् प्रकृतेः वशात्

स्वाम् प्रकृतिम् अवष्टभ्य »[After] presiding over my own Prakriti इमम् कृत्स्नम् भूत-ग्रामम् this entire multitude of beings पुनः पुनः विसृजामि I create again and again, (How?:) प्रकृतेः वशात् अ-वशम् which is helpless under the control of [its individual] nature.«

... प्राचीन-कर्म-निमित्त-तद्-स्वभाव-बलात् On the strength of their respective nature which is the result of their past Karma.

**||9.9||**

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय । उदासीनवदासीनमसक्तं तेषु कर्मसु ॥
न च माम् तानि कर्माणि निबध्नन्ति धनञ्जय उदासीनवत् आसीनम् अ-सक्तम् तेषु कर्मसु

धनञ्जय »O Arjuna! तानि कर्माणि Those activities (creation, etc.) न च माम् निबध्नन्ति do not bind me, तेषु कर्मसु अ-सक्तम् who am unattached to those activities उदासीनवत् आसीनम् and situated as if neutral.«

कर्म-आसक्तिः हि Only attachment to actions बन्ध-हेतुः is the cause of bondage. सा च And that (attachment) आप्त-कामत्वात् because My desires are already fulfilled मम न अस्ति I do not have.

**||9.10||**

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥
मया अध्यक्षेण प्रकृतिः सूयते स-चर-अचरम् हेतुना अनेन कौन्तेय जगत् विपरिवर्तते

चरैः च अ-चरैः च सह इति स-चर-अचरम् _with the moving and non-moving.

कौन्तेय »O Arjuna! मया अध्यक्षेण By me as [her] supervisor प्रकृतिः स-चर-अचरम् सूयते Prakriti creates the moving and non-moving, अनेन हेतुना जगत् विपरिवर्तते by this cause the world revolves.«

अनेन/मद्-अधिष्ठानेन हेतुना By this cause, i.e., owing to My presiding over इदम् जगत् विपरिवर्तते/पुनः पुनः जायते this world revolves, i.e., is created again and again. सन्निधि-मात्रेण अधिष्ठातृत्वात् Because My presiding [over Prakriti] consists only in [My] nearness [to Prakriti] कर्तृत्वम् उदासीनत्वम् च अ-विरुद्धम् agency and [still] indifference are not incompatible.

**||9.11-12||**

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥

अवजानन्ति माम् मूढाः मानुषीम् तनुम् आश्रितम् परम् भावम् अ-जानन्तः मम भूत-महा-ईश्वरम्

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥

मोघ-आशाः मोघ-कर्माणः मोघ-ज्ञानाः विचेतसः राक्षसीम् आसुरीम् च एव प्रकृतिम् मोहिनीम् श्रिताः

भूतानाम् महा-ईश्वरः इति भूत-महा-ईश्वरः _the great Lord of all beings. मोघाः आशाः यस्य सः मोघ-आशः _whose hopes are fruitless. मोघम् कर्म यस्य सः मोघ-कर्मा _whose activity is fruitless. मोघम् ज्ञानम् यस्य सः मोघ-ज्ञानः _whose knowledge is fruitless.

मूढाः »Fools मम भूत-महा-ईश्वरम् परम् भावम् my supreme nature as the Lord of beings अ-जानन्तः not knowing मानुषीम् तनुम् आश्रितम् for having taken a human form माम् अवजानन्ति they deride me. राक्षसीम् आसुरीम् मोहिनीम् च एव प्रकृतिम् [Because] of a violent (Rākshasa, Tāmasa), passionate (Āsura, Rājasa) and [thus] bewildering nature श्रिताः they take shelter, मोघ-आशाः मोघ-कर्माणः मोघ-ज्ञानाः they are of vain hopes, activities and knowledge विचेतसः [and therefore] they are thoughtless [and thus they deride me].«

शुद्ध-सत्त्वमयीम् अपि तनुम् Though [My] form is made of pure Sattva, [yet they deride Me] भक्त-इच्छा-वशात् मनुष्य-आकारम् आश्रितवन्तम् for having taken a human form at the instance of My devotees. ... राक्षसीम्/तामसीम् हिंसादि-प्रचुराम् Rākshasa means Tāmasa, full of violence, etc. आसुरीम् च/राजसीम् काम-दर्पादि-बहुलाम् Āsura means Rājasa, full of passion, pride, etc. ... मत्तः अन्यत्-देवता-अन्तरम् क्षिप्रम् फलम् दास्यति That another god besides Me gives the result sooner इति एवम्-भूता मोघा/निष्फला एव आशा this vain, fruitless hope. अतएव मद्-विमुखत्वात् Therefore, because they turn away from Me मोघानि/व्यर्थानि कर्माणि their activities are vain, useless.

**||9.13||**

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥

महा-आत्मानः तु माम् पार्थ दैवीम् प्रकृतिम् आश्रिताः भजन्ति अनन्य-मनसः ज्ञात्वा भूत-आदिम् अ-व्ययम्

न अन्यस्मिन् मनः यस्य सः अनन्य-मनाः _whose mind is on nothing else. भूतानाम् आदिः इति भूत-आदिः _the origin of [all] beings.

पार्थ »O Arjuna! महा-आत्मानः तु But the great souls (those who are not overcome by desire, etc.) दैवीम् प्रकृतिम् आश्रिताः having taken shelter of the divine nature अनन्य-मनसः whose minds are [thus] without deviation अ-व्ययम् भूत-आदिम् ज्ञात्वा [after] knowing the imperishable source of creation माम् भजन्ति they worship me.«

तेषाम् भजन-प्रकारम् आह Their way of worship is stated ...

||9.14||

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥
सततम् कीर्तयन्तः माम् यतन्तः च दृढ-व्रताः नमस्यन्तः च माम् भक्त्या नित्य-युक्ताः उपासते

सततम् माम् कीर्तयन्तः »Always glorifying me (with hymns, Mantras, etc.) दृढ-व्रताः यतन्तः च and (or) endeavoring with great vows नमस्यन्तः च and bowing down नित्य-युक्ताः [thus] always being absorbed [in me] माम् भक्त्या उपासते they worship me with devotion.«

||9.15||

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते । एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥
ज्ञान-यज्ञेन च अपि अन्ये यजन्तः माम् उपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतः-मुखम्

अन्ये अपि »And others ज्ञान-यज्ञेन यजन्तः च [while] sacrificing through knowledge (Jnāna-yajna) एकत्वेन [either] through oneness (A-dvaita, as being one with the Absolute) पृथक्त्वेन through difference (Dvaita, as being different from the Absolute, that 'I am a servant of the Lord') विश्वतः-मुखम् [or] as being universally present (in forms of Devas like Brahmā, Rudra, etc.) माम् बहुधा उपासते they worship me in many ways.«

सर्वात्मताम् प्रपञ्चयति अहम् इति चतुर्भिः His being the universal soul is elaborated [in verses 9.16-19] ...

||9.16||

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् । मन्त्रो ऽहमहमेवाज्यमहमग्निरहं हुतम् ॥
अहम् क्रतुः अहम् यज्ञः स्वधा अहम् अहम् औषधम् मन्त्रः अहम् अहम् एव आज्यम् अहम् अग्निः अहम् हुतम्

अहम् क्रतुः अहम् यज्ञः »I am Kratu (Agnishtoma-yajna), I am [Panca-]Yajna अहम् स्वधा अहम् औषधम् I am Svadhā (Shrāddha), I am the food /medicine (prepared from plants) अहम् मन्त्रः अहम् एव आज्यम् I am the Mantra, I am the ghee अहम् अग्निः अहम् हुतम् I am the [sacrificial] fire, I am the oblation.«

||9.17||

पिताहमस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥
पिता अहम् अस्य जगतः माता धाता पितामहः वेद्यम् पवित्रम् ओम्कारः ऋक् साम यजुः एव च

अहम् अस्य जगतः »I am of this world (Jagat) पिता माता धाता पितामहः the father, mother, maintainer and grandfather वेद्यम् पवित्रम् ओम्-कारः the knowable, the purifier, the syllable Om ऋक् साम यजुः एव च Rig-, Sāma- and Yajur-Veda.«

||9.18||

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् । प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥
गतिः भर्ता प्रभुः साक्षी निवासः शरणम् सुहृद् प्रभवः प्रलयः स्थानम् निधानम् बीजम् अ-व्ययम्

गतिः भर्ता प्रभुः साक्षी »[I am] the goal (fruit), sustainer, controller and witness [of Karma] निवासः शरणम् सुहृद् abode, shelter and friend प्रभवः प्रलयः स्थानम् creator, annihilator and maintainer निधानम् अ-व्ययम् बीजम् resting place and eternal seed.«

निधीयते अस्मिन् इति निधानम् लय-स्थानम् Nidhāna is that in which a thing remains latent, the repository. अ-व्ययम् अ-विनाशि 'Changeless' means not destructible नतु व्रीहि-आदि-बीजवत् नश्वरम् and not destructible like seeds of rice, etc.

**||9.19||**

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च । अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥

तपामि अहम् अहम् वर्षम् निगृह्णामि उत्सृजामि च अमृतम् च एव मृत्युः च सत् अ-सत् च अहम् अर्जुन

अर्जुन »O Arjuna! अहम् तपामि [as sun] I give heat अहम् वर्षम् निगृह्णामि उत्सृजामि च I withhold and send forth the rain अहम् अमृतम् च एव मृत्युः च I am immortality (life) and death सत् अ-सत् च the visible and invisible.«

सत् स्थूलम् दृश्यम् Sat means gross, visible अ-सत् च सूक्ष्मम् अ-दृश्यम् A-sat means subtle, invisible. एतद् सर्वम् अहम् एव इति मत्वा Knowing that 'all this is Myself' माम् एव बहुधा उपासते they worship me alone in different ways.

**||9.20||**

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।

त्रैविद्याः माम् सोम-पाः पूत-पापाः यज्ञैः इष्ट्वा स्वः-गतिम् प्रार्थयन्ते

ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥

ते पुण्यम् आसाद्य सुर-इन्द्र-लोकम् अश्नन्ति दिव्यान् दिवि देव-भोगान्

सोमम् पिबति यः सः सोम-पः _who drinks Soma. पूतम् पापम् यस्य सः पूत-पापः _whose sin is purified. सुर-इन्द्रस्य लोकः इति सुर-इन्द्र-लोकः _the planet of the king of the Devas (Sura). देवानाम् भोगः इति देव-भोगः _enjoyment of the gods.

त्रैविद्याः »The knowers of the Vedas यज्ञैः माम् इष्ट्वा [after] worshiping me with Yajnas सोम-पाः पूत-पापाः drinking Soma and [thus] being purified of sin स्वः-गतिम् प्रार्थयन्ते they pray for access to heaven. पुण्यम् सुर-इन्द्र-लोकम् आसाद्य [After] attaining the pious planet of Indra दिवि [there] in heaven ते दिव्यान् देव-भोगान् अश्नन्ति they enjoy celestial pleasures of the Devas.«

मम एव रूपम् देवता-अन्तरम् That other Devas are but forms of Mine इति अ-जानन्तः अपि although not knowing this वस्तुतः इन्द्रादि-रूपेण माम् एव इष्ट्वा/सम्पूज्य but actually worshiping Me alone in the form of Indra and other gods.

**||9.21||**

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।

ते तम् भुक्त्वा स्वर्ग-लोकम् विशालम् क्षीणे पुण्ये मर्त्य-लोकम् विशन्ति

एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥

एवम् त्रयी-धर्मम् अनुप्रपन्नाः गत-आगतम् काम-कामाः लभन्ते

मर्त्यानाम् लोकः इति मर्त्य-लोकः _'the world of mortals', this earth. त्रय्याः धर्मः इति त्रयी-धर्मः _the Dharma of Trayī (the three Vedas). गतः च आगतः च इति गत-आगतम् _gone and come.

तम् विशालम् स्वर्ग-लोकम् भुक्त्वा »[After] enjoying that extensive heaven पुण्ये क्षीणे [सति] when [their] piety is exhausted ते मर्त्य-लोकम् विशन्ति they [again] enter the mortal world. एवम् त्रयी-धर्मम् अनुप्रपन्नाः Thus [after] following the principles of the Vedas (Trayī) काम-कामाः those who desire sense gratification गत-आगतम् लभन्ते achieve the result of 'going and coming'.«

||9.22||

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

अनन्याः चिन्तयन्तः माम् ये जनाः पर्युपासते तेषाम् नित्य-अभियुक्तानाम् योग-क्षेमम् वहामि अहम्

योगः च क्षेमः च इति योग-क्षेमम् _gain and safety.

ये अनन्याः जनाः »[But] those unalloyed persons माम् चिन्तयन्तः पर्युपासते who worship me through meditation [on me] तेषाम् नित्य-अभियुक्तानाम् for them who are always absorbed अहम् योग-क्षेमम् वहामि I provide for their material well-being ('gain and safety').«

मोक्ष-आख्यम् च And also what is called liberation (Moksha) तैः अ-प्रार्थितम् अपि even without being asked by them अहम् एव वहामि I personally supply [that].

||9.23||

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥

ये अपि अन्य-देवता-भक्ताः यजन्ते श्रद्धया अन्विताः ते अपि माम् एव कौन्तेय यजन्ति अ-विधि-पूर्वकम्

अन्यासाम् देवतानाम् भक्तः इति अन्य-देवता-भक्तः _a devotee of other gods.

कौन्तेय »O Arjuna! ये अन्य-देवता-भक्ताः अपि Even those devotees of other deities (Devatā) श्रद्धया अन्विताः यजन्ते who worship [those deities] endowed with faith ते अपि माम् एव यजन्ति [unknowingly] they also worship me alone, अ-विधि-पूर्वकम् [though] irregularly.«

मोक्ष-प्रापकम् विधिम् विना Without [following] the rule for attaining liberation. अतः ते पुनः आवर्तन्ते Thus they return again [to this world].

||9.24||

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥

अहम् हि सर्व-यज्ञानाम् भोक्ता च प्रभुः एव च न तु माम् अभिजानन्ति तत्त्वेन अतः च्यवन्ति ते

सर्वः यज्ञः इति सर्व-यज्ञः _all [kinds of] sacrifice.

सर्व-यज्ञानाम् »Of all sacrifices अहम् हि भोक्ता च प्रभुः एव च I alone am the enjoyer and master (in the form of those respective deities), ते तु माम् तत्त्वेन न अभिजानन्ति but they do not understand me in truth अतः च्यवन्ति therefore they fall down (return again).«

||9.25||

यान्ति देवव्रता देवान्पितृन्यान्ति पितृव्रताः। भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥

यान्ति देव-व्रताः देवान् पितृन् यान्ति पितृ-व्रताः भूतानि यान्ति भूत-इज्याः यान्ति मद्-याजिनः अपि माम्

देव-व्रताः देवान् यान्ति »Worshipers of the Devas (like Indra) attain the Devas पितृ-व्रताः पितॄन् यान्ति worshipers of the Pitris attain the Pitris भूत-इज्याः भूतानि यान्ति worshipers of the Bhūtas attain the Bhūtas मद्-याजिनः माम् अपि यान्ति [similarly] my worshipers also attain me.«

तद् एवम् स्व-भक्तानाम् अक्षय-फलत्वम् उक्तम् Thus it is stated that His devotees get an undecaying fruit. अनायासत्वम् स्व-भक्तेः दर्शयति Now He shows how easy devotion to Him is ...

**||9.26||**

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥

पत्रम् पुष्पम् फलम् तोयम् यः मे भक्त्या प्रयच्छति तद् अहम् भक्ति-उपहृतम् अश्नामि प्रयत-आत्मनः

प्रयतः आत्मा यस्य सः प्रयत-आत्मा _whose mind is conquered. भक्त्या उपहृतम् इति भक्ति-उपहृतम् _offered with devotion.

पत्रम् पुष्पम् फलम् तोयम् [Just] a leaf, flower, fruit or water यः मह्यम्/मे भक्त्या प्रयच्छति one who gives me with devotion प्रयत-आत्मनः भक्ति-उपहृतम् being the devout offering of a pure soul तद् अहम् अश्नामि I enjoy that.«

प्रीत्या गृह्णामि I accept [it] with pleasure. नहि महा-विभूति-पतेः परमेश्वरस्य मम क्षुद्र-देवतानाम् इव बहु-वित्त-साध्य-यागादिभिः परितोषः स्यात् Unlike the petty gods, I, the supreme Lord, master of great powers, am not pleased by sacrifices, etc. which demand great wealth किन्तु भक्ति-मात्रेण but by devotion alone. अतः भक्तेन समर्पितम् यद् किञ्चिद् पत्रादि-मात्रम् अपि Therefore, whatever [little] is offered by the devotee, be it even a leaf etc. तद्-अनुग्रह-अर्थम् एव अश्नामि I accept it just to favor him. नच पत्र-पुष्पादिकम् अपि Not even those leaves, flowers, etc. यज्ञ-अर्थम् पशु-सोमादि-द्रव्यवत् which are like the [sacrificial] animals, Soma plants and other materials for a sacrifice मद्-अर्थम् एव उद्यमैः आपाद्य समर्पणीयम् need to be offered, procuring [them] with effort just for My sake ...

**||9.27||**

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

यद् करोषि यद् अश्नासि यद् जुहोषि ददासि यद् यद् तपस्यसि कौन्तेय तद् कुरुष्व मद्-अर्पणम्

मयि अर्पणम् इति मद्-अर्पणम् _an offering to me.

कौन्तेय »O Arjuna! यद् करोषि यद् अश्नासि Whatever you do, whatever you eat यद् जुहोषि यद् ददासि whatever you sacrifice, whatever you donate यद् तपस्यसि whatever austerity you perform तद् मद्-अर्पणम् कुरुष्व [all] that make an offering to me.«

तद् सर्वम् मयि अर्पितम् यथा भवति So that all this becomes like an offering to Me एवम् कुरुष्व thus you should do it.

**||9.28||**

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥

शुभ-अशुभ-फलैः एवम् मोक्ष्यसे कर्म-बन्धनैः सन्न्यास-योग-युक्त-आत्मा विमुक्तः माम् उपैष्यसि

शुभम् च अ-शुभम् च फले यस्य तद् शुभ-अशुभ-फलम् _whose fruits are auspicious and inauspicious. सन्न्यासस्य योगेन युक्तः आत्मा यस्य सः सन्न्यास-योग-युक्त-आत्मा _whose mind is endowed with the Yoga of renunciation.

शुभ-अशुभ-फलैः कर्म-बन्धनैः »From the good and bad results which are the bonds of Karma एवम् मोक्ष्यसे thus you will be freed, विमुक्तः being liberated [from those bonds] सन्न्यास-योग-युक्त-आत्मा and endowed with renunciation माम् उपैष्यसि you will attain me.«

कर्मणाम् मयि समर्पितत्वेन Because by the offering of activities to Me तव तद्-फल-सम्बन्ध-अनुपपत्तेः there is no possibility of your connection with their fruits. यदि भक्तेभ्यः एव मोक्षम् ददासि If You give liberation only to Your devotees न अ-भक्तेभ्यः and not to non-devotees तर्हि then तव अपि किम् राग-द्वेषादि-कृतम् वैषम्यम् अस्ति is there also partiality in You through attachment, aversion, etc.?

**||9.29||**

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

समः अहम् सर्व-भूतेषु न मे द्वेष्यः अस्ति न प्रियः ये भजन्ति तु माम् भक्त्या मयि ते तेषु च अपि अहम्

सर्व-भूतेषु अहम् समः »I am equal to all beings मम/मे न द्वेष्यः न प्रियः अस्ति [therefore] mine there is no enemy, no friend, ये तु माम् भक्त्या भजन्ति but those who worship me with devotion ते मयि they are in me अहम् अपि च तेषु and I am also in them [as their guide].«

यथा अग्नेः As there is of the fire स्व-सेवकेषु एव तमः-शीतादि-दुःखम् अपाकुर्वतः अपि which also removes the misery of darkness, cold etc., only for those who tend it न वैषम्यम् no partiality यथा वा कल्प-वृक्षस्य or as there is [no partiality] of a desire tree [which grants desired objects only to those who sit under it] तथा एव so also भक्त-पक्षपातिनः अपि though I favor [My] devotees मम वैषम्यम् न अस्ति एव there is certainly no partiality in Me किन्तु मद्-भक्तेः एव अयम् महिमा but this (9.28) is just the glory of devotion to Me. अपि च Moreover मद्-भक्तेः अ-वितर्क्यः प्रभावः the power of devotion to Me is indisputable ...

**||9.30||**

अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥

अपि चेद् सुदुराचारः भजते माम् अनन्य-भाक् साधुः एव सः मन्तव्यः सम्यक् व्यवसितः हि सः

न अन्यम् भजति इति अनन्य-भाक् _who is devoted to no other.

सुदुराचारः अपि »Even a very bad person माम् अनन्य-भाक् भजते चेद् if he worships me exclusively सः साधुः एव मन्तव्यः he is to be considered [as if already] righteous (Sādhu), सः हि सम्यक् व्यवसितः [because] he has rightly resolved.«

परमेश्वर-भजनेन एव कृतार्थः भविष्यामि [He has rightly resolved that,] 'I will be blessed by the worship of the Lord alone.' ननु कथम् समीचीन-अध्यवसाय-मात्रेण साधुः मन्तव्यः But how can he be considered saintly by a mere right resolve? ...

||9.31||

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति । कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥

क्षिप्रम् भवति धर्म-आत्मा शश्वत्-शान्तिम् निगच्छति कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति

क्षिप्रम् धर्म-आत्मा भवति »Soon he becomes righteous शश्वत्-शान्तिम् निगच्छति and attains lasting peace (faith in the Lord, which means peace from disturbances of the mind). कौन्तेय O Arjuna! मम/मे भक्तः न प्रणश्यति 'My devotee does not perish' प्रतिजानीहि [thus] proclaim.«

||9.32||

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

माम् हि पार्थ व्यपाश्रित्य ये अपि स्युः पाप-योनयः स्त्रियः वैश्याः तथा शूद्राः ते अपि यान्ति पराम् गतिम्

पापा योनिः यस्य सः पाप-योनिः _whose birth is sinful or low.

पार्थ »O Arjuna! ये अपि पाप-योनयः स्युः Even those who may be lowborn (like Antyaja) स्त्रियः वैश्याः तथा शूद्राः and women, Vaishyas and Shūdras माम् हि व्यपाश्रित्य [after] taking shelter of me ते अपि पराम् गतिम् यान्ति they also attain the supreme destination.«

ये अपि वैश्याः Even the Vaishyas केवलम् कृष्यादि-निरताः who are merely engaged in agriculture, etc. स्त्रियः शूद्रादयः च अध्ययनादि-रहिताः and women, Shūdras, etc., who are without [Vedic] study, etc.

||9.33||

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥

किम् पुनः ब्राह्मणाः पुण्याः भक्ताः राज-ऋषयः तथा अ-नित्यम् अ-सुखम् लोकम् इमम् प्राप्य भजस्व माम्

किम् पुनः »Then what [to speak of] पुण्याः ब्राह्मणाः pious Brāhmanas तथा भक्ताः राज-ऋषयः and devoted saintly kings – इमम् अ-नित्यम् अ-सुखम् लोकम् [therefore,] this temporary and miserable world प्राप्य [after] attaining माम् भजस्व worship me.«

विलम्बम् अ-कुर्वन् Not delaying अ-सुखत्वात् च सुखार्थ-उद्यमम् हित्वा giving up [all] efforts for happiness since it (the body) is joyless माम् एव भजस्व worship Me alone.

||9.34||

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥

मद्-मनाः भव मद्-भक्तः मद्-याजी माम् नमस्कुरु माम् एव एष्यसि युक्त्वा एवम् आत्मानम् मद्-परायणः

मयि मनः यस्य सः मद्-मनाः _whose mind is in me. मम भक्तः इति मद्-भक्तः _my devotee. माम् यजते यः सः मद्-याजी _who worships me, (or:) मम याजी इति मद्-याजी _my worshiper. अहम् पर-अयणम् यस्य सः मद्-परायणः _whose supreme path (shelter) am I.

मद्-मनाः मद्-भक्तः मद्-याजी भव »Think of me, be my devotee (servant) and worshiper माम् नमस्कुरु bow down to me – एवम् आत्मानम् युक्त्वा [after] thus fixing the mind मद्-परायणः devoted to me माम् एव एष्यसि you will come to me alone.«

**||10.1||**

भूय एव महाबाहो शृणु मे परमं वचः। यत्ते ऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥

भूयः एव महा-बाहो शृणु मे परमम् वचः यद् ते अहम् प्रीयमाणाय वक्ष्यामि हित-काम्यया

महा-बाहो »O Arjuna! भूयः एव And again मम/मे परमम् वचः शृणु hear my supreme word (supreme means relating to the supreme truth), यद् अहम् हित-काम्यया which I, with a desire for [your] welfare प्रीयमाणाय तुभ्यम्/ते वक्ष्यामि speak to you, who is taking delight [in My words as in nectar].«

उक्तस्य अपि पुनः वचने For repeating what has already been stated दुर्ज्ञेयत्वम् हेतुम् आह incomprehensibility is being stated as reason ...

**||10.2||**

न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥

न मे विदुः सुर-गणाः प्रभवम् न महर्षयः अहम् आदिः हि देवानाम् महर्षीणाम् च सर्वशः

सुराणाम् गणः इति सुर-गणः _the host of Suras.

न सुर-गणाः न महा-ऋषयः »Neither the host of Devas (Sura), nor the great sages मम/मे प्रभवम् विदुः know my origin, देवानाम् महा-ऋषीणाम् च [because] of the Devas and great sages अहम् हि सर्वशः आदिः I am the origin in all respects.«

अतः मद्-अनुग्रहम् विना Therefore, without My grace माम् के अपि न जानन्ति nobody can know Me. इति अर्थः This is the idea.

**||10.3||**

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्। असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥

यः माम् अ-जम् अन्-आदिम् च वेत्ति लोक-महा-ईश्वरम् अ-सम्मूढः सः मर्त्येषु सर्व-पापैः प्रमुच्यते

न आदिः यस्य सः अन्-आदिः _'which has no end', endless. सर्वः पापः इति सर्व-पापः _all [kinds of] sin.

अ-जम् अन्-आदिम् लोक-महा-ईश्वरम् च »As the unborn and beginningless supreme Lord of all beings यः माम् वेत्ति one who knows me, मर्त्येषु अ-सम्मूढः being undeluded among men सः सर्व-पापैः प्रमुच्यते he is freed from all sins.«

लोक-महेश्वरताम् एव His being the supreme Lord of all beings स्फुटयति is explained [in verses 10.4-6] ...

**||10.4-5||**

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः। सुखं दुःखं भवो ऽभावो भयं चाभयमेव च ॥

बुद्धिः ज्ञानम् अ-सम्मोहः क्षमा सत्यम् दमः शमः सुखम् दुःखम् भवः अ-भावः भयम् च अ-भयम् एव च

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः। भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥

अ-हिंसा समता तुष्टिः तपः दानम् यशः अ-यशः भवन्ति भावाः भूतानाम् मत्तः एव पृथक्-विधाः

बुद्धिः ज्ञानम् अ-सम्मोहः »Intelligence, [self-]knowledge, non-delusion क्षमा सत्यम् दमः शमः tolerance, truthfulness, sense- and mind-control सुखम् दुःखम् भवः अ-भावः happiness, distress,

existence, non-existence भयम् च अ-भयम् एव च fear and also fearlessness अ-हिंसा समता तुष्टिः non-violence, equality (non-attachment), contentment तपः दानम् यशः अ-यशः austerity, charity, fame and infamy – भूतानाम् पृथक्-विधाः भावाः [these] various dispositions of beings मत्तः एव भवन्ति come from me alone.«

**||10.6||**

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा। मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥

महर्षयः सप्त पूर्वे चत्वारः मनवः तथा मद्-भावाः मानसाः जाताः येषाम् लोके इमाः प्रजाः

मत्तः भावः यस्य सः मद्भावः _whose creation is from me (acc. to Vishvanātha).

सप्त महा-ऋषयः »The seven great sages (like Bhrigu) पूर्वे चत्वारः the previous four [sages] (like Sanaka) तथा मनवः and the Manus (like Svāyambhuva) येषाम् लोके इमाः प्रजाः whose are all these descendants in the world मानसाः जाताः मद्-भावाः come from me, born from [my] mind (or: mad-bhāvāh means in whom there is My power).«

**||10.7||**

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः। सोऽविकल्पेन योगेन युज्यते नात्र संशयः ॥

एताम् विभूतिम् योगम् च मम यः वेत्ति तत्त्वतः सः अ-विकल्पेन योगेन युज्यते न अत्र संशयः

एताम् मम विभूतिम् योगम् च »This my opulence (Vibhūti) and mystic power (Yoga) यः तत्त्वतः वेत्ति one who knows in truth, सः अ-विकल्पेन योगेन युज्यते he is united [with me] by unalloyed meditation, अत्र न संशयः of this there is no doubt.«

यथा च विभूति-योगयोः ज्ञानेन How through the knowledge of [His] glory and power सम्यक्-ज्ञान-अवाप्तिः complete realization is attained तद् दर्शयति is being shown [in four verses] ...

**||10.8||**

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥

अहम् सर्वस्य प्रभवः मत्तः सर्वम् प्रवर्तते इति मत्वा भजन्ते माम् बुधाः भाव-समन्विताः

भावेन समन्वितः इति भाव-समन्वितः _endowed with love.

अहम् सर्वस्य प्रभवः »I am the source of everything मत्तः सर्वम् प्रवर्तते from me everything originates (see 10.4) – इति मत्वा [after] knowing this भाव-समन्विताः बुधाः माम् भजन्ते the wise worship me with love.«

**||10.9||**

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥

मद्-चित्ताः मद्-गत-प्राणाः बोधयन्तः परस्परम् कथयन्तः च माम् नित्यम् तुष्यन्ति च रमन्ति च

मयि चित्तम् यस्य सः मद्-चित्तः _whose mind /thought is in me. माम् गतः प्राणः यस्य सः मद्-गत-प्राणः _whose life has gone to Me.

मद्-चित्ताः मद्-गत-प्राणाः »Thinking of me, their lives devoted to me परस्परम् बोधयन्तः enlightening each other (through scriptural and other references) माम् नित्यम् कथयन्तः च and always discussing (glorifying) me तुष्यन्ति च रमन्ति च they are satisfied and happy.«

एवम्-भूतानाम् च And to such persons सम्यक्-ज्ञानम् अहम् ददामि I grant complete realization ...

**||10.10||**

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥

तेषाम् सतत-युक्तानाम् भजताम् प्रीति-पूर्वकम् ददामि बुद्धि-योगम् तम् येन माम् उपयान्ति ते

बुद्ध्या योगः इति बुद्धि-योगः _Yoga through intelligence.

तेषाम् सतत-युक्तानाम् »To those who are constantly devoted प्रीति-पूर्वकम् भजताम् worshiping [me] with love तम् बुद्धि-योगम् ददामि I give that means to understand (i.e., intelligence) येन ते माम् उपयान्ति by which they attain me.«

बुद्धि-योगम् दत्त्वा च And after giving the means to understand तस्य अनुभव-पर्यन्तम् तम् आपाद्य and making it last till his realization comes अविद्या-कृतम् संसारम् नाशयामि I destroy his material existence that results from ignorance ...

**||10.11||**

तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

तेषाम् एव अनुकम्पा-अर्थम् अहम् अज्ञान-जम् तमः नाशयामि आत्म-भाव-स्थः ज्ञान-दीपेन भास्वता

अनुकम्पायाः अर्थम् इति अनुकम्पा-अर्थम् _for the sake of compassion. आत्मनः भावे तिष्ठति यः सः आत्म-भाव-स्थः _who stays in one's heart. ज्ञानस्य दीपः इति ज्ञान-दीपः _lamp of knowledge.

तेषाम् एव अनुकम्पा-अर्थम् »Out of mercy for them आत्म-भाव-स्थः being [personally] situated in their heart भास्वता ज्ञान-दीपेन with the shining lamp of knowledge अहम् अज्ञान-जम् तमः नाशयामि I destroy the darkness (called material existence) born of ignorance.«

**||10.12-13||**

परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥

परम् ब्रह्म परम् धाम पवित्रम् परमम् भवान् पुरुषम् शाश्वतम् दिव्यम् आदि-देवम् अ-जम् विभुम्

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥

आहुः त्वाम् ऋषयः सर्वे देव-ऋषिः नारदः तथा असितः देवलः व्यासः स्वयम् च एव ब्रवीषि मे

देवानाम् आदिः इति आदि-देवः _the first of gods.

भवान् परम् ब्रह्म »You are the Supreme Absolute परम् धाम परमम् पवित्रम् the supreme abode and the supreme pure शाश्वतम् दिव्यम् पुरुषम् the eternal divine person आदि-देवम् अ-जम् विभुम् primeval Lord, unborn and all-pervading – सर्वे ऋषयः all sages देव-ऋषिः नारदः [like] Devarshi Nārada असितः देवलः तथा व्यासः Asita, Devala and Vyāsa त्वाम् आहुः they call you स्वयम् च एव मह्यम्/मे ब्रवीषि and you yourself are also telling to me.«

Nārada is a son and disciple of Brahmā. He is the principle Devarshi, or the chief sage amongst the demigods and initiated famous kings, such as Prahlāda Mahārāja (while still in the womb of his mother), Dhruva Mahārāja, Yudhishthira Mahārāja, and even Vyāsadeva, the compiler of all Vedic literature. Asita, Devala, Vaishampāyana, Sumantu and Jaimini were disciples of Vyāsadeva, and prominent priests at the Sarpa-yajna of King Janamejaya. Asita explained 1,500,000 verses from the Mahābhārata. By the blessing of Lord Shiva he got a son named

Devala. Devala ('Asita Devala'), the son of Asita, also known as Ashtāvakra, was also a disciple of Vyāsa. After Vyāsa wrote the Mahābhārata, Nārada spread it among the Devas, Devala among the Pitris, Shukadeva among Gandharvas and Yakshas, and Vaishampāyana among men.

**||10.14||**

सर्वमेतदृतं मन्ये यन्मां वदसि केशव। न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥

सर्वम् एतद् ऋतम् मन्ये यद् माम् वदसि केशव न हि ते भगवन् व्यक्तिम् विदुः देवाः न दानवाः

केशव »O Lord! यद् माम् वदसि What you tell me एतद् सर्वम् ऋतम् मन्ये all this I consider true. भगवन् O Lord! न हि देवाः न दानवाः Indeed, neither Devas nor Dānavas तव/ते व्यक्तिम् विदुः know your personality.«

Of the sixty daughters of Prajāpati Daksha, Kashyapa Muni married thirteen (like Aditi, Diti and Danu). The descendents of Aditi (the 'Ādityas' like Vāmana) are the Devas, whereas the descendents of Diti (the 'Daityas' like Hiranyakashipu) and Danu (the 'Dānavas' like Rāhu) are considered demons.

**||10.15||**

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम। भूतभावन भूतेश देवदेव जगत्पते ॥

स्वयम् एव आत्मना आत्मानम् वेत्थ त्वम् पुरुष-उत्तम भूत-भावन भूत-ईश देव-देव जगत्-पते

भूतानाम् ईशः इति भूत-ईशः _the lord of beings. देवानाम् देवः इति देव-देवः _god of all gods. जगतः पतिः इति जगत्-पतिः _'protector of the world', a king.

पुरुष-उत्तम भूत-भावन भूत-ईश देव-देव जगत्-पते »O Lord! त्वम् स्वयम् एव Only you yourself आत्मना आत्मानम् वेत्थ know yourself by yourself.«

**||10.16||**

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः। याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥

वक्तुम् अर्हसि अ-शेषेण दिव्या हि आत्म-विभूतयः याभिः विभूतिभिः लोकान् इमान् त्वम् व्याप्य तिष्ठसि

आत्मनः विभूतिः इति आत्म-विभूतिः _'opulence of the self', own glory.

दिव्याः हि आत्म-विभूतयः »Because [your] opulences are divine याभिः विभूतिभिः those opulences by which इमान् लोकान् व्याप्य [after] pervading these worlds त्वम् तिष्ठसि you exist, अ-शेषेण वक्तुम् अर्हसि you should speak in detail.«

कथन-प्रयोजनम् दर्शयन् प्रार्थयते Showing the need for telling, he prays ...

**||10.17||**

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्। केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥

कथम् विद्याम् अहम् योगिन् त्वाम् सदा परिचिन्तयन् केषु केषु च भावेषु चिन्त्यः असि भगवन् मया

योगिन् »O Lord! सदा परिचिन्तयन् [While] always meditating कथम् अहम् त्वाम् विद्याम् how can I know you? भगवन् O Lord! केषु केषु भावेषु च In which particular forms मया चिन्त्यः असि are you to be remembered by me?«

**||10.18||**

विस्तरेणात्मनो योगं विभूतिं च जनार्दन । भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥

विस्तरेण आत्मनः योगम् विभूतिम् च जनार्दन भूयः कथय तृप्तिः हि शृण्वतः न अस्ति मे अमृतम्

जनार्दन »O Lord! आत्मनः योगम् विभूतिम् च Your personal mystic power (Yoga) and opulence भूयः विस्तरेण कथय please tell again in detail, अमृतम् शृण्वतः [for while] hearing this nectar मम/मे तृप्तिः हि न अस्ति mine there is no satiation.«

**||10.19||**

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः । प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥

हन्त ते कथयिष्यामि दिव्याः हि आत्म-विभूतयः प्राधान्यतः कुरु-श्रेष्ठ न अस्ति अन्तः विस्तरस्य मे

कुरूणाम् श्रेष्ठः इति कुरु-श्रेष्ठः _best of the Kurus.

हन्त कुरु-श्रेष्ठ »Indeed, Arjuna! आत्म-विभूतयः दिव्याः हि My opulences are indeed divine. तुभ्यम्/ते प्राधान्यतः कथयिष्यामि I will tell them [only] in essence to you मम/मे विस्तरस्य [because] of my expansion अन्तः न अस्ति there is no end.«

**||10.20||**

अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यं च भूतानामन्त एव च ॥

अहम् आत्मा गुडाका-ईश सर्व-भूत-आशय-स्थितः अहम् आदिः च मध्यम् च भूतानाम् अन्तः एव च

सर्वेषाम् भूतानाम् आशये स्थितः इति सर्व-भूत-आशय-स्थितः _situated in the heart of all beings.

गुडाका-ईश »O Arjuna! अहम् सर्व-भूत-आशय-स्थितः आत्मा I am the Supersoul, situated in the heart of all beings, अहम् भूतानाम् आदिः च I am the beginning (cause of birth) of all beings मध्यम् च अन्तः एव च the middle (existence) and also the end (death).«

**||10.21||**

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् । मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥

आदित्यानाम् अहम् विष्णुः ज्योतिषाम् रविः अंशुमान् मरीचिः मरुताम् अस्मि नक्षत्राणाम् अहम् शशी

Two types of Shashthī are indicated – Sambandha-shashthī we will translate as 'of', and Nirdhārana-shashthī ('specifying one out of many') we will translate as 'among'.

आदित्यानाम् अहम् विष्णुः »Among the [12] Ādityas I am Vishnu (Vāmana) ज्योतिषाम् अंशुमान् रविः among luminaries the radiant sun (Ravi) मरुताम् मरीचिः अस्मि among the [49] Maruts I am Marīci नक्षत्राणाम् अहम् शशी and among stars I am the moon.«

In His fifth incarnation Shrī Vishnu appeared as a son of Aditi, Vāmana. As a boy he attended the sacrifice of Bali Mahārāja, king of the demons, who had conquered Indra. Because it is the duty of a king to give charity, Vāmana asked Bali for just three steps of land. When this was granted, he expanded his body and took possession of the whole world.

**||10.22||**

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः । इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥

वेदानाम् साम-वेदः अस्मि देवानाम् अस्मि वासवः इन्द्रियाणाम् मनः च अस्मि भूतानाम् अस्मि चेतना

वेदानाम् साम-वेदः अस्मि »Among the Vedas I am the Sāma-Veda देवानाम् वासवः अस्मि among the Devas I am Indra (Vāsava) इन्द्रियाणाम् मनः च अस्मि among the senses I am the mind भूतानाम् चेतना अस्मि and of (in) living beings I am counsciousness (the faculty of knowledge).«

**||10.23||**

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् । वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥

रुद्राणाम् शङ्करः च अस्मि वित्त-ईशः यक्ष-रक्षसाम् वसूनाम् पावकः च अस्मि मेरुः शिखरिणाम् अहम्

रुद्राणाम् शङ्करः च अस्मि »Among the [11] Rudras I am Shankara (Shiva) यक्ष-रक्षसाम् वित्त-ईशः among the Yakshas and Rakshasas Kuvera वसूनाम् पावकः च अस्मि among the [8] Vasus I am Agni शिखरिणाम् अहम् मेरुः and among mountains I am Meru (Sumeru).«

A Yaksha is an attendant of Kuvera. A Rakshas is a similar semi-divine being, sometimes classified as demon. From the word rakshas comes the word rākshasa (demoniac).

**||10.24||**

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् । सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥

पुरोधसाम् च मुख्यम् माम् विद्धि पार्थ बृहस्पतिम् सेनानीनाम् अहम् स्कन्दः सरसाम् अस्मि सागरः

पार्थ »O Arjuna! पुरोधसाम् Among priests मुख्यम् बृहस्पतिम् च माम् विद्धि know me as the chief, Brihaspati सेनानीनाम् अहम् स्कन्दः among generals I am Kārtikeya सरसाम् सागरः अस्मि and among reservoirs of water I am the ocean.«

Brihaspati, the second son of Angirā, is the Guru of the Devas, whereas Shukrācārya is the Guru of the Asuras.

**||10.25||**

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् । यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥

महा-ऋषीणाम् भृगुः अहम् गिराम् अस्मि एकम् अ-क्षरम् यज्ञानाम् जपयज्ञः अस्मि स्थावराणाम् हिमालयः

जपस्य यज्ञः इति जप-यज्ञः _'the sacrifice of Japa', chanting Mantras on beads.

महा-ऋषीणाम् अहम् भृगुः »Among great sages I am Bhrigu गिराम् एकम् अ-क्षरम् अस्मि among words I am the one syllable [Om] यज्ञानाम् जप-यज्ञः अस्मि among sacrifices I am chanting Japa स्थावराणाम् हिमालयः and among immovables the Himālaya.«

Japa is the more or less silent repetition of prayers or names of God.

**||10.26||**

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः । गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥

अश्वत्थः सर्व-वृक्षाणाम् देव-ऋषीणाम् च नारदः गन्धर्वाणाम् चित्ररथः सिद्धानाम् कपिलः मुनिः

सर्व-वृक्षाणाम् अश्वत्थः »Among all trees [I am] the Peepal (Ashvattha, see 15.1) देव-ऋषीणाम् नारदः च among Devarshis Nārada गन्धर्वाणाम् चित्ररथः among Gandharvas Citraratha सिद्धानाम् कपिलः मुनिः and among perfected beings (who understood the highest truth from their very birth) Kapila Muni.«

||10.27||

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्। ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥

उच्चैःश्रवसम् अश्वानाम् विद्धि माम् अमृत-उद्भवम् ऐरावतम् गज-इन्द्राणाम् नराणाम् च नर-अधिपम्

अमृतात् उद्भवः यस्य सः अमृत-उद्भवः _whose generation is from nectar. गजानाम् इन्द्रः इति गज-इन्द्रः _the king of elephants.

अश्वानाम् »Among horses अमृत-उद्भवम् उच्चैःश्रवसम् माम् विद्धि know me as the Uccaihshrava, born of nectar गज-इन्द्राणाम् ऐरावतम् among lordly elephants as Airāvata नराणाम् च नर-अधिपम् and among men as king.«

Once Durvāsa Muni cursed the Devas to become subject to the infirmities of old age. To redeem themselves from the curse, they had to churn the Kshīrodaka (ocean of milk), and drink the nectar produced thereof. The first object that rose to the surface was Kālakūta poison. But after Lord Shiva had removed it, there appeared one after another a Kāmadhenu cow (accepted by sages), the horse Uccaihshravā (taken by Bali), Airāvata and other elephants (to Indra), the Kaustubha gem (to Vishnu), a Pārijāta tree and Apsarā women (to heaven), Mahā-Lakshmī (she chose Vishnu), and at last Dhanvantari with the pot of nectar (handed over to Mohinī).

||10.28||

आयुधानामहं वज्रं धेनूनामस्मि कामधुक्। प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥

आयुधानाम् अहम् वज्रम् धेनूनाम् अस्मि कामधुक् प्रजनः च अस्मि कन्दर्पः सर्पाणाम् अस्मि वासुकिः

आयुधानाम् अहम् वज्रम् »Among weapons I am the thunderbolt (Vajra) धेनूनाम् काम-धुक् अस्मि among cows I am the Kāma-dhenu (Surabhi) प्रजनः कन्दर्पः च अस्मि I am the procreating Cupid (Kandarpa, Kāma) सर्पाणाम् वासुकिः अस्मि and among [poisenous] serpents I am Vāsuki.«

||10.29||

अनन्तश्चास्मि नागानां वरुणो यादसामहम्। पितॄणामर्यमा चास्मि यमः संयमतामहम्॥

अनन्तः च अस्मि नागानाम् वरुणः यादसाम् अहम् पितॄणाम् अर्यमा च अस्मि यमः संयमताम् अहम्

नागानाम् अनन्तः च अस्मि »Among [non-poisenous] snakes (Nāgas) I am Ananta (Shesha) यादसाम् अहम् वरुणः among aquatics I am Varuna पितॄणाम् अर्यमा च अस्मि among the Pitris I am Aryamā संयमताम् अहम् यमः and among controllers I am Yamarāja.«

||10.30||

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्। मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥

प्रह्लादः च अस्मि दैत्यानाम् कालः कलयताम् अहम् मृगाणाम् च मृग-इन्द्रः अहम् वैनतेयः च पक्षिणाम्

मृगाणाम् इन्द्रः इति मृग-इन्द्रः _the king of animals.

दैत्यानाम् प्रह्लादः च अस्मि »Among the demons (Daityas) I am Prahlāda कलयताम् अहम् कालः among subduers I am the [life-]time मृगाणाम् अहम् मृग-इन्द्रः च among animals I am the lion ('king of animals') पक्षिणाम् वैनतेयः च and among birds Garuda.«

||10.31||

पवनः पवतामस्मि रामः शस्त्रभृतामहम्। झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥

पवनः पवताम् अस्मि रामः शस्त्र-भृताम् अहम् झषाणाम् मकरः च अस्मि स्रोतसाम् अस्मि जाह्नवी

शस्त्राणि बिभर्ति यः सः शस्त्र-भृत् _who holds weapons.

पवताम् पवनः अस्मि »Among purifiers I am the wind शस्त्र-भृताम् अहम् रामः among wielders of weapons I am Rāma (Rāmacandra or Parashurāma) झषाणाम् मकरः च अस्मि and among fish I am the Makara स्रोतसाम् जाह्नवी अस्मि and among rivers I am the Gangā (Jāhnavī).«

**||10.32||**

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन। अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥

सर्गाणाम् आदिः अन्तः च मध्यम् च एव अहम् अर्जुन अध्यात्म-विद्या विद्यानाम् वादः प्रवदताम् अहम्

आत्मानम् अधिकृत्य विद्या इति अध्यात्म-विद्या _the science concerning the soul.

अर्जुन सर्गाणाम् »O Arjuna! Of [all] creations अहम् एव आदिः अन्तः च मध्यम् च I alone am the beginning, end and middle, विद्यानाम् अध्यात्म-विद्या among sciences the science concerning the soul प्रवदताम् अहम् वादः and of debators I am the ascertainment.«

In (10.20) the Lord's agency in creation, etc. was stated. Here it is stated that the creation, etc. are to be meditated upon as the Lord's glories. There are different kinds of argument. Supporting one's view with evidence that also supports the opposing side is called Jalpa (inconclusive argument). Merely trying to defeat one's opponent is called Vitandā (perverse argument). But the actual conclusion, the ernest ascertainment of the truth is called Vāda, and represents the Lord. These definitions are according to Baladeva.

**||10.33||**

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च। अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥

अ-क्षराणाम् अ-कारः अस्मि द्वन्द्वः सामासिकस्य च अहम् एव अ-क्षयः कालः धाता अहम् विश्वतः-मुखः

अ-क्षराणाम् अ-कारः अस्मि »Among letters I am the A (which becomes all the other letters when transformed by different parts of the mouth) सामासिकस्य द्वन्द्वः च and among compounds the dual compund (Dvandva-samāsa) अहम् एव अ-क्षयः कालः I myself am eternal time (besides the finite life span, 10.30) अहम् विश्वतः-मुखः धाता and I am the universal maintainer.«

**||10.34||**

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्। कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥

मृत्युः सर्व-हरः च अहम् उद्भवः च भविष्यताम् कीर्तिः श्रीः वाक् च नारीणाम् स्मृतिः मेधा धृतिः क्षमा

सर्वम् हरति यः सः सर्व-हरः _who takes everything.

अहम् सर्व-हरः मृत्युः च »I am all-destroying death भविष्यताम् उद्भवः च and of future beings their origin नारीणाम् कीर्तिः श्रीः वाक् च among women [I am the goddesses] fame, beauty, speech स्मृतिः मेधा धृतिः क्षमा memory, intelligence, determination and tolerance (through whose mere trace people become praise-worthy).«

**||10.35||**

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्। मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः॥

बृहत्-साम तथा साम्नाम् गायत्री छन्दसाम् अहम् मासानाम् मार्गशीर्षः अहम् ऋतूनाम् कुसुम-आकरः

कुसुमानाम् आकरः इति कुसुम-आकरः _‘a mine of flowers’, a place abounding with flowers, spring.

साम्नाम् अहम् बृहत्-साम »Among Sāma-Veda hymns I am the Brihat-Sāma तथा छन्दसाम् गायत्री among metrical hymns the Gāyatrī मासानाम् अहम् मार्गशीर्षः among months I am the Mārgashīrsha ऋतूनाम् कुसुम-आकरः and among seasons the flowery season, spring.«

Mārgashīrsha did previously not fall into November-December, because of an astronomical phenomenon called the ‘precession of the equinoxes’.

**||10.36||**

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्। जयो ऽस्मि व्यवसायो ऽस्मि सत्त्वं सत्त्ववतामहम्॥

द्यूतम् छलयताम् अस्मि तेजः तेजस्विनाम् अहम् जयः अस्मि व्यवसायः अस्मि सत्त्वम् सत्त्ववताम् अहम्

छलयताम् द्यूतम् अस्मि »Of those who are cheating I am gambling तेजस्विनाम् अहम् तेजः of those who are splendid I am splendor जयः अस्मि [of the victorious] I am victory व्यवसायः अस्मि [of the energetic] I am enterprise सत्त्ववताम् अहम् सत्त्वम् and of the strong I am strength (or: of those in Sattva-guna I am Sattva, goodness).«

**||10.37||**

वृष्णीनां वासुदेवो ऽस्मि पाण्डवानां धनञ्जयः। मुनीनामप्यहं व्यासः कवीनामुशना कविः॥

वृष्णीनाम् वासुदेवः अस्मि पाण्डवानाम् धनञ्जयः मुनीनाम् अपि अहम् व्यासः कवीनाम् उशना कविः

वृष्णीनाम् वासुदेवः अस्मि »Among the Vrishnis I am [myself,] Krishna (Vāsudeva) पाण्डवानाम् धनञ्जयः among the Pāndavas [you,] Arjuna मुनीनाम् अपि अहम् व्यासः among sages I am Vyāsadeva कवीनाम् कविः उशना and among seers the seer Shukrācārya.«

**||10.38||**

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्। मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्॥

दण्डः दमयताम् अस्मि नीतिः अस्मि जिगीषताम् मौनम् च एव अस्मि गुह्यानाम् ज्ञानम् ज्ञानवताम् अहम्

दमयताम् दण्डः अस्मि »Among subduers I am punishment (Danda) जिगीषताम् नीतिः अस्मि of those who seek victory I am policy (Nīti, consisting of Sama-Dāna-Bheda-Danda) गुह्यानाम् मौनम् च एव अस्मि of secrecy I am silence (Mauna) ज्ञानवताम् अहम् ज्ञानम् and of the wise I am knowledge.«

**||10.39||**

यच्चापि सर्वभूतानां बीजं तदहमर्जुन। न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥

यद् च अपि सर्व-भूतानाम् बीजम् तद् अहम् अर्जुन न तद् अस्ति विना यद् स्यात् मया भूतम् चर-अचरम्

अर्जुन »O Arjuna! यद् अपि च सर्व-भूतानाम् बीजम् Whatever is the seed of all beings तद् अहम् that is me, यद् चर-अचरम् भूतम् स्यात् [because] whatever being may exist, moving or non-moving तद् मया विना न अस्ति without me it can not exist.«

**||10.40||**

नान्तो ऽस्ति मम दिव्यानां विभूतीनां परन्तप। एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥

न अन्तः अस्ति मम दिव्यानाम् विभूतीनाम् परन्तप एषः तु उद्देशतः प्रोक्तः विभूतेः विस्तरः मया

परन्तप »O Arjuna! मम दिव्यानाम् विभूतीनाम् Of my divine opulences (Vibhūti) अन्तः न अस्ति there is no end, एषः तु विभूतेः विस्तरः [therefore] this extent of opulence मया उद्देशतः प्रोक्तः was just briefly described by me.«

**||10.41||**

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम् ॥

यद् यद् विभूतिमत् सत्त्वम् श्रीमत् ऊर्जितम् एव वा तद् तद् एव अवगच्छ त्वम् मम तेजः-अंश-सम्भवम्

तेजसः अंशेन सम्भवः यस्य तद् तेजः-अंश-सम्भवम् _whose generation is by a portion of splendor.

यद् यद् सत्त्वम् »Whatever existence विभूतिमत् श्रीमत् ऊर्जितम् एव वा is opulent, beautiful or glorious, तद् तद् एव all that मम तेजः-अंश-सम्भवम् as born of a portion of my splendor त्वम् अवगच्छ you should know.«

किम् अनेन परिच्छिन्न-दर्शनेन But of what avail is this limited vision of Myself? सर्वत्र मद्-दृष्टिम् एव कुरु Better see Me in everything ...

**||10.42||**

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

अथवा बहुना एतेन किम् ज्ञातेन तव अर्जुन विष्टभ्य अहम् इदम् कृत्स्नम् एक-अंशेन स्थितः जगत्

अर्जुन »O Arjuna! अथवा एतेन बहुना ज्ञातेन However, by this much [detailed] knowledge तव किम् what is your [benefit]? इदम् कृत्स्नम् जगत् This whole universe एक-अंशेन विष्टभ्य [after] supporting [it] with one portion [as Universal Form] अहम् स्थितः I exist.«

न मद्-व्यतिरिक्तम् किञ्चिद् अस्ति Nothing exists besides Me.

**||11.1||**

मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम् । यत्त्वयोक्तं वचस्तेन मोहो ऽयं विगतो मम ॥

मद्-अनुग्रहाय परमम् गुह्यम् अध्यात्म-सञ्ज्ञितम् यद् त्वया उक्तम् वचः तेन मोहः अयम् विगतः मम

मम अनुग्रहः इति मद्-अनुग्रहः _my favor.

परमम् गुह्यम् अध्यात्म-सञ्ज्ञितम् वचः »The supreme and secret discourse, known as Adhyātma (regarding the discrimination between soul and body) यद् मद्-अनुग्रहाय त्वया उक्तम् which was spoken by you for favoring me (2.11-6.47) तेन मम अयम् मोहः विगतः by that this delusion of mine has gone.«

मम अयम् मोहः My this illusion अहम् हन्ता एते हन्यन्ते इत्यादि लक्षणः भ्रमः the mistake consisting of [ideas like] ‘I am the slayer and they are slain’ विगतः/विनष्टः is gone, destroyed आत्मनः कर्तृत्वादि-अभाव-उक्तेः because the soul has been taught to be a non-agent, etc.

**||11.2||**

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया । त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥

भव-अप्ययौ हि भूतानाम् श्रुतौ विस्तरशः मया त्वत्तः कमल-पत्र-अक्ष माहात्म्यम् अपि च अ-व्ययम्

कमल-पत्रे इव अक्षिणी यस्य सः कमल-पत्र-अक्षः _'whose eyes are like two lotus petals', i.e., beautiful, broad and with reddish corners. भवः च अप्ययः च इति भव-अप्ययौ _creation and destruction.

कमल-पत्र-अक्ष »O lotus-eyed Lord! भूतानाम् भव-अप्ययौ हि About the creation and distruction of all beings अ-व्ययम् माहात्म्यम् अपि च and also about [your] eternal glory त्वत्तः विस्तरशः मया श्रुतौ I have heard from you in detail (in verses like 7.6).«

**||11.3||**

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर। द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥

एवम् एतद् यथा आत्थ त्वम् आत्मानम् परम-ईश्वर द्रष्टुम् इच्छामि ते रूपम् ऐश्वरम् पुरुष-उत्तम

परम-ईश्वर »O Lord! यथा त्वम् आत्मानम् आत्थ What you said about yourself एतद् एवम् it is just so (even in that You are the creator, etc.). पुरुष-उत्तम O Lord! तव/ते ऐश्वरम् रूपम् द्रष्टुम् इच्छामि I want to see your majestic form (out of curiosity).«

**||11.4||**

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो। योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥

मन्यसे यदि तद् शक्यम् मया द्रष्टुम् इति प्रभो योग-ईश्वर ततः मे त्वम् दर्शय आत्मानम् अ-व्ययम्

योगस्य ईश्वरः इति योग-ईश्वरः _the master of Yoga.

प्रभो »O Lord! तद् मया द्रष्टुम् शक्यम् 'That [form] can be seen by me इति यदि मन्यसे if you think so, योग-ईश्वर O Lord! ततः अ-व्ययम् आत्मानम् Then your eternal self त्वम् मह्यम्/मे दर्शय you please show to me.

**||11.5||**

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः। नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥

पश्य मे पार्थ रूपाणि शतशः अथ सहस्रशः नाना-विधानि दिव्यानि नाना-वर्ण-आकृतीनि च

पार्थ »O Arjuna! नाना-विधानि नाना-वर्ण-आकृतीनि च Of various kinds, colors and shapes शतशः अथ सहस्रशः hundreds and thousands मम/मे दिव्यानि रूपाणि पश्य behold my divine forms.«

**||11.6||**

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा। बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥

पश्य आदित्यान् वसून् रुद्रान् अश्विनौ मरुतः तथा बहूनि अदृष्ट-पूर्वाणि पश्य आश्चर्याणि भारत

भारत »O Arjuna! आदित्यान् वसून् रुद्रान् The Ādityas, Vasus and Rudras अश्विनौ तथा मरुतः पश्य the two Ashvins and the Maruts behold, अदृष्ट-पूर्वाणि बहूनि आश्चर्याणि पश्य behold many wonders, never seen before (neither by you nor others).«

The Ashvinīs Satya and Dasra, sons of Sūrya, are known as Ashvinī-kumāras. They are the physicians of the Devas.

**||11.7||**

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्। मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ॥

इह एक-स्थम् जगत् कृत्स्नम् पश्य अद्य सचर-अचरम् मम देहे गुडाका-ईश यद् च अन्यत् द्रष्टुम् इच्छसि

एकस्मिन् तिष्ठति यः सः एक-स्थः _who stays in one.

गुडाका-ईश »O Arjuna! सचर-अचरम् कृत्स्नम् जगत् The whole world, the moving and non-moving यद् अन्यत् च द्रष्टुम् इच्छसि and anything else that you want to see अद्य इह मम देहे एक-स्थम् पश्य now behold in this body of Mine, situated in one place.«

तत्र तत्र परिभ्रमता By a person wandering from place to place वर्ष-कोटिभिः अपि द्रष्टुम् अ-शक्यम् which is impossible to see even in millions of years.

**||11.8||**

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥

न तु माम् शक्यसे द्रष्टुम् अनेन एव स्वचक्षुषा दिव्यम् ददामि ते चक्षुः पश्य मे योगम् ऐश्वरम्

स्वस्य चक्षुः इति स्व-चक्षुः _own eye.

अनेन स्व-चक्षुषा एव तु »But just with this your [physical] vision माम् द्रष्टुम् न शक्यसे you will not be able to see me, दिव्यम् चक्षुः तुभ्यम्/ते ददामि [therefore] I give to you divine vision. मम/मे ऐश्वरम् योगम् पश्य Behold my majestic mystic power.«

**||11.9||**

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः । दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥

एवम् उक्त्वा ततः राजन् महा-योग-ईश्वरः हरिः दर्शयामास पार्थाय परमम् रूपम् ऐश्वरम्

Western Sanskritists take darshayāmāsa as two words (darshayām+āsa). But darshayām is not an independent word. Furthermore, in lit (Bhūta-kāla) the Dhātu as[a]...bhuvi is replaced by the Dhātu bhū...sattāyām, therefore the form āsa is also not seen independently.

महान् योगस्य ईश्वरः इति महा-योग-ईश्वरः _the great master of Yoga.

राजन् »O Dhritarāshtra! एवम् उक्त्वा [After] speaking thus ततः महा-योग-ईश्वरः हरिः then the Lord, the great master of mystic power (Yoga) परमम् ऐश्वरम् रूपम् [his] supreme majestic form पार्थाय दर्शयामास he showed to Arjuna.«

कथम्-भूतम् Of what nature [was this form]? ...

**||11.10-11||**

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् । अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥

अनेक-वक्त्र-नयनम् अनेक-अद्भुत-दर्शनम् अनेक-दिव्य-आभरणम् दिव्य-अनेक-उद्यत-आयुधम्

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् । सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥

दिव्य-माल्य-अम्बर-धरम् दिव्य-गन्ध-अनुलेपनम् सर्व-आश्चर्यमयम् देवम् अनन्तम् विश्वतः-मुखम्

अनेकानि वक्त्र-नयनानि यस्मिन् तद् अनेक-वक्त्र-नयनम् _in which there are many mouths and eyes. etc.

अनेक-वक्त्र-नयनम् »It had many mouths and eyes अनेक-अद्भुत-दर्शनम् many wonderful visions अनेक-दिव्य-आभरणम् many divine ornaments दिव्य-अनेक-उद्यत-आयुधम् many divine upraised weapons दिव्य-माल्य-अम्बर-धरम् it was wearing many divine garlands and dresses दिव्य-गन्ध-

अनुलेपनम् was anointed with divine scents सर्व-आश्चर्यमयम् देवम् full of all wonders, effulgent अनन्तम् विश्वतः-मुखम् unlimited and universal.«

**||11.12||**

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता। यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥

दिवि सूर्य-सहस्रस्य भवेत् युगपद् उत्थिता यदि भाः सदृशी सा स्यात् भासः तस्य महा-आत्मनः

सूर्याणाम् सहस्रम् इति सूर्य-सहस्रम् _a thousand of suns.

सूर्य-सहस्रस्य भाः »The effulgence of thousands of suns यदि दिवि युगपद् उत्थिता भवेत् if it would have risen together in the sky, तस्य महा-आत्मनः भासः to the effulgence of the Supreme Lord सा सदृशी स्यात् that [effulgence] would be similar.«

न अन्या उपमा अस्ति There is no other comparison. इति अर्थः This is the idea. तथा-भूतम् रूपम् दर्शयामास And such a form He showed. इति पूर्वेण एव अन्वयः This is the connection with the previous verse (11.9).

**||11.13||**

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥

तत्र एक-स्थम् जगत् कृत्स्नम् प्रविभक्तम् अनेकधा अपश्यत् देव-देवस्य शरीरे पाण्डवः तदा

तदा पाण्डवः »Then Arjuna तत्र देव-देवस्य शरीरे there in the Supreme Lord's body कृत्स्नम् जगत् the whole universe अनेकधा प्रविभक्तम् [although] in many ways divided एक-स्थम् अपश्यत् he saw in one place (as different parts of that one body).«

**||11.14||**

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः। प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥

ततः सः विस्मय-आविष्टः हृष्ट-रोमा धनञ्जयः प्रणम्य शिरसा देवम् कृत-अञ्जलिः अभाषत

हृष्टानि रोमाणि यस्य सः हृष्ट-रोमा _whose hairs stand on end. कृतः अञ्जलिः येन सः कृत-अञ्जलिः _by whom Anjali is made.

ततः विस्मय-आविष्टः »Then, filled with wonder हृष्ट-रोमा सः धनञ्जयः that Arjuna, his hair standing on end [out of joy] देवम् शिरसा प्रणम्य [after] bowing his head to the Lord कृत-अञ्जलिः अभाषत he spoke with folded hands.«

**||11.15||**

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।

पश्यामि देवान् तव देव देहे सर्वान् तथा भूत-विशेष-सङ्घान्

ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥

ब्रह्माणम् ईशम् कमल-आसन-स्थम् ऋषीन् च सर्वान् उरगान् च दिव्यान्

भूतानाम् विशेषाणाम् सङ्घः इति भूत-विशेष-सङ्घः _a group of various beings. कमल-आसने तिष्ठति यः सः कमल-आसन-स्थः _who is situated on a lotus-seat.

देव »O Lord! सर्वान् देवान् All the Devas तथा भूत-विशेष-सङ्घान् and hosts of various beings कमल-आसन-स्थम् ईशम् ब्रह्माणम् Lord Brahmā, situated on a lotus-seat (on mount Meru, or: seated on

the lotus-seat rising from Your navel) सर्वान् ऋषीन् च दिव्यान् उरगान् च and all sages and divine serpents तव देहे पश्यामि I see in your body.«

**||11.16||**

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
अनेक-बाहु-उदर-वक्त्र-नेत्रम् पश्यामि त्वाम् सर्वतः अनन्त-रूपम्
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥
न अन्तम् न मध्यम् न पुनः तव आदिम् पश्यामि विश्व-ईश्वर विश्व-रूप

अनन्तानि रूपाणि यस्य सः अनन्त-रूपः _whose forms are unlimited.

अनेक-बाहु-उदर-वक्त्र-नेत्रम् »With many arms, bellies, mouths and eyes सर्वतः अनन्त-रूपम् with unlimited forms on all sides त्वाम् पश्यामि I see you. विश्व-ईश्वर विश्व-रूप O Lord, Universal Form! तव न अन्तम् न मध्यम् Neither your end, nor middle न पुनः आदिम् पश्यामि and also not the beginning I see [because Your being all-pervading].

**||11.17||**

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
किरीटिनम् गदिनम् चक्रिणम् च तेजः-राशिम् सर्वतः दीप्तिमन्तम्
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥
पश्यामि त्वाम् दुर्निरीक्ष्यम् समन्तात् दीप्त-अनल-अर्क-द्युतिम् अ-प्रमेयम्

तेजसः राशिः इति तेजः-राशिः _a mass of light.

किरीटिनम् गदिनम् चक्रिणम् च »With crown, club and disc सर्वतः दीप्तिमन्तम् तेजः-राशिम् a mass of splendor, shining on all sides दुर्निरीक्ष्यम् दीप्त-अनल-अर्क-द्युतिम् with a blinding lustre of blazing fire and the sun अ-प्रमेयम् [and therefore] immeasurable त्वाम् समन्तात् पश्यामि I see you everywhere.«

**||11.18||**

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वम् अ-क्षरम् परमम् वेदितव्यम् त्वम् अस्य विश्वस्य परम् निधानम्
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥
त्वम् अ-व्ययः शाश्वत-धर्म-गोप्ता सनातनः त्वम् पुरुषः मतः मे

शाश्वतस्य धर्मस्य गोप्ता इति शाश्वत-धर्म-गोप्ता _the protector of eternal Dharma.

त्वम् अ-क्षरम् परमम् वेदितव्यम् »You are the imperishable (Brahma), supreme object of knowledge त्वम् अस्य विश्वस्य परम् निधानम् you are the ultimate resting place of this universe त्वम् अ-व्ययः शाश्वत-धर्म-गोप्ता you are the unchangeable protector of the eternal Dharma त्वम् सनातनः पुरुषः मम/मे मतः you are the eternal Lord in my opinion.«

**||11.19||**

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।

अन्-आदि-मध्य-अन्तम् अनन्त-वीर्यम् अनन्त-बाहुम् शशि-सूर्य-नेत्रम्

पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥

पश्यामि त्वाम् दीप्त-हुताश-वक्त्रम् स्व-तेजसा विश्वम् इदम् तपन्तम्

न आदिः च मध्यम् च अन्तः च यस्य सः अन्-आदि-मध्य-अन्तः _which has no beginning, middle, or end. अनन्ताः बाहवः यस्य सः अनन्त-बाहुः _whose arms are innumerable.

अन्-आदि-मध्य-अन्तम् »As one without beginning, middle, or end अनन्त-वीर्यम् अनन्त-बाहुम् with unlimited strength and innumerable arms शशि-सूर्य-नेत्रम् with moon and sun as eyes दीप्त-हुताश-वक्त्रम् blazing fire in the mouths स्व-तेजसा इदम् विश्वम् तपन्तम् scorching this universe with your own radiance त्वाम् पश्यामि I see you.«

**||11.20||**

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।

द्यावा-पृथिव्योः इदम् अन्तरम् हि व्याप्तम् त्वया एकेन दिशः च सर्वाः

दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥

दृष्ट्वा अद्भुतम् रूपम् उग्रम् तव इदम् लोक-त्रयम् प्रव्यथितम् महा-आत्मन्

लोकानाम् त्रयम् इति लोक-त्रयम् _the triad of worlds.

महा-आत्मन् »O Lord! द्यावा-पृथिव्योः इदम् अन्तरम् हि All this space between heaven and earth सर्वाः दिशः च and all directions त्वया एकेन व्याप्तम् are pervaded by you, तव इदम् अद्भुतम् उग्रम् रूपम् दृष्ट्वा [after] seeing this your wonderful and terrible form लोक-त्रयम् प्रव्यथितम् the three worlds are perturbed.«

**||11.21||**

अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।

अमी हि त्वाम् सुर-सङ्घाः विशन्ति केचिद् भीताः प्राञ्जलयः गृणन्ति

स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥

स्वस्ति इति उक्त्वा महर्षि-सिद्ध-सङ्घाः स्तुवन्ति त्वाम् स्तुतिभिः पुष्कलाभिः

अमी सुर-सङ्घाः हि त्वाम् विशन्ति »Those hosts of Devas take shelter of you केचिद् भीताः प्राञ्जलयः गृणन्ति and some, being afraid, pray with folded hands. महर्षि-सिद्ध-सङ्घाः Hosts of great sages and Siddhas स्वस्ति इति उक्त्वा [after] calling out ‘peace पुष्कलाभिः स्तुतिभिः त्वाम् स्तुवन्ति praise you with many hymns.«

त्वाम् विशन्ति ‘They enter You’ means शरणम् प्रविशन्ति they take shelter.

**||11.22||**

रुद्रादित्या वसवो ये च साध्या विश्वे ऽश्विनौ मरुतश्चोष्मपाश्च ।

रुद्र-आदित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च

गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥
गन्धर्व-यक्ष-असुर-सिद्ध-सङ्घाः वीक्षन्ते त्वाम् विस्मिताः च एव सर्वे

रुद्र-आदित्याः वसवः ये च साध्याः »The Rudras, Ādityas, Vasus and those called Sādhyas विश्वे अश्विनौ मरुतः च ऊष्मपाः च the Vishvedevas, two Ashvinīs, Maruts and Pitris गन्धर्व-यक्ष-असुर-सिद्ध-सङ्घाः the hosts of Gandharvas, Yakshas, Asuras and Siddhas सर्वे एव च विस्मिताः त्वाम् वीक्षन्ते all of them behold you in surprise.«

**||11.23||**

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
रूपम् महत् ते बहु-वक्त्र-नेत्रम् महा-बाहो बहु-बाहु-ऊरु-पादम्
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥
बहु-उदरम् बहु-दंष्ट्रा-करालम् दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम्

बहूनि वक्त्र-नेत्राणि यस्मिन् तद् बहु-वक्त्र-नेत्रम् _in which there are many mouths and eyes. बहूनि उदराणि यस्मिन् तद् बहु-उदरम् _in which there are many bellies.

महा-बाहो »O Lord! बहु-वक्त्र-नेत्रम् बहु-बाहु-ऊरु-पादम् With many mouths and eyes, many arms, thighs and feet बहु-उदरम् बहु-दंष्ट्रा-करालम् with many bellies and dreadful with many tusks तव/ते महत् रूपम् दृष्ट्वा [after] seeing your great form लोकाः प्रव्यथिताः the worlds are perturbed तथा अहम् and so am I.«

**||11.24||**

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
नभः-स्पृशम् दीप्तम् अनेक-वर्णम् व्यात्त-आननम् दीप्त-विशाल-नेत्रम्
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥
दृष्ट्वा हि त्वाम् प्रव्यथित-अन्तरात्मा धृतिम् न विन्दामि शमम् च विष्णो

नभः स्पृशति यः सः इति नभः-स्पृक् _who touches the sky.

विष्णो »O Lord! नभः-स्पृशम् दीप्तम् अनेक-वर्णम् Touching the sky (pervading the region between heaven and earth), blazing, many-colored व्यात्त-आननम् दीप्त-विशाल-नेत्रम् with gaping mouths and large glowing eyes त्वाम् हि दृष्ट्वा [after] seeing you प्रव्यथित-अन्तरात्मा being perturbed at heart धृतिम् शमम् च न विन्दामि I do not find patience and peace.«

**||11.25||**

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दंष्ट्रा-करालानि च ते मुखानि दृष्ट्वा एव काल-अनल-सन्निभानि
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥
दिशः न जाने न लभे च शर्म प्रसीद देव-ईश जगत्-निवास

दंष्ट्राभिः करालम् यद् तद् दंष्ट्रा-करालम् _which is dreadful with tusks.

दंष्ट्रा-करालानि »Dreadful with tusks काल-अनल-सन्निभानि च and blazing like the fire of dissolution (which consumes the world at the time of dissolution) तव/ते मुखानि दृष्ट्वा एव [after] seeing your mouths दिशः न जाने I do not know the directions शर्म च न लभे and I do not get happiness. देव-ईश जगत्-निवास O Lord! प्रसीद Be merciful.«

**||11.26-27||**

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
अमी च त्वाम् धृतराष्ट्रस्य पुत्राः सर्वे सह एव अवनि-पाल-सङ्घैः
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥
भीष्मः द्रोणः सूत-पुत्रः तथा असौ सह अस्मदीयैः अपि योध-मुख्यैः
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
वक्त्राणि ते त्वरमाणाः विशन्ति दंष्ट्रा-करालानि भयानकानि
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥
केचिद् विलग्नाः दशन-अन्तरेषु सन्दृश्यन्ते चूर्णितैः उत्तम-अङ्गैः

सूतस्य पुत्रः इति सूत-पुत्रः _the son of a Sūta. योधानाम् मुख्यः इति योध-मुख्यः _‘chief of warriors’, general. दशनानाम् अन्तरः इति दशन-अन्तरः _in between the teeth. उत्तमम् अङ्गम् इति उत्तम-अङ्गम् _‘the upper part’, the head.

अमी च सर्वे धृतराष्ट्रस्य पुत्राः »And all those sons of Dhritarāshtra अवनि-पाल-सङ्घैः सह एव along with hosts of kings भीष्मः द्रोणः तथा असौ सूत-पुत्रः Bhīshma, Drona, and also that Karna अस्मदीयैः योध-मुख्यैः अपि सह along with our generals also त्वाम् त्वरमाणाः [while] rushing towards you तव/ते दंष्ट्रा-करालानि भयानकानि वक्त्राणि your dreadful mouths with horrible teeth विशन्ति they enter, चूर्णितैः उत्तम-अङ्गैः with smashed heads दशन-अन्तरेषु विलग्नाः sticking between the teeth केचिद् सन्दृश्यन्ते some are seen.«

**||11.28||**

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
यथा नदीनाम् बहवः अम्बु-वेगाः समुद्रम् एव अभिमुखाः द्रवन्ति
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥
तथा तव अमी नर-लोक-वीराः विशन्ति वक्त्राणि अभिविज्वलन्ति

नर-लोके वीरः इति नर-लोक-वीरः _a hero in the world of men.

यथा नदीनाम् बहवः अम्बु-वेगाः »As the many currents of the water of rivers समुद्रम् एव अभिमुखाः द्रवन्ति flow to the ocean alone, तथा अमी नर-लोक-वीराः so do those heroes among men तव वक्त्राणि विशन्ति enter your mouths, अभिविज्वलन्ति and they are blazing.«

अवशत्वेन प्रवेशे नदी-वेगः दृष्टान्तः उक्तः The example of a river’s current has been given with respect to entering helplessly. बुद्धि-पूर्वक-प्रवेशे दृष्टान्तम् आह [Now] an example is given with respect to entering consciously ...

**||11.29||**

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
यथा प्रदीप्तम् ज्वलनम् पतङ्गाः विशन्ति नाशाय समृद्ध-वेगाः
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥
तथा एव नाशाय विशन्ति लोकाः तव अपि वक्त्राणि समृद्ध-वेगाः

समृद्धः वेगः यस्य सः समृद्ध-वेगः _whose speed is great.

यथा पतङ्गाः समृद्ध-वेगाः »As insects with great speed प्रदीप्तम् ज्वलनम् नाशाय विशन्ति enter a blazing fire for destruction, तथा एव लोकाः अपि समृद्ध-वेगाः so also these pleople with great speed तव वक्त्राणि नाशाय विशन्ति enter your mouths for destruction.«

**||11.30||**

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
लेलिह्यसे ग्रसमानः समन्तात् लोकान् समग्रान् वदनैः ज्वलद्भिः
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥
तेजोभिः आपूर्य जगत् समग्रम् भासः तव उग्राः प्रतपन्ति विष्णो

ज्वलद्भिः वदनैः »With flaming mouths समग्रान् लोकान् ग्रसमानः [while] devouring all people समन्तात् लेलिह्यसे you are licking on all sides. विष्णो O Lord! तेजोभिः समग्रम् जगत् आपूर्य [After] filling the whole world with radiance तव उग्राः भासः प्रतपन्ति your terrible effulgences are scorching.«

**||11.31||**

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
आख्याहि मे कः भवान् उग्र-रूपः नमः अस्तु ते देव-वर प्रसीद
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥
विज्ञातुम् इच्छामि भवन्तम् आद्यम् न हि प्रजानामि तव प्रवृत्तिम्

उग्रम् रूपम् यस्य सः उग्र-रूपः _whose form is terrible. देवानाम् वरः इति देव-वरः _best of the gods.

उग्र-रूपः कः भवान् »Who are you, of fierce form मह्यम्/मे आख्याहि [please] tell to me. तुभ्यम्/ते नमः अस्तु Obeisance unto you देव-वर प्रसीद O Lord, be merciful! आद्यम् भवन्तम् विज्ञातुम् इच्छामि I want to understand you, the original being तव प्रवृत्तिम् हि न प्रजानामि [because] I do not understand your activity (why are You acting thus).«

**||11.32||**

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
कालः अस्मि लोक-क्षय-कृत् प्रवृद्धः लोकान् समाहर्तुम् इह प्रवृत्तः
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥
ऋते अपि त्वाम् न भविष्यन्ति सर्वे ये अवस्थिताः प्रत्यनीकेषु योधाः

लोकानाम् क्षयम् करोति यः सः लोक-क्षय-कृत् _who does the destruction of the worlds.

प्रवृद्धः लोक-क्षय-कृत् कालः अस्मि »I am time, the mighty destroyer of the worlds लोकान् समाहर्तुम् इह प्रवृत्तः and engaged here to destroy all these people. त्वाम् ऋते अपि Even without you (as their slayer) प्रत्यनीकेषु ये योधाः अवस्थिताः those soldiers who are present in the opposed armies सर्वे न भविष्यन्ति they all will not live.«

**||11.33||**

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
तस्मात् त्वम् उत्तिष्ठ यशः लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यम् समृद्धम्
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥
मया एव एते निहताः पूर्वम् एव निमित्तमात्रम् भव सव्य-साचिन्

तस्मात् त्वम् उत्तिष्ठ »Therefore rise यशः लभस्व and gain fame (defeating the invincible Bhīshma and Drona) शत्रून् जित्वा [and after] conquering the enemies समृद्धम् राज्यम् भुङ्क्ष्व enjoy a flourishing kingdom. मया एव एते पूर्वम् एव निहताः By me alone they have been killed already सव्य-साचिन् O Arjuna! निमित्त-मात्रम् भव [Therefore] be merely an instrument!«

एते च तव शत्रवः These your enemies त्वदीय-युद्धात् पूर्वम् एव even before your battle मया एव काल-आत्मना निहत-प्रायाः they have almost been killed by me, who am time.

**||11.34||**

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ।
द्रोणम् च भीष्मम् च जयद्रथम् च कर्णम् तथा अन्यान् अपि योध-वीरान्
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥
मया हतान् त्वम् जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान्

द्रोणम् च भीष्मम् च जयद्रथम् च »Drona, Bhīshma and Jayadratha कर्णम् तथा अन्यान् योध-वीरान् अपि Karna and also the other great warriors मया हतान् त्वम् जहि who are [already] killed by me, you must kill. मा व्यथिष्ठाः युध्यस्व Do not be perturbed and fight, रणे स-पत्नान् जेतासि you will conquer the enemies in battle.«

Jayadratha was a king of Sindh. He stopped Abhimanyu, the son of Arjuna, from leaving the Cakra-vyūha formation of the Kauravas, which led to the killing of Abhimanyu. For this, Arjuna took a vow to kill Jayadratha. Sanjaya said ...

**||11.35||**

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
एतद् श्रुत्वा वचनम् केशवस्य कृत-अञ्जलिः वेपमानः किरीटी
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥
नमस्कृत्वा भूयः एव आह कृष्णम् स-गद्गदम् भीत-भीतः प्रणम्य

गद्गदेन सह इति स-गद्गदम् _with faltering.

एतद् केशवस्य वचनम् श्रुत्वा »[After] hearing these words of Krishna वेपमानः कृत-अञ्जलिः किरीटी Arjuna, trembling and with folded hands कृष्णम् नमस्कृत्वा [after] saluting (for namaskritya) to

Krishna भीत-भीतः प्रणम्य [and after] bowing down, being much afraid स-गद्गदम् भूयः एव आह he again spoke with faltering voice.«

**||11.36||**

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
स्थाने हृषीक-ईश तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते च
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥
रक्षांसि भीतानि दिशः द्रवन्ति सर्वे नमस्यन्ति च सिद्ध-सङ्घाः

हृषीक-ईश स्थाने »O Lord! This is befitting (not surprising) तव प्रकीर्त्या that by your glorification जगत् प्रहृष्यति अनुरज्यते च the world rejoices and is attracted [towards you], भीतानि रक्षांसि दिशः द्रवन्ति that the fearful demons flee in all directions सर्वे सिद्ध-सङ्घाः च नमस्यन्ति and that all the hosts of Siddhas bow down.«

**||11.37||**

कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्मणो ऽप्यादिकर्त्रे ।
कस्मात् च ते न नमेरन् महा-आत्मन् गरीयसे ब्रह्मणः अपि आदि-कर्त्रे
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥
अनन्त देव-ईश जगत्-निवास त्वम् अ-क्षरम् सत्-असत् तद्-परम् यद्

महा-आत्मन् अनन्त देव-ईश जगत्-निवास »[Because] O Lord! ब्रह्मणः अपि गरीयसे आदि-कर्त्रे तुभ्यम्/ते To you, the original creator, greater even than Brahmā कस्मात् च न नमेरन् why should they not bow down? त्वम् सत्-असत् You are the visible and invisible [world] (or: manifest unmanifest) तद्-परम् यद् अ-क्षरम् and the imperishable (Brahma) which is beyond it.«

एतैः नवभिः हेतुभिः For these nine reasons त्वाम् सर्वे नमस्यन्ति all salute You.

**||11.38||**

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
त्वम् आदि-देवः पुरुषः पुराणः त्वम् अस्य विश्वस्य परम् निधानम्
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥
वेत्ता असि वेद्यम् च परम् च धाम त्वया ततम् विश्वम् अनन्त-रूप

त्वम् आदि-देवः पुराणः पुरुषः »You are the primeval Lord, the ancient person त्वम् अस्य विश्वस्य परम् निधानम् you are the ultimate resting place of this world वेत्ता वेद्यम् च परम् धाम च असि you are knower, knowable and supreme abode (the place of Vishnu). अनन्त-रूप O Lord! त्वया विश्वम् ततम् By you the world is pervaded.«

**||11.39||**

वायुर्यमो ऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
वायुः यमः अग्निः वरुणः शशाङ्कः प्रजा-पतिः त्वम् प्रपितामहः च
नमो नमस्ते ऽस्तु सहस्रकृत्वः पुनश्च भूयो ऽपि नमो नमस्ते ॥
नमः नमः ते अस्तु सहस्र-कृत्वः पुनः च भूयः अपि नमः नमः ते

त्वम् वायुः यमः अग्निः वरुणः शशाङ्कः »You are Vāyu, Yama, Agni, Varuna and Candra (i.e., the self or sum of all the gods) प्रजा-पतिः प्रपितामहः च [and you are also] Brahmā and Vishnu. तुभ्यम्/ते सहस्र-कृत्वः नमः नमः अस्तु Thousands of repeated obeisance unto you पुनः च भूयः अपि and again and again तुभ्यम्/ते नमः नमः repeated obeisance unto you.«

प्रजा-पतिः पितामहः Prajāpati refers to the grandsire (Brahmā). तस्य अपि जनकत्वात् Being even his (Brahmā's) progenitor प्रपितामहः त्वम् You are the great grandsire.

**||11.40||**

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
नमः पुरस्तात् अथ पृष्ठतः ते नमः अस्तु ते सर्वतः एव सर्व
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥
अनन्त-वीर्य अमित-विक्रमः त्वम् सर्वम् समाप्नोषि ततः असि सर्वः

अनन्तम् वीर्यम् यस्य सः अनन्त-वीर्यः _whose strength is unlimited. अ-मितः विक्रमः यस्य सः अमित-विक्रमः _whose strength is boundless.

सर्व »O Lord! पुरस्तात् अथ पृष्टतः From the front and from behind तुभ्यम्/ते नमः obeisance to you सर्वतः एव तुभ्यम्/ते नमः अस्तु from all sides obeisance to you. अनन्त-वीर्य O Lord! अमित-विक्रमः Being of boundless strength त्वम् सर्वम् समाप्नोषि you pervade everything ततः सर्वः असि therefore you are everything.«

**||11.41-42||**

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
सखा इति मत्वा प्रसभम् यद् उक्तम् हे कृष्ण हे यादव हे सखे इति
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥
अ-जानता महिमानम् तव इदम् मया प्रमादात् प्रणयेन वा अपि
यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
यद् च अवहास-अर्थम् असत्-कृतः असि विहार-शय्या-आसन-भोजनेषु
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥
एकः अथवा अपि अच्युत तद्-समक्षम् तद् क्षामये त्वाम् अहम् अ-प्रमेयम्

Sandhi in the second sakheti is Ārsha-prayoga – it should be sakha iti. The use of idam (neut.) with mahimāna (masc.), instead of imam (masc.), is Ārsha-prayoga.

अवहासस्य अर्थम् इति अवहास-अर्थम् _for the sake of fun.

सखा इति मत्वा »[After] considerung [you] to be an [ordinary] friend प्रमादात् प्रणयेन वा अपि out of delusion or love तव इदम् महिमानम् अ-जानता मया by me, not knowing this greatness of yours यद् प्रसभम् उक्तम् whatever was rashly said – हे कृष्ण हे यादव हे सखे इति 'O Krishna, O Yādava, O friend!', यद् च अच्युत and that, O Lord! विहार-शय्या-आसन-भोजनेषु During sporting, sleeping, sitting and eating एकः अथवा तद्-समक्षम् अपि either alone or even in other's company अवहास-

अर्थम् असत्-कृतः असि you are (were) disrespected out of fun, अ-प्रमेयम् त्वाम् you, the immeasurable one तद् अहम् क्षामये I ask to forgive that.«

Arjuna once said to King Yudhishthira: Generally both of us (Krishna and Arjuna) used to live together and sleep, sit and loiter together. And at the time of advertising oneself for acts of chivalry, sometimes, if there were any irregularity, I used to reproach Him by saying, My friend, You are very truthful. (Bhagavata-Purana 1.15.19)

**||11.43||**

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
पिता असि लोकस्य चर-अचरस्य त्वम् अस्य पूज्यः च गुरुः गरीयान्
न त्वत्समो ऽस्त्यभ्यधिकः कुतो ऽन्यो लोकत्रये ऽप्यप्रतिमप्रभाव ॥
न त्वद्-समः अस्ति अभ्यधिकः कुतः अन्यः लोक-त्रये अपि अ-प्रतिम-प्रभाव

अ-प्रतिमः प्रभावः यस्य सः अ-प्रतिम-प्रभावः _whose prowess is incomparable. तव समः इति त्वाद्-समः _who is equal to you.

अ-प्रतिम-प्रभाव »O Lord! अस्य चर-अचरस्य लोकस्य Of this world, moving and non-moving त्वम् पिता पूज्यः गुरुः गरीयान् च असि you are the father, worshipable teacher and greatest, लोक-त्रये अपि even in [all] the three worlds त्वद्-समः न अस्ति there is none who is equal to you. अभ्यधिकः अन्यः कुतः How is anyone greater?«

**||11.44||**

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
तस्मात् प्रणम्य प्रणिधाय कायम् प्रसादये त्वाम् अहम् ईशम् ईड्यम्
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥
पिता इव पुत्रस्य सखा इव सख्युः प्रियः प्रियायाः अर्हसि देव सोढुम्

Our explanation of priyāyārhasi as priyāyāh arhasi follows Vishvanātha, Baladeva and Shrīdhara – first, Visarga ḥ is dropped by regular Sandhi and again Sandhi is made by Ārsha-prayoga. Rāmānuja explains priyāyārhasi with regular Sandhi as priyāya arhasi. According to him, priyah refers to the Lord, and priyāya means 'for one who loves You [You forgive the offenses]'.

तस्मात् »Therefore ईड्यम् ईशम् त्वाम् प्रणम्य [after] bowing down to you, the worshipable Lord कायम् प्रणिधाय [and after] prostrating the body अहम् प्रसादये I appease [you]. देव O Lord! पिता पुत्रस्य इव As a father [tolerates the offenses] of his child सखा सख्युः इव as a friend of a friend प्रियः प्रियायाः and a husband of his wife सोढुम् अर्हसि you may tolerate [my offenses].«

**||11.45||**

अदृष्टपूर्वं हृषितो ऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
अदृष्ट-पूर्वम् हृषितः अस्मि दृष्ट्वा भयेन च प्रव्यथितम् मनः मे
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥
तद् एव मे दर्शय देव रूपम् प्रसीद देव-ईश जगत्-निवास

न दृष्टम् पूर्वम् इति अदृष्ट-पूर्वम् _not seen before.

अदृष्ट-पूर्वम् दृष्ट्वा »[After] seeing what was never seen before हृषितः अस्मि I am overjoyed भयेन च मम/मे मनः प्रव्यथितम् but my mind is also perturbed by fear. देव देव-ईश जगत्-निवास प्रसीद O Lord! Be merciful (withdraw the universal form!) तद् एव रूपम् मे दर्शय show to me that very (your own) [Vishnu] form.«

The Vishnu form was shown before (see 11.17) and is now described ...

**||11.46||**

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
किरीटिनम् गदिनम् चक्र-हस्तम् इच्छामि त्वाम् द्रष्टुम् अहम् तथा एव
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥
तेन एव रूपेण चतुः-भुजेन सहस्र-बाहो भव विश्व-मूर्ते

चक्रम् हस्ते यस्य सः चक्र-हस्तः _in whose hand is a disc.

किरीटिनम् गदिनम् चक्र-हस्तम् »With crown, club and disc in hand तथा एव अहम् त्वाम् द्रष्टुम् इच्छामि just so I want to see you. सहस्र-बाहो विश्व-मूर्ते O Lord! तेन एव चतुः-भुजेन रूपेण भव Appear with that very (your own) four-armed [Vishnu] form.«

**||11.47||**

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
मया प्रसन्नेन तव अर्जुन इदम् रूपम् परम् दर्शितम् आत्म-योगात्
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥
तेजोमयम् विश्वम् अनन्तम् आद्यम् यद् मे त्वद्-अन्येन न दृष्ट-पूर्वम्

आत्मनः योगः इति आत्म-योगः _internal potency.

अर्जुन »O Arjuna! इदम् मम/मे परम् तेजोमयम् This my supreme, effulgent विश्वम् अनन्तम् आद्यम् रूपम् universal, unlimited and primeval form यद् त्वद्-अन्येन न दृष्ट-पूर्वम् which was not seen before by another than you आत्म-योगात् through my divine power प्रसन्नेन मया तव दर्शितम् was shown to you by me, who am pleased.«

एतद् दर्शनम् अतिदुर्लभम् लब्ध्वा After getting this vision, which is very rare त्वम् कृतार्थः असि your are blessed ...

**||11.48||**

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
न वेद-यज्ञ-अध्ययनैः न दानैः न च क्रियाभिः न तपोभिः उग्रैः
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥
एवम्-रूपः शक्यः अहम् नृ-लोके द्रष्टुम् त्वद्-अन्येन कुरु-प्रवीर

Sandhi between shakyah and aham is Ārsha-prayoga for shakyo ’ham.

कुरूणाम् प्रवीरः इति कुरु-प्रवीरः _hero of the Kurus. वेदानाम् च यज्ञानाम् च अध्ययनम् इति वेद-यज्ञ-अध्ययनम् _the study of the Vedas and of sacrifices. नृणाम् लोकः इति नृ-लोकः _‘the world of men’, this earth.

कुरु-प्रवीर »O Arjuna! न वेद-यज्ञ-अध्ययनैः Neither by study of the Vedas and [books on] sacrifices न दानैः न च क्रियाभिः nor by charities, nor by rituals न उग्रैः तपोभिः nor by severe austerities नृ-लोके त्वद्-अन्येन in the world of men by other than you एवम्-रूपः अहम् द्रष्टुम् शक्यः I can be seen in this form.«

एवम् अपि Even this being so (that you should actually feel blessed) चेद् तव इदम् घोरम् रूपम् दृष्ट्वा व्यथा भवति if you are perturbed after seeing this terrible form तर्हि तद् एव रूपम् दर्शयामि then I shall show that [My] very form ...

**||11.49||**

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ् ममेदम् ।
मा ते व्यथा मा च विमूढ-भावः दृष्ट्वा रूपम् घोरम् ईदृक् मम इदम्
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥
व्यपेत-भीः प्रीत-मनाः पुनः त्वम् तद् एव मे रूपम् इदम् प्रपश्य

व्यपेता भीः यस्य सः व्यपेत-भीः _whose fear is gone. प्रीतम् मनः यस्य सः प्रीत-मनाः _whose mind is pleased.

इदम् मम ईदृक् घोरम् रूपम् दृष्ट्वा »[After] seeing such a terrible [universal] form of Mine तव/ते व्यथा मा be not your perturbation विमूढ-भावः च मा and be not bewildered. व्यपेत-भीः प्रीत-मनाः [Being] free from fear and happy in mind तद् एव इदम् मम/मे रूपम् that very [Vishnu] form of Mine त्वम् पुनः प्रपश्य again behold (see 11.17).«

**||11.50||**

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
इति अर्जुनम् वासुदेवः तथा उक्त्वा स्वकम् रूपम् दर्शयामास भूयः
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥
आश्वासयामास च भीतम् एनम् भूत्वा पुनः सौम्य-वपुः महा-आत्मा

इति अर्जुनम् तथा उक्त्वा »[After] thus speaking in this way to Arjuna वासुदेवः स्वकम् रूपम् भूयः दर्शयामास the Lord again showed His own [four-armed Vishnu] form पुनः च सौम्य-वपुः भूत्वा and [after] again assuming a pleasing [two-armed] form महा-आत्मा भीतम् एनम् आश्वासयामास the Lord consoled the frightened one (Arjuna).«

According to the commentary of Vishvanātha on this verse, Krishna shows to Arjuna again His four-armed form, but then His original two-armed form. This explains (1) why Arjuna could develop such an intimate friendship with Krishna (see 11.41); (2) why Arjuna was surprised to see Krishna's four-armed Vishnu form (see 11.17); and (3) why Arjuna now sees a mānusham rūpam (human form, see 11.51).

**||11.51||**

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन । इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥
दृष्ट्वा इदम् मानुषम् रूपम् तव सौम्यम् जनार्दन इदानीम् अस्मि संवृत्तः सचेताः प्रकृतिम् गतः

जनार्दन »O Lord! इदम् तव सौम्यम् मानुषम् रूपम् दृष्ट्वा [After] seeing this your pleasing [two-armed] human form इदानीम् सचेताः संवृत्तः अस्मि I have now become pacified प्रकृतिम् गतः and attained [my] normal condition.«

**||11.52||**

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥

सुदुर्दर्शम् इदम् रूपम् दृष्टवान् असि यद् मम देवाः अपि अस्य रूपस्य नित्यम् दर्शन-काङ्क्षिणः

यद् मम रूपम् दृष्टवान् असि »The [universal] form of mine which you have seen इदम् सुदुर्दर्शम् it is very difficult to behold, देवाः अपि even the Devas अस्य रूपस्य नित्यम् दर्शन-काङ्क्षिणः are always eager to see this form.«

**||11.53||**

नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

न अहम् वेदैः न तपसा न दानेन न च इज्यया शक्यः एवम्-विधः द्रष्टुम् दृष्टवान् असि माम् यथा

यथा माम् दृष्टवान् असि »As you have seen me न वेदैः न तपसा neither by [studying] the Vedas, nor by austerity न दानेन न च इज्यया nor by charity, nor by sacrifice अहम् एवम्-विधः द्रष्टुम् शक्यः I can be seen in this way.«

**||11.54||**

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥

भक्त्या तु अनन्यया शक्यः अहम् एवम्-विधः अर्जुन ज्ञातुम् द्रष्टुम् च तत्त्वेन प्रवेष्टुम् च परन्तप

परन्तप अर्जुन »O Arjuna! अन्-अन्यया भक्त्या तु Only by unalloyed devotion अहम् एवम्-विधः I am in this form तत्त्वेन ज्ञातुम् द्रष्टुम् च प्रवेष्टुम् च शक्यः truly able to be known, seen and taken shelter of.«

For the translation of *praveshtum* ('to enter') as 'to be taken shelter of', see note under verse (11.21). Some philosophies (Advaita) hold that that the individual soul (Ātmā) is not different from the Supersoul (Paramātmā), and that liberation means, becoming one with God, or merging into Him. They stress the fact that the Ātmā is qualitatively similar to the Paramātmā, namely conscious. But the Ātmā is very small and prone to be bewildered by the external energy (Māyā), whereas Paramātmā is the greatest soul and never under illusion. "It is well known that the Supersoul is different from the individual soul owing to qualities like non-attachment ..." (Subodhinī 8.4)

**||11.55||**

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥

मद्-कर्म-कृत् मद्-परमः मद्-भक्तः सङ्ग-वर्जितः निर्वैरः सर्व-भूतेषु यः सः माम् एति पाण्डव

मम कर्म करोति यः सः मद्-कर्म-कृत् _who does my work. अहम् परमः यस्य सः मद्-परमः _whose supreme [shelter or master] am I. सङ्गेन वर्जितः यः सः सङ्ग-वर्जितः _who is free from attachment.

पाण्डव »O Arjuna! यः मद्-कर्म-कृत् मद्-परमः One who works for me, is fixed on me मद्-भक्तः सङ्ग-वर्जितः is my devotee, free from attachment सर्व-भूतेषु निर्वैरः and without enmity towards any being सः माम् एति he comes to me.«

||12.1||

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥

एवम् सतत-युक्ताः ये भक्ताः त्वाम् पर्युपासते ये च अपि अ-क्षरम् अ-व्यक्तम् तेषाम् के योग-वित्तमाः

योग-विदाम् श्रेष्ठः इति योग-वित्तमः _best of the knowers of Yoga.

एवम् सतत-युक्ताः »Thus being constantly devoted (by offering You all activities) ये भक्ताः त्वाम् पर्युपासते those devotees who worship you (i.e., who meditate on You) ये च अपि अ-व्यक्तम् अ-क्षरम् and also those who [worship] the unmanifest [impersonal] Brahma तेषाम् के योग-वित्तमाः of those [two classes] who are best [versed] in Yoga?«

||12.2||

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥

मयि आवेश्य मनः ये माम् नित्य-युक्ताः उपासते श्रद्धया परया उपेताः ते मे युक्त-तमाः मताः

परया श्रद्धया उपेताः »[Being] endowed with transcendental faith नित्य-युक्ताः and constantly devoted मनः मयि आवेश्य [after] absorbing [their] mind in me ये माम् उपासते those who worship me ते युक्ततमाः मम/मे मताः they are the best Yogīs considered by me (mama for mayā).«

||12.3-4||

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥

ये तु अ-क्षरम् अ-निर्देश्यम् अ-व्यक्तम् पर्युपासते सर्वत्र-गम् अ-चिन्त्यम् च कूट-स्थम् अ-चलम् ध्रुवम्

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥

सन्नियम्य इन्द्रिय-ग्रामम् सर्वत्र सम-बुद्धयः ते प्राप्नुवन्ति माम् एव सर्व-भूत-हिते रताः

ये तु »But those who अ-निर्देश्यम् अ-व्यक्तम् on the indescribable, unmanifest सर्वत्र-गम् अ-चिन्त्यम् all-pervading, inconceivable कूट-स्थम् अ-चलम् ध्रुवम् च अ-क्षरम् changeless, unmoving and fixed Brahma पर्युपासते meditate, इन्द्रिय-ग्रामम् सन्नियम्य [after] perfectly controlling all the senses सर्वत्र सम-बुद्धयः [being] equal-minded towards all सर्व-भूत-हिते रताः and engaged in the welfare of all ते माम् एव प्राप्नुवन्ति they [also] achieve me alone.«

तर्हि इतरेषाम् युक्ततमत्वम् कुतः Then where is the excellence of the other (former) ones? ...

||12.5||

क्लेशो ऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥

क्लेशः अधिकतरः तेषाम् अव्यक्त-आसक्त-चेतसाम् अ-व्यक्ता हि गतिः दुःखम् देहवद्भिः अवाप्यते

अ-व्यक्ते आसक्तम् चेतः यस्य सः अव्यक्त-आसक्त-चेताः _whose mind is attached to the unmanifest.

तेषाम् अव्यक्त-आसक्त-चेतसाम् »For those attached to the unmanifest क्लेशः अधिकतरः the trouble is greater, अ-व्यक्ता गतिः the unmanifest goal देहवद्भिः दुःखम् हि अवाप्यते is only with difficulty achieved by embodied being.«

||12.6-7||

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते ॥

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मद्-पराः अनन्येन एव योगेन माम् ध्यायन्तः उपासते

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्॥
तेषाम् अहम् समुद्धर्ता मृत्यु-संसार-सागरात् भवामि न चिरात् पार्थ मयि आवेशित-चेतसाम्

अहम् परः यस्य सः मद्-परः _whose supreme [shelter or master] am I. मृत्यु-संसारस्य सागरः इति मृत्यु-संसार-सागरः _the ocean of the cycles of deaths. आवेशितम् चेतः येन सः आवेशित-चेताः _by whom the mind is absorbed.

मद्-पराः »Being fixed on me सर्वाणि कर्माणि मयि सन्न्यस्य [after] surrendering all activities unto me अनन्येन एव योगेन माम् ध्यायन्तः meditating on me with unalloyed devotion ये तु उपासते those who worship [me thus], पार्थ O Arjuna! तेषाम् For those मयि आवेशित-चेतसाम् their minds being absorbed in me मृत्यु-संसार-सागरात् from the ocean of death and rebirth अहम् समुद्धर्ता न चिरात् भवामि I become the deliverer without delay.«

**||12.8||**

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥
मयि एव मनः आधत्स्व मयि बुद्धिम् निवेशय निवसिष्यसि मयि एव अतः ऊर्ध्वम् न संशयः

Sandhi was not made between eva and atah (Ārsha-prayoga).

मयि एव मनः आधत्स्व »[Therefore] concentrate the mind on me alone मयि बुद्धिम् निवेशय and absorb your intelligence in me, अतः ऊर्ध्वम् मयि एव निवसिष्यसि hereafter you will live with ('in') me, न संशयः no doubt.«

There are four grades of advancement. The order of superiority is first indicated as (1) meditation (Dhyāna, 12.8) as the highest → (2) Yoga (Abhyāsa, 12.9) → (3) rites (Karma, 12.10) → (4) renunciation (Phala-tyāga, 12.11), but later (12.12), (4) *true* renunciation is being praised above all (3) rites, (2) Yoga and (1) meditation.

**||12.9||**

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥
अथ चित्तम् समाधातुम् न शक्नोषि मयि स्थिरम् अभ्यास-योगेन ततः माम् इच्छ आप्तुम् धनञ्जय

अभ्यासस्य योगः इति अभ्यास-योगः _the means of practice.

धनञ्जय »O Arjuna! अथ चित्तम् If the mind मयि स्थिरम् समाधातुम् न शक्नोषि you can not concentrate steadily on me ततः अभ्यास-योगेन then by means of practice (Abhyāsa) माम् आप्तुम् इच्छ you must seek to attain me.«

**||12.10||**

अभ्यासे ऽप्यसमर्थो ऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥
अभ्यासे अपि अ-समर्थः असि मद्-कर्म-परमः भव मद्-अर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि

मम कर्म परमम् यस्य सः मद्-कर्म-परमः _for whom my work is supreme.

अभ्यासे अपि अ-समर्थः असि »[If] you are unable for such practice even मद्-कर्म-परमः भव become devoted to do rites for me (like fasting on Ekādashī). मद्-अर्थम् कर्माणि कुर्वन् अपि Even [while] performing rites (Karma) for me सिद्धिम् अवाप्स्यसि you will achieve perfection (liberation).«

||12.11||

अथैतदप्यशक्तो ऽसि कर्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥

अथ एतद् अपि अ-शक्तः असि कतुम् मद्-योगम् आश्रितः सर्व-कर्म-फल-त्यागम् ततः कुरु यत-आत्मवान्

मम योगः इति मद्-योगः _my Yoga.

अथ एतद् अपि कर्तुम् अ-शक्तः असि »If you are unable to do even this ततः मद्-योगम् आश्रितः then, being surrendered to my Yoga यत-आत्मवान् and being self-controlled सर्व-कर्म-फल-त्यागम् कुरु renounce the fruit of all activities (Phala-tyāga).«

मया तावत् ईश्वर-आज्ञया यथा-शक्ति कर्माणि कर्तव्यानि All activities are to be done by Me under the Lord's order according to my ability. फलम् पुनः दृष्टम् अ-दृष्टम् वा परमेश्वर-आधीनम् But the result, whether visible or invisible, depends on the Lord. फल-आसक्तिम् परित्यज्य Thus giving up the hankering for results.

||12.12||

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते। ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्॥

श्रेयः हि ज्ञानम् अभ्यासात् ज्ञानात् ध्यानम् विशिष्यते ध्यानात् कर्म-फल-त्यागः त्यागात् शान्तिः अनन्तरम्

कर्मणाम् फलस्य त्यागः इति कर्म-फल-त्यागः _the renunciation of the fruit of activities.

अभ्यासात् ज्ञानम् हि श्रेयः »Better than Abhyāsa [without proper knowledge, (12.9)] is indeed Jnāna (spiritual knowledge based on Shāstra coupled with reasoning), ज्ञानात् ध्यानम् विशिष्यते better than Jnāna is Dhyāna (12.8), ध्यानात् कर्म-फल-त्यागः [and better] than Dhyāna is [true] (4) Karma-phala-tyāga (12.11), त्यागात् अनन्तरम् शान्तिः after Tyāga comes peace (liberation).« (See Note under 12.8)

एवम्-भूतस्य भक्तस्य Of such a devotee क्षिप्रम् एव परमेश्वर-प्रसाद-हेतून् धर्मान् the virtues (Dharma) which quickly cause the mercy of the Lord आह are stated ...

||12.13-14||

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥

अद्वेष्टा सर्व-भूतानाम् मैत्रः करुणः एव च निर्ममः निरहङ्कारः सम-दुःख-सुखः क्षमी

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥

सन्तुष्टः सततम् योगी यत-आत्मा दृढ-निश्चयः मयि अर्पित-मनः-बुद्धिः यः मद्-भक्तः सः मे प्रियः

दृढः निश्चयः यस्य सः दृढ-निश्चयः _whose determination is firm.

सर्व-भूतानाम् »Towards all beings अ-द्वेष्टा मैत्रः करुणः एव च one who is without hatred [towards superiors], friendly [towards equals] and compassionate [towards inferiors] निर्ममः निरहङ्कारः free from proprietorship and false ego सम-दुःख-सुखः क्षमी equal in distress and happiness, tolerant सततम् सन्तुष्टः योगी always satisfied and contemplative यत-आत्मा दृढ-निश्चयः self-controlled and determined मयि अर्पित-मनः-बुद्धिः his mind and intelligence fixed on me – यः मद्-भक्तः सः मम/मे प्रियः such a devotee of Mine is my beloved.«

**||12.15||**

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥

यस्मात् न उद्विजते लोकः लोकात् न उद्विजते च यः हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः यः सः च मे प्रियः

यस्मात् लोकः न उद्विजते »From whom the world is not disturbed यः च लोकात् न उद्विजते and who is not disturbed from the world यः च हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः who is free from jubilation, impatience (intolerance at another's gain), fear and anxiety (agitation of the mind due to fear), सः मम/मे प्रियः he is my beloved.«

**||12.16||**

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥

अनपेक्षः शुचिः दक्षः उदासीनः गत-व्यथः सर्व-आरम्भ-परित्यागी यः मद्-भक्तः सः मे प्रियः

गता व्यथा यस्य सः गत-व्यथः _whose anxiety is gone. सर्वेषाम् आरम्भाणाम् परित्यागी इति सर्व-आरम्भ-परित्यागी _the renouncer of all endeavors.

अनपेक्षः शुचिः दक्षः »Being indifferent (without hankering even for objects which come of themselves), clean (with external and internal purity) and expert (not lazy) उदासीनः गत-व्यथः neutral (not taking sides) and free from anxiety सर्व-आरम्भ-परित्यागी renouncing [the result] in all endeavors, यः मद्-भक्तः सः मम/मे प्रियः such a devotee of Mine is my beloved.«

**||12.17||**

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥

यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति शुभ-अशुभ-परित्यागी भक्तिमान् यः सः मे प्रियः

शुभस्य च अ-शुभस्य च परित्यागी इति शुभ-अशुभ-परित्यागी _the renouncer of the auspicious and inauspicious.

यः न हृष्यति न द्वेष्टि »One who neither rejoices [on getting what is pleasing] nor hates [on getting what is unpleasing] न शोचति न काङ्क्षति neither laments [on loosing a desired object] nor desires [an object not yet obtained] शुभ-अशुभ-परित्यागी completely detached from virtue and sin, यः भक्तिमान् सः मम/मे प्रियः such a devotee is my beloved.«

**||12.18-19||**

समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥

समः शत्रौ च मित्रे च तथा मान-अपमानयोः शीत-उष्ण-सुख-दुःखेषु समः सङ्ग-विवर्जितः

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥

तुल्य-निन्दा-स्तुतिः मौनी सन्तुष्टः येन केनचिद् अ-निकेतः स्थिर-मतिः भक्तिमान् मे प्रियः नरः

तुल्ये निन्दा-स्तुती यस्य सः तुल्य-निन्दा-स्तुतिः _for whom blame and praise are equal. न विद्यते निकेतः यस्य सः अ-निकेतः _whose residence does not exist.

शत्रौ च मित्रे च समः »Being equal towards enemy and friend तथा मान-अपमानयोः and towards honor and dishonor शीत-उष्ण-सुख-दुःखेषु समः equal towards cold and heat, happiness and distress सङ्ग-विवर्जितः and without attachments तुल्य-निन्दा-स्तुतिः equal towards blame and

praise मौनी येन केनचिद् सन्तुष्टः who is silent and satisfied with anything अ-निकेतः स्थिर-मतिः without [fixed] residence, steady in mind (i.e., sober) भक्तिमान् मम/मे प्रियः नरः [such] a man with devotion is my beloved.«

**||12.20||**

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥

ये तु धर्म-अमृतम् इदम् यथा उक्तम् पर्युपासते श्रद्दधानाः मद्-परमाः भक्ताः ते अतीव मे प्रियाः

धर्मस्य अमृतम् इति धर्म-अमृतम् _'the nectar of Dharma', i.e., धर्मः एव अमृतम् इति धर्म-अमृतम् _the nectar which is Dharma.

ये तु श्रद्दधानाः मद्-परमाः भक्ताः »Those who are faithful and dedicated devotees यथा उक्तम् इदम् धर्म-अमृतम् पर्युपासते who follow this eternal Dharma as described (or: Dharma which is nectar because it leads to immortality) ते मम/मे अतीव प्रियाः they are my very beloved.«

**||13.1||**

प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च। एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव॥

प्रकृतिम् पुरुषम् च एव क्षेत्रम् क्षेत्र-ज्ञम् एव च एतद् वेदितुम् इच्छामि ज्ञानम् ज्ञेयम् च केशव

क्षेत्रम् जानाति यः सः क्षेत्र-ज्ञः _who knows the field.

केशव »O Lord! प्रकृतिम् पुरुषम् च एव [What are] 'nature' (Prakriti) and 'enjoyer' (Purusha) क्षेत्रम् क्षेत्र-ज्ञम् एव च 'field' (Kshetra) and 'farmer' (Kshetra-jna) ज्ञानम् ज्ञेयम् च 'knowledge' (Jnāna) and 'object of knowledge' (Jneya) एतद् वेदितुम् इच्छामि this I want to know.«

This verse is omitted in some editions. Therefore, the numbering in this chapter may differ. Prakriti and Purusha will be described in verses (13.20 ff.), Kshetra and Kshetra-jna in (13.2 ff.), Jnāna in (13.8 ff.) and Jneya in (13.13 ff.). Shrī Krishna said ...

**||13.2||**

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥

इदम् शरीरम् कौन्तेय क्षेत्रम् इति अभिधीयते एतद् यः वेत्ति तम् प्राहुः क्षेत्र-ज्ञः इति तद्-विदः

कौन्तेय »O Arjuna! इदम् शरीरम् क्षेत्रम् इति अभिधीयते This body is called 'field' (Kshetra, since it is the basis of all enjoyment, the sprouting ground of material existence), यः एतद् वेत्ति and he who knows it (the one who identifies with that particular body) तद्-विदः तम् क्षेत्र-ज्ञः इति प्राहुः the knowers of it (their difference) call him 'farmer' (Kshetra-jna, since he is the enjoyer of the fruit, like the farmer).«

**||13.3||**

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥

क्षेत्र-ज्ञम् च अपि माम् विद्धि सर्व-क्षेत्रेषु भारत क्षेत्र-क्षेत्रज्ञयोः ज्ञानम् यद् तद् ज्ञानम् मतम् मम

भारत »O Arjuna! सर्व-क्षेत्रेषु In all bodies माम् अपि च क्षेत्र-ज्ञम् विद्धि know me also as Kshetra-jna यद् क्षेत्र-क्षेत्रज्ञयोः ज्ञानम् the knowledge of [the difference between] Kshetra (body) and Kshetra-jna (soul) तद् ज्ञानम् मम मतम् that is [true] Jnāna in my opinion.«

... मोक्ष-हेतुत्वात् Because it leads to liberation. अन्यत् तु वृथा पाण्डित्यम् Other learning is useless बन्ध-हेतुत्वात् since it causes bondage.

**||13.4||**

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥
तद् क्षेत्रम् यद् च यादृक् च यद्-विकारि यतः च यद् सः च यः यद्-प्रभावः च तद् समासेन मे शृणु

यद् तद् क्षेत्रम् च »(1) What that Kshetra is (its constitution) यादृक् च (2) what it is like (its qualities) यद्-विकारि (3) what its transformations are (the senses) यतः (4) from where it comes (as combination of spirit and matter) यद् च (5) and what it is (its forms, like stationary and moving) सः च यः (6) and what he (the Kshetra-jna) is यद्-प्रभावः च (7) and what his abilities are तद् समासेन मम/मे शृणु that hear in summary by me (mama her means mayā).«

कैः विस्तरेण उक्तस्य अयम् सङ्क्षेपः Of whose elaborate teaching is this a summary? ...

**||13.5||**

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥
ऋषिभिः बहुधा गीतम् छन्दोभिः विविधैः पृथक् ब्रह्मसूत्र-पदैः च एव हेतुमद्भिः विनिश्चितैः

ऋषिभिः »By sages (like Vasishtha, in Yoga scriptures) विविधैः छन्दोभिः by the different Vedas हेतुमद्भिः विनिश्चितैः and, ascertained by arguments ब्रह्मसूत्र-पदैः च एव by the words of the Vedānta-Sūtra (Brahma-Sūtra) पृथक् बहुधा गीतम् it is differently taught ('sung') in many ways.«

तत्र क्षेत्र-स्वरूपम् आह The constitution of the Kshetra is stated ...

**||13.6-7||**

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥
महा-भूतानि अहङ्कारः बुद्धिः अ-व्यक्तम् एव च इन्द्रियाणि दश एकम् च पञ्च च इन्द्रिय-गोचराः
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः । एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥
इच्छा द्वेषः सुखम् दुःखम् सङ्घातः चेतना धृतिः एतद् क्षेत्रम् समासेन स-विकारम् उदाहृतम्

इन्द्रियस्य गो-चरः इति इन्द्रिय-गोचरः _'the pasturing ground of the senses', sense oject.

महा-भूतानि अहङ्कारः »The [5] gross elements (Mahā-bhūta) and ego (Ahankāra) बुद्धिः अ-व्यक्तम् एव च cosmic intelligence (Mahat) and the unmanifest (Pradhāna) दश एकम् च इन्द्रियाणि the ten senses plus the one (the mind) पञ्च इन्द्रिय-गोचराः च and the five sense objects (Tan-mātras) (thus the 24 elements have been enumerated; plus mental states like desire and hatred, happiness and distress) इच्छा द्वेषः सुखम् दुःखम् desire and hatred, happiness and distress सङ्घातः चेतना धृतिः body (??), awareness and determination एतद् स-विकारम् क्षेत्रम् this is the Kshetra and its transformations (senses) समासेन उदाहृतम् described in summary.«

इच्छादयः Desire etc. दृश्यत्वात् being objects of cognition न आत्म-धर्माः are not attributes of the soul अपितु मनः-धर्माः एव but are attributes of the mind alone अतः क्षेत्र-अन्तः-पातिनः एव and thus they come under Kshetra. इदानीम् Now उक्त-लक्षणात् क्षेत्रात् विविक्ततया as distinct from the body (Kshetra) described above ज्ञेयम् शुद्धम् क्षेत्र-ज्ञम् विस्तरेण वर्णयिष्यन् in order to describe at

length the pure soul (Kshetra-jna), the Jneya तद्-ज्ञान-साधनानि आह the means to knowledge about that [soul] are stated (see 13.1 – Jnāna-Jneya) ...

**||13.8-12||**

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥
अ-मानित्वम् अ-दम्भित्वम् अ-हिंसा क्षान्तिः आर्जवम् आचार्य-उपासनम् शौचम् स्थैर्यम् आत्म-विनिग्रहः
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
इन्द्रिय-अर्थेषु वैराग्यम् अनहङ्कारः एव च जन्म-मृत्यु-जरा-व्याधि-दुःख-दोष-अनुदर्शनम्
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
अ-सक्तिः अनभिष्वङ्गः पुत्र-दार-गृहादिषु नित्यम् च सम-चित्तत्वम् इष्ट-आनिष्ट-उपपत्तिषु
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
मयि च अनन्य-योगेन भक्तिः अ-व्यभिचारिणी विविक्त-देश-सेवित्वम् अ-रतिः जन-संसदि
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो ऽन्यथा ॥
अध्यात्म-ज्ञान-नित्यत्वम् तत्त्व-ज्ञान-अर्थ-दर्शनम् एतद् ज्ञानम् इति प्रोक्तम् अ-ज्ञानम् यद् अतः अन्यथा

आचार्यस्य उपासनम् इति आचार्य-उपासनम् _worship of the preceptor. जन्म-मृत्यु-जरा-व्याधीनाम् दुःख-दोषस्य अनुदर्शनम् इति जन्म-मृत्यु-जरा-व्याधि-दुःख-दोष-अनुदर्शनम् _perceiving the evil of the misery of birth, death, old age and disease. जनानाम् संसद् इति जन-संसद् _'assembly of men', people in general. तत्त्व-ज्ञानस्य अर्थस्य दर्शनम् इति तत्त्व-ज्ञान-अर्थ-दर्शनम् _contemplating the purpose of tattva-jnāna.

अ-मानित्वम् अ-दम्भित्वम् »Pridelessness, non-deceit; अ-हिंसा क्षान्तिः आर्जवम् non-violence (A-himsā); tolerance; honesty (Ārjava); आचार्य-उपासनम् शौचम् service to the teacher; purity (external and internal); स्थैर्यम् आत्म-विनिग्रहः steadiness [on the path of Dharma]; self-control; इन्द्रिय-अर्थेषु वैराग्यम् detachment (Vairāgya) from sense objects; अनहङ्कारः एव च and absence of egotism (An-ahankāra); जन्म-मृत्यु-जरा-व्याधि-दुःख- of the miseries of birth, death, old age and disease -दोष-अनुदर्शनम् perceiving their evil; अ-सक्तिः non-attachment; पुत्र-दार-गृह-आदिषु अनभिष्वङ्गः non-identification with children, wife, home, etc.; इष्ट-अनिष्ट-उपपत्तिषु च and in good and bad events नित्यम् सम-चित्तत्वम् constant even-mindedness; अनन्य-योगेन च and by exclusive meditation मयि अ-व्यभिचारिणी भक्तिः undeviating devotion (Bhakti) to me; विविक्त-देश-सेवित्वम् inhabitation of a solitary place; जन-संसदि अ-रतिः detachment towards general (wordly-minded) people; अध्यात्म-ज्ञान-नित्यत्वम् always dwelling on spiritual knowledge; तत्त्व-ज्ञान-अर्थ-दर्शनम् search for the Absolute Truth – एतद् ज्ञानम् इति प्रोक्तम् all this (these 20 qualities) is called [the means to true] knowledge. यद् अतः अन्यथा अ-ज्ञानम् What is contrary is ignorance (A-jnāna).«

एभिः साधनैः यद् ज्ञेयम् That which is to be known (Jneya) by these [20] means तद् आह that is stated [in verses 13.13-18] ...

||13.13||

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

ज्ञेयम् यद् तद् प्रवक्ष्यामि यद् ज्ञात्वा अमृतम् अश्नुते अनादि मद्-परम् ब्रह्म न सत् तद् न अ-सत् उच्यते

There is another reading – an-ādimat param. But, an-ādi ('beginningless', see 10.3,13.20) and mat-para ('subordinate to Me', see 2.61,6.14,12.6,12.20,18.57) are already used with these meanings throughout the Gītā – so why not in this verse?

अहम् परः यस्य सः मद्-परः _whose supreme [shelter or master] am I.

यद् ज्ञेयम् तद् प्रवक्ष्यामि »What is to be known (Jneya) I will explain यद् ज्ञात्वा अमृतम् अश्नुते [after] knowing which one attains immortality तद् अनादि मद्-परम् ब्रह्म that is the beginningless Brahma, which is subordinate to me (the Lord), न सत् न अ-सत् उच्यते it is said to be neither gross nor subtle [matter].«

||13.14||

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥

सर्वतः पाणि-पादम् तद् सर्वतः अक्षि-शिरः-मुखम् सर्वतः श्रुतिमत् लोके सर्वम् आवृत्य तिष्ठति

सर्वतः पाणि-पादम् »With hands and legs everywhere सर्वतः अक्षि-शिरः-मुखम् with eyes, heads and mouths everywhere सर्वतः श्रुतिमत् with ears everywhere (through the activities that belong to all the creatures) लोके सर्वम् आवृत्य [after] pervading everything in the world तद् तिष्ठति that [Brahma] exists [as Paramātmā].«

||13.15||

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥

सर्व-इन्द्रिय-गुण-आभासम् सर्व-इन्द्रिय-विवर्जितम् अ-सक्तम् सर्व-भृत् च एव निर्गुणम् गुण-भोक्तृ च

सर्वाणि इन्द्रियाणि गुणान् च आभासयति यद् तद् सर्व-इन्द्रिय-गुण-आभासम् _which manifests all senses and Gunas. सर्वैः इन्द्रियैः विवर्जितम् इति सर्व-इन्द्रिय-विवर्जितम् _devoid of all senses. सर्वम् बिभर्ति यद् तद् सर्व-भृत् _which maintains all. गुणानाम् भोक्तृ इति गुण-भोक्तृ _master of the Gunas.

सर्व-इन्द्रिय-गुण-आभासम् »[And as Paramātmā] it appears to have the functions (Guna) of all the senses सर्व-इन्द्रिय-विवर्जितम् [yet is] without all senses, अ-सक्तम् सर्व-भृत् च एव it is unattached [yet] maintaining everything निर्गुणम् गुण-भोक्तृ च and it is beyond the Gunas [yet] the master of the Gunas.«

(Verse without Sandhi und Samāsa:) अ-पाणि-पादः Without hands and feet जवनः ग्रहीता He moves fast and grasps. पश्यति अ-चक्षुः He sees without eyes. सः शृणोति अ-कर्णः He hears without ears. (श्वेताश्वतर-उपनिषद् 3.19)

||13.16||

बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥

बहिः अन्तः च भूतानाम् अ-चरम् चरम् एव च सूक्ष्मत्वात् तद् अ-विज्ञेयम् दूर-स्थम् च अन्तिके च तद्

भूतानाम् बहिः अन्तः च »It is outside and inside (as cause) of all beings अ-चरम् चरम् एव च it is non-moving and moving सूक्ष्मत्वात् तद् अ-विज्ञेयम् because of being subtle it is incomprehensible तद् दूर-स्थम् च अन्तिके च it is situated far and near.«

अ-विदुषाम् योजन-लक्ष-अन्तरितम् इव दूर-स्थम् च For the ignorant it is far, as if thousands of Yojanas away स-विकारायाः प्रकृतेः परत्वात् because of being beyond nature which is subject to change. विदुषाम् पुनः प्रत्यक्-आत्मत्वात् अन्तिके च And for the wise again it is near, being their very soul.

**||13.17||**

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् । भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥

अ-विभक्तम् च भूतेषु विभक्तम् इव च स्थितम् भूत-भर्तृ च तद् ज्ञेयम् ग्रसिष्णु प्रभविष्णु च

भूतेषु अ-विभक्तम् च »[Although] not divided in all beings (as the cause it is not divided, i.e., one) विभक्तम् इव च स्थितम् it is situated as if divided (as effect it is as if divided). भूत-भर्तृ ग्रसिष्णु च प्रभविष्णु च It (Brahma as Supersoul) is the maintainer of all beings, the destroyer and creator तद् ज्ञेयम् that is the Jneya.«

**||13.18||**

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥

ज्योतिषाम् अपि तद् ज्योतिः तमसः परम् उच्यते ज्ञानम् ज्ञेयम् ज्ञान-गम्यम् हृदि सर्वस्य विष्ठितम्

ज्ञानेन गम्यम् इति ज्ञान-गम्यम् _to be reached by knowledge.

ज्योतिषाम् अपि तद् ज्योतिः »It is the light of even the lights (the illuminer even of moon and sun) तमसः परम् उच्यते [and therefore] it is said to be beyond darkness /ignorance, ज्ञानम् ज्ञेयम् it is knowledge (Jnāna) and the object of knowledge (Jneya) ज्ञान-गम्यम् it is attainable by knowledge (Jnāna, 13.8) सर्वस्य हृदि विष्ठितम् it is present in the heart of all (as inner ruler).«

ज्ञानम् तद् एव बुद्धि-वृत्तौ अभिव्यक्तम् It is knowledge, manifest in the functions of the intellect तद् एव रूपादि-आकारेण ज्ञेयम् च and it is the knowlable in the form of color, etc.

**||13.19||**

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः । मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥

इति क्षेत्रम् तथा ज्ञानम् ज्ञेयम् च उक्तम् समासतः मद्-भक्तः एतद् विज्ञाय मद्-भावाय उपपद्यते

इति क्षेत्रम् तथा ज्ञानम् ज्ञेयम् च »Thus Kshetra (13.2 ff.), Jnāna (13.8 ff.) and Jneya (13.13 ff.) समासतः उक्तम् are described in summary, एतद् विज्ञाय [after] understanding [all] this मद्-भक्तः मद्-भावाय उपपद्यते my devotee is eligible for my nature.«

**||13.20||**

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥

प्रकृतिम् पुरुषम् च एव विद्धि अनादी उभौ अपि विकारान् च गुणान् च एव विद्धि प्रकृति-सम्भवान्

प्रकृतेः सम्भवः यस्य सः प्रकृति-सम्भवः _whose generation is from Prakriti.

प्रकृतिम् पुरुषम् च एव »Prakriti and Purusha उभौ अपि अनादी विद्धि know both as beginningless, विकारान् च गुणान् च एव and the transformations (senses) and their qualities प्रकृति-सम्भवान् विद्धि know to be born from Prakriti.«

**||13.21||**

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥

कार्य-कारण-कर्तृत्वे हेतुः प्रकृतिः उच्यते पुरुषः सुख-दुःखानाम् भोक्तृत्वे हेतुः उच्यते

कार्यस्य च कारणस्य च कर्तृत्वम् इति कार्य-कारण-कर्तृत्वम् _the doership of effect and cause.

कार्य-कारण-कर्तृत्वे »In producing effect (body) and cause (senses) प्रकृतिः हेतुः उच्यते Prakriti is said to be the cause. सुख-दुःखानाम् भोक्तृत्वे In experiencing happiness and distress पुरुषः हेतुः उच्यते the Purusha is said to be the cause.«

**||13.22||**

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् । कारणं गुणसङ्गो ऽस्य सदसद्योनिजन्मसु ॥

पुरुषः प्रकृति-स्थः हि भुङ्क्ते प्रकृति-जान् गुणान् कारणम् गुण-सङ्गः अस्य सत्-असत्-योनि-जन्मसु

प्रकृतौ तिष्ठति यः सः प्रकृति-स्थः _who stays in Prakriti. सत्-असत्-योनिषु जन्म इति सत्-असत्-योनि-जन्म _birth in high and low species. गुणैः सङ्गः इति गुण-सङ्गः _contact with the Gunas.

प्रकृति-स्थः हि पुरुषः »The Purusha, residing in Prakriti (a body produced by Prakriti) प्रकृति-जान् गुणान् भुङ्क्ते experiences qualities [like happiness and distress] produced by Prakriti (the body). सत्-असत्-योनि-जन्मसु In births among high and low species अस्य गुण-सङ्गः कारणम् his contact with the Gunas is the cause.«

**||13.23||**

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तो देहे ऽस्मिन्पुरुषः परः ॥

उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महा-ईश्वरः परम-आत्मा इति च अपि उक्तः देहे अस्मिन् पुरुषः परः

अस्मिन् देहे परः पुरुषः »In this body there is another Purusha उपद्रष्टा अनुमन्ता the observer and permitter भर्ता भोक्ता महा-ईश्वरः च maintainer, enjoyer and great Lord परम-आत्मा इति च अपि उक्तः also called Supersoul.«

**||13.24||**

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह । सर्वथा वर्तमानो ऽपि न स भूयो ऽभिजायते ॥

यः एवम् वेत्ति पुरुषम् प्रकृतिम् च गुणैः सह सर्वथा वर्तमानः अपि न सः भूयः अभिजायते

पुरुषम् प्रकृतिम् च गुणैः सह »The Purusha and Prakriti with its Gunas यः एवम् वेत्ति one who thus knows [them] सर्वथा वर्तमानः अपि though acting in all ways (even transgressing all rules) सः भूयः न अभिजायते he is not born again [but liberated].«

एवम्भूत-विविक्त-आत्मज्ञाने With regard to such discriminative knowledge of the self साधन-विकल्पान् आह alternative paths are being stated ...

**||13.25||**

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना । अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥

ध्यानेन आत्मनि पश्यन्ति केचिद् आत्मानम् आत्मना अन्ये साङ्ख्येन योगेन कर्म-योगेन च अपरे

केचिद् ध्यानेन आत्मना »Some by meditation (Dhyāna) with the mind आत्मनि आत्मानम् पश्यन्ति see the soul in the body, अन्ये साङ्ख्येन योगेन others by philosophy (Sānkhya, thinking of the difference between body and soul) or [Ashtānga-]Yoga, अपरे च कर्म-योगेन and still others by Karma-yoga.«

**||13.26||**

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते । ते ऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥

अन्ये तु एवम् अ-जानन्तः श्रुत्वा अन्येभ्यः उपासते ते अपि च अतितरन्ति एव मृत्युम् श्रुति-परायणाः

श्रुतिः पर-अयनम् यस्य सः श्रुति-परायणः _whose supreme path (shelter) is Shruti (hearing or scriptures).

अन्ये तु एवम् अ-जानन्तः »But others, though not knowing thus (how to realize the self by those paths mentioned) अन्येभ्यः श्रुत्वा उपासते [after] hearing from others they meditate /worship, श्रुति-परायणाः ते अपि च even they, being devoted to hearing [the instructions] मृत्युम् अतितरन्ति एव certainly overcome death.«

**||13.27||**

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥

यावत् सञ्जायते किञ्चिद् सत्त्वम् स्थावर-जङ्गमम् क्षेत्र-क्षेत्रज्ञ-संयोगात् तद् विद्धि भरत-ऋषभ

स्थावरम् च जङ्गमम् च इति स्थावर-जङ्गमम् _stationary and movable. क्षेत्रस्य च क्षेत्र-ज्ञस्य च संयोगः इति क्षेत्र-क्षेत्रज्ञ-संयोगः _the combination of Kshetra and Kshetra-jna.

भरत-ऋषभ »O Arjuna! स्थावर-जङ्गमम् Non-moving or moving यावत् किञ्चिद् सत्त्वम् सञ्जायते whatever being takes birth तद् क्षेत्र-क्षेत्रज्ञ-संयोगात् that is from a combination of body (Kshetra) and soul (Kshetra-jna) विद्धि you must know.«

**||13.28||**

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥

समम् सर्वेषु भूतेषु तिष्ठन्तम् परम-ईश्वरम् विनश्यत्सु अ-विनश्यन्तम् यः पश्यति सः पश्यति

सर्वेषु विनश्यत्सु भूतेषु »In all perishing beings समम् तिष्ठन्तम् equally residing अ-विनश्यन्तम् परम-ईश्वरम् the imperishable supreme Lord /soul यः पश्यति सः पश्यति one who sees, he sees [truly].«

**||13.29||**

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् । न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥

समम् पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम् न हिनस्ति आत्मना आत्मानम् ततः याति पराम् गतिम्

समम् समवस्थितम् ईश्वरम् »The equally residing Lord /soul सर्वत्र हि पश्यन् [while] seeing everywhere (in all beings) आत्मना आत्मानम् न हिनस्ति he does not kill the soul by himself (by

denying its eternal, conscious and blissful nature), ततः परम् गतिम् याति and then he attains the supreme destination (liberation).«

यः तु एवम् न पश्यति But one who does not see like this सः हि he देह-आत्म-दर्शी considers the body to be the self देहेन सह आत्मानम् हिनस्ति he kills himself together with the body. तथा च श्रुतिः As Shruti says (verse without Sandhi und Samāsa:) असूर्याः नाम ते लोकाः The worlds of the Asuras अन्धेन तमसा अवृताः are covered by blinding darkness. तान् ते प्रेत्य अभिगच्छन्ति To these [worlds] go, after death ये के च आत्म-हनः जनाः those who destroy the soul. (ईश-उपनिषद् 3)

**||13.30||**

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः । यः पश्यति तथात्मानमकर्तारं स पश्यति ॥

प्रकृत्या एव च कर्माणि क्रियमाणानि सर्वशः यः पश्यति तथा आत्मानम् अ-कर्तारम् सः पश्यति

कर्माणि »[That all] activities प्रकृत्या एव सर्वशः क्रियमाणानि are being done in all respect by Prakriti alone (i.e., its transformations in the form of body and senses) तथा आत्मानम् अ-कर्तारम् च and also the soul as non-doer यः पश्यति सः पश्यति one who sees, he sees [truly].«

देह-अभिमानेन एव आत्मनः कर्तृत्वम् न स्वतः The doership attributed to the soul is only due to its identification with the body and not in itself.

**||13.31||**

यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥

यदा भूत-पृथक्-भावम् एक-स्थम् अनुपश्यति ततः एव च विस्तारम् ब्रह्म सम्पद्यते तदा

भूतानाम् पृथक् भावः इति भूत-पृथक्-भावः _the separate existence of beings.

यदा भूत-पृथक्-भावम् »When the diverse existence of all beings एक-स्थम् अनुपश्यति he sees in one (Prakriti) ततः एव विस्तारम् च and from that alone their emanation तदा ब्रह्म सम्पद्यते then he attains Brahma.«

**||13.32||**

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥

अनादित्वात् निर्गुणत्वात् परम आत्मा अयम् अ-व्ययः शरीर-स्थः अपि कौन्तेय न करोति न लिप्यते

शरीरे तिष्ठति यः सः शरीर-स्थः _who stays in the body.

कौन्तेय »O Arjuna! अनादित्वात् निर्गुणत्वात् Being beginningless and free from the Gunas अयम् अ-व्ययः परम आत्मा this [thus] changeless transcendental soul शरीर-स्थः अपि though residing in the body न करोति न लिप्यते neither it acts nor is it stained.«

**||13.33||**

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते । सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥

यथा सर्व-गतम् सौक्ष्म्यात् आकाशम् न उपलिप्यते सर्वत्र अवस्थितः देहे तथा आत्मा न उपलिप्यते

यथा सर्व-गतम् आकाशम् »Just as the all-pervading sky (existing everywhere, even in mud) सौक्ष्म्यात् न उपलिप्यते because of being subtle is not stained तथा देहे सर्वत्र अवस्थितः आत्मा similarly, the soul, situated everywhere, in a body [of every type] न उपलिप्यते is not stained.«

अ-सङ्गत्वात् लेपः न अस्ति That because of non-attachment there is no stain [for the self] इति आकाश-दृष्टान्तेन उक्तम् this is shown by the example of ether. प्रकाशकत्वात् च प्रकाश्य-धर्मैः न युज्यते That because of illumination [the self] is not touched by the qualities of the illuminated objects इति रवि-दृष्टान्तेन आह this is shown by the example of the sun ...

**||13.34||**

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥

यथा प्रकाशयति एकः कृत्स्नम् लोकम् इमम् रविः क्षेत्रम् क्षेत्री तथा कृत्स्नम् प्रकाशयति भारत

भारत »O Arjuna! यथा एकः रविः Just as one sun इमम् कृत्स्नम् लोकम् प्रकाशयति illuminates this whole world, तथा क्षेत्री the soul similarly कृत्स्नम् क्षेत्रम् प्रकाशयति illuminates the whole body.«

**||13.35||**

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा । भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥

क्षेत्र-क्षेत्रज्ञयोः एवम् अन्तरम् ज्ञान-चक्षुषा भूत-प्रकृति-मोक्षम् च ये विदुः यान्ति ते परम्

भूतानाम् प्रकृतेः मोक्षः इति भूत-प्रकृति-मोक्षः _liberation from the Prakriti of the beings. ज्ञानम् चक्षुः यस्य सः ज्ञान-चक्षुः _whose eye is knowledge.

क्षेत्र-क्षेत्रज्ञयोः अन्तरम् »The difference between body (Kshetra) and soul (Kshetra-jna) भूत-प्रकृति-मोक्षम् च and the [means of] liberation from Prakriti ये ज्ञान-चक्षुषा एवम् विदुः those who thus know with the eye of knowledge ते परम् यान्ति they attain the Supreme.«

सत्त्वादि-गुण-कृतम् संसार-वैचित्र्यम् प्रपञ्चयिष्यन् Elaborating on the manifoldness of the world on account of the Gunas like Sattva-Guna (introduced in 13.22) अर्थम् स्तौति Shrī Krishna [first of all] praises the subject-matter ...

**||14.1||**

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् । यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥

परम् भूयः प्रवक्ष्यामि ज्ञानानाम् ज्ञानम् उत्तमम् यद् ज्ञात्वा मुनयः सर्वे पराम् सिद्धिम् इतः गताः

परम् ज्ञानानाम् उत्तमम् ज्ञानम् »Transcendental and best knowledge of all knowledge भूयः प्रवक्ष्यामि I will again explain, यद् ज्ञात्वा [after] knowing which सर्वे मुनयः all sages इतः पराम् सिद्धिम् गताः have gone from this [world] to the supreme perfection (liberation).«

**||14.2||**

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गे ऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

इदम् ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये न व्यथन्ति च

इदम् ज्ञानम् उपाश्रित्य »[After] practicing this knowledge मम साधर्म्यम् आगताः having attained my nature सर्गे अपि even at the time of creation (when Brahmā and others are being created) न उपजायन्ते they are not born, प्रलये [सति] and at the time of destruction न व्यथन्ति च they are not perturbed.«

||**14.3**||

मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ॥

मम योनिः महत् ब्रह्म तस्मिन् गर्भम् दधामि अहम् सम्भवः सर्व-भूतानाम् ततः भवति भारत

भारत »O Arjuna! महत् ब्रह्म मम योनिः The material nature (Mahat Brahma, Pradhāna, Prakriti) is my womb, तस्मिन् अहम् गर्भम् दधामि in that I place the seed ततः सर्व-भूतानाम् सम्भवः भवति and from that there is the creation of all beings.«

गर्भम् जगत्-विस्तार-हेतुम् चित्-आभासम् The seed, i.e., the reflection of [My] intelligence, which is the cause of the evolution of the cosmos.

||**14.4**||

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः । तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥

सर्व-योनिषु कौन्तेय मूर्तयः सम्भवन्ति याः तासाम् ब्रह्म महत् योनिः अहम् बीज-प्रदः पिता

बीजम् प्रददाति यः सः इति बीज-प्रदः _who gives the seed.

कौन्तेय »O Arjuna! सर्व-योनिषु Among all species याः मूर्तयः सम्भवन्ति whatever forms take birth तासाम् योनिः महत् ब्रह्म their womb is material nature अहम् बीज-प्रदः पिता and I am the seed-giving father.«

||**14.5**||

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥

सत्त्वम् रजः तमः इति गुणाः प्रकृति-सम्भवाः निबध्नन्ति महा-बाहो देहे देहिनम् अ-व्ययम्

महा-बाहो »O Arjuna! सत्त्वम् रजः तमः 'Goodness' (Sattva, Sattva-guna), 'passion' (Rajas, Rajo-guna) and 'ignorance' (Tamas, Tamo-guna) इति प्रकृति-सम्भवाः गुणाः these Gunas which are born from Prakriti अ-व्ययम् देहिनम् देहे निबध्नन्ति bind the eternal living being in the body (by causing identification with it).«

||**14.6**||

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥

तत्र सत्त्वम् निर्मलत्वात् प्रकाशकम् अनामयम् सुख-सङ्गेन बध्नाति ज्ञान-सङ्गेन च अनघ

सुखेन सङ्गः इति सुख-सङ्गः _association with happiness. ज्ञानेन सङ्गः इति ज्ञान-सङ्गः _association with knowledge.

अनघ »O Arjuna! तत्र निर्मलत्वात् Among those [Gunas], because of being spotless प्रकाशकम् अनामयम् सत्त्वम् the illuminating and faultless (peaceful) Sattva सुख-सङ्गेन ज्ञान-सङ्गेन च by attachment to happiness and knowledge बध्नाति it binds.«

शान्तत्वात् Because of being peaceful ('faultless') स्व-कार्येण सुखेन यः सङ्गः तेन बध्नाति it binds by attachment to its product, happiness. प्रकाशकत्वात् च And because of being illuminating स्व-कार्येण ज्ञानेन यः सङ्गः तेन च बध्नाति it binds by attachment to its product, knowledge. अहम् सुखी ज्ञानी च इति मनोधर्मान् तद्-अभिमानिनि क्षेत्र-ज्ञे संयोजयति It connects the mental states like, 'I am happy and wise', to the soul (Kshetra-jna), which identifies itself with those [states].

**||14.7||**

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् । तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
रजः राग-आत्मकम् विद्धि तृष्णा-सङ्ग-समुद्भवम् तद् निबध्नाति कौन्तेय कर्म-सङ्गेन देहिनम्

तृष्णा-सङ्गयोः समुद्भवः यस्मात् सः तृष्णा-सङ्ग-समुद्भवः _from which there is generation of hankering and attachment.

कौन्तेय »O Arjuna! रजः राग-आत्मकम् विद्धि Know Rajas as passionate तृष्णा-सङ्ग-समुद्भवम् being the source of hankering and attachment, तद् देहिनम् कर्म-सङ्गेन निबध्नाति it binds the soul by attachment to fruitive work.«

तृष्णा अ-प्राप्ते अर्थे अभिलाषः Hankering is the desire for things not yet achieved सङ्गः प्राप्ते अर्थे प्रीतिः and attachment is love for things achieved.

**||14.8||**

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥
तमः तु अज्ञान-जम् विद्धि मोहनम् सर्व-देहिनाम् प्रमाद-आलस्य-निद्राभिः तद् निबध्नाति भारत

भारत »O Arjuna! तमः तु अज्ञान-जम् विद्धि But Tamas know to be born from ignorance (a portion of Prakriti which has the power of concealment of the real nature of things) सर्व-देहिनाम् मोहनम् being [thus] the delusion of all embodied beings तद् प्रमाद-आलस्य-निद्राभिः निबध्नाति it binds by fantasy, laziness and sleep.«

**||14.9||**

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत । ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
सत्त्वम् सुखे सञ्जयति रजः कर्मणि भारत ज्ञानम् आवृत्य तु तमः प्रमादे सञ्जयति उत

भारत »O Arjuna! सत्त्वम् सुखे सञ्जयति [Thus] Sattva inclines ('binds) to happiness (even amidst causes of misery and sorrow) रजः कर्मणि Rajas to work तमः तु ज्ञानम् आवृत्य but Tamas, [after] covering knowledge प्रमादे उत सञ्जयति binds to fantasy [etc.].«

तत्र हेतुम् आह The reason for that is stated ...

**||14.10||**

रजस्तमश्चाभिभूय सत्त्वं भवति भारत । रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥
रजः तमः च अभिभूय सत्त्वम् भवति भारत रजः सत्त्वम् तमः च एव तमः सत्त्वम् रजः तथा

भारत »O Arjuna! रजः तमः च अभिभूय [After] overcoming Rajas and Tamas सत्त्वम् भवति Sattva manifests, रजः सत्त्वम् तमः च एव and Rajas [manifests, overcoming] Sattva and Tamas, तथा तमः सत्त्वम् रजः and Tamas [manifests, overcoming] Sattva and Rajas.«

इदानीम् सत्त्वादीनाम् वृद्धानाम् लिङ्गानि आह Now the symptoms of developed Sattva etc. are stated ...

**||14.11||**

सर्वद्वारेषु देहे ऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥
सर्व-द्वारेषु देहे अस्मिन् प्रकाशः उपजायते ज्ञानम् यदा तदा विद्यात् विवृद्धम् सत्त्वम् इति उत

A different Sandhi is possible – (jnānam) prakāshe upajāyate – Jnāna develops in illumination.

यदा अस्मिन् देहे सर्व-द्वारेषु »When in all the gates (senses) in this body ज्ञानम् प्रकाशः उपजायते knowledge and illumination develops, तदा सत्त्वम् विवृद्धम् then Sattva is prominent इति उत विद्यात् one can understand.«

**||14.12||**

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा । रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥

लोभः प्रवृत्तिः आरम्भः कर्मणाम् अ-शमः स्पृहा रजस्य एतानि जायन्ते विवृद्धे भरत-ऋषभ

भरत-ऋषभ »O Arjuna! रजसि विवृद्धे [सति] When Rajas is prominent, लोभः प्रवृत्तिः greed and activity कर्मणाम् आरम्भः undertaking of works (construction, etc.) अ-शमः स्पृहा restlessness ('after doing this I will do that') and hankering एतानि जायन्ते these develop.«

**||14.13||**

अप्रकाशो ऽप्रवृत्तिश्च प्रमादो मोह एव च । तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥

अ-प्रकाशः अ-प्रवृत्तिः च प्रमादः मोहः एव च तमसि एतानि जायन्ते विवृद्धे कुरु-नन्दन

कुरूणाम् नन्दनः इति कुरु-नन्दनः _delight of the Kurus.

कुरु-नन्दन »O Arjuna! तमसि विवृद्धे [सति] When Tamas is prominent अ-प्रकाशः अ-प्रवृत्तिः च dullness and inactivity प्रमादः मोहः एव च fantasy (not remembering one's duty) and delusion (wrong decisions) एतानि जायन्ते these develop.«

**||14.14||**

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् । तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥

यदा सत्त्वे प्रवृद्धे तु प्रलयम् याति देह-भृत् तदा उत्तम-विदाम् लोकान् अ-मलान् प्रतिपद्यते

उत्तमम् वेत्ति यः सः उत्तम-विद् _who knows the supreme.

सत्त्वे प्रवृद्धे [सति] तु »And Sattva [being] prominent यदा देह-भृत् प्रलयम् याति when the embodied being meets death तदा उत्तम-विदाम् अ-मलान् लोकान् then the pure worlds of the great sages प्रतिपद्यते he attains.«

**||14.15||**

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥

रजसि प्रलयम् गत्वा कर्म-सङ्गिषु जायते तथा प्रलीनः तमसि मूढ-योनिषु जायते

कर्मणि सङ्गः यस्य सः कर्म-सङ्गी _whose attachment is to work. मूढानाम् योनिः इति मूढ-योनिः _the species of fools.

रजसि प्रलयम् गत्वा »[After] meeting death in Rajas कर्म-सङ्गिषु जायते one is born among those attached to work, तथा तमसि प्रलीनः and one who has died in Tamas मूढ-योनिषु जायते is born among foolish species (animals).«

**||14.16||**

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् । रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥

कर्मणः सुकृतस्य आहुः सात्त्विकम् निर्मलम् फलम् रजसः तु फलम् दुःखम् अ-ज्ञानम् तमसः फलम्

सुकृतस्य कर्मणः फलम् »The result of pious (Sattva) work सात्त्विकम् निर्मलम् is that of Sattva (i.e., happiness) and [thus] purity (i.e., illumination) आहुः they (the wise) say, रजसः तु फलम् दुःखम् but the result of Rajas [work] is misery तमसः फलम् अ-ज्ञानम् and the result of Tamas [work] is ignorance.«

सात्त्विकादि-कर्म-लक्षणम् च The characteristics of Sattva a.o. actions अष्टादशे वक्ष्यति will be described in the eighteenth chapter [beginning with 18.23].

तत्र एव हेतुम् आह The reason for this (happiness, misery and ignorance) is stated ...

**||14.17||**

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥

सत्त्वात् सञ्जायते ज्ञानम् रजसः लोभः एव च प्रमाद-मोहौ तमसः भवतः अ-ज्ञानम् एव च

प्रमादः च मोहः च इति प्रमाद-मोहौ _madness and illusion.

सत्त्वात् ज्ञानम् सञ्जायते »From Sattva develops knowledge [and thus happiness and illumination, see 14.16] रजसः लोभः एव च and from Rajas greed [and thus misery] तमसः प्रमाद-मोहौ भवतः from Tamas come fantasy and illusion अ-ज्ञानम् एव च and [thus] ignorance.«

**||14.18||**

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥

ऊर्ध्वम् गच्छन्ति सत्त्व-स्थाः मध्ये तिष्ठन्ति राजसाः जघन्य-गुण-वृत्ति-स्थाः अधः गच्छन्ति तामसाः

जघन्य-गुणस्य वृत्तौ तिष्ठति यः सः जघन्य-गुण-वृत्ति-स्थः _who stays in the condition of the lowest Guna.

सत्त्व-स्थाः ऊर्ध्वम् गच्छन्ति »Those situated in Sattva go upwards (according to the degree of Sattva they attain spheres like those of men, Gandharvas, Pitris and Devas upto Satya-loka, where the happiness is in each succeeding a hundred times greater) राजसाः मध्ये तिष्ठन्ति those in Rajas stay in the middle (in the world of men) जघन्य-गुण-वृत्ति-स्थाः तामसाः those in Tamas, the lowest quality अधः गच्छन्ति go downwards (to hells like Tamisra).«

इदानीम् तद्-विवेकतः मोक्षम् दर्शयति Now he shows how liberation comes through discriminating it (matter and spirit) ...

**||14.19||**

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति। गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥

न अन्यम् गुणेभ्यः कर्तारम् यदा द्रष्टा अनुपश्यति गुणेभ्यः च परम् वेत्ति मद्-भावम् सः अधिगच्छति

यदा द्रष्टा »When the seer (becoming discriminative) गुणेभ्यः अन्यम् कर्तारम् another doer besides the Gunas (which have transformed themselves into the intellect, etc.) न अनुपश्यति he does not see, गुणेभ्यः च परम् वेत्ति and knows [himself] to be beyond the Gunas (as their mere witness) सः मद्-भावम् अधिगच्छति he attains my nature.«

||14.20||

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्। जन्ममृत्युजरादुःखैर्विमुक्तो ऽमृतमश्नुते ॥

गुणान् एतान् अतीत्य त्रीन् देही देह-समुद्भवान् जन्म-मृत्यु-जरा-दुःखैः विमुक्तः अमृतम् अश्नुते

देहस्य समुद्भः यस्मात् सः देह-समुद्भः _from which there is the generation of the body. जन्म-मृत्य-जराणाम् दुःखम् इति जन्म-मृत्यु-जरा-दुःखम् _the misery of birth, death and old age.

देह-समुद्भवान् एतान् त्रीन् गुणान् »These three Gunas, which cause the body अतीत्य [after] transcending जन्म-मृत्यु-जरा-दुःखैः विमुक्तः being free from the miseries of birth, death and old age देही अमृतम् अश्नुते the embodied soul attains liberation.«

||14.21||

कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो। किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥

कैः लिङ्गैः त्रीन् गुणान् एतान् अतीतः भवति प्रभो किम् आचारः कथम् च एतान् त्रीन् गुणान् अतिवर्तते

प्रभो »O Lord! एतान् त्रीन् गुणान् अतीतः One who has transcended these three Gunas कैः लिङ्गैः भवति (1) by which symptoms is he [known]? किम् आचारः (2) What is [his] conduct? कथम् च (3) And how एतान् त्रीन् गुणान् अतिवर्तते does he transcend these three Gunas?«

स्थित-प्रज्ञस्य का भाषा इत्यादिना द्वितीय-अध्याये पृष्टम् अपि Although it was already asked in the second chapter, beginning with, What is the characteristic of a man of steady intelligence? (2.54), etc. दत्त-उत्तरम् अपि and although it was answered पुनः विशेष-बुभुत्सया पृच्छति इति ज्ञात्वा yet understanding that he was asking again to understand further details प्रकार-अन्तरेण तस्य लक्षणादिकम् श्री-भगवान् उवाच the Lord described the characteristics etc. of that person in [yet] another way. ...

||14.22||

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव। न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥

प्रकाशम् च प्रवृत्तिम् च मोहम् एव च पाण्डव न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति

पाण्डव »O Arjuna! प्रकाशम् च प्रवृत्तिम् च Enlightenment (from Sattva) and activity (from Rajas) मोहम् एव च and also delusion (from Tamas) सम्प्रवृत्तानि न द्वेष्टि he does not hate [them] when they occur, निवृत्तानि न काङ्क्षति nor does not desire [them] when they cease.«

तद् एवम् स्व-संवेद्यम् तस्य लक्षणम् उक्त्वा After thus stating those characteristics of such a person which can be known only by him पर-संवेद्यम् तस्य लक्षणम् वक्तुम् in order to state his characteristics which can be known by others किम् आचारः इति द्वितीय-प्रश्नस्य उत्तरम् आह the answer to the second question, (2) What is his conduct? is given ...

||14.23-25||

उदासीनवदासीनो गुणैर्यो न विचाल्यते। गुणा वर्तन्त इत्येवं यो ऽवतिष्ठति नेङ्गते ॥

उदासीनवत् आसीनः गुणैः यः न विचाल्यते गुणाः वर्तन्ते इति एवम् यः अवतिष्ठति न इङ्गते

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः। तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥

सम-दुःख-सुखः स्व-स्थः सम-लोष्ट-अश्म-काञ्चनः तुल्य-प्रिय-अप्रियः धीरः तुल्य-निन्दा-आत्म-संस्तुतिः

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः। सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥
मान-अपमानयोः तुल्यः तुल्यः मित्र-अरि-पक्षयोः सर्व-आरम्भ-परित्यागी गुण-अतीतः सः उच्यते

स्वस्मिन् तिष्ठति यः सः स्व-स्थः _who stays in the self. तुल्यौ प्रियः च अ-प्रियः च यस्य सः तुल्य-प्रिय-अप्रियः _for whom like and dislike are the same. तुल्ये निन्दा च अत्मनः संस्तुतिः च यस्य सः तुल्य-निन्दा-आत्म-संस्तुतिः _for whom own blame and praise are equal. मित्रस्य च अरेः च पक्षौ इति मित्र-अरि-पक्षौ _the sides of friend and enemy.

उदासीनवत् आसीनः »Remaining as neutral [witness] यः गुणैः न विचाल्यते one who is not disturbed by the Gunas (i.e., by the effects of the Gunas like happiness and distress) गुणाः वर्तन्ते इति एवम् [knowing that] 'the Gunas are acting यः अवतिष्ठति न इङ्गते one who is steady and does not waver सम-दुःख-सुखः who is equal in distress and happiness स्व-स्थः situated in the self सम-लोष्ट-अश्म-काञ्चनः who regards alike a lump of earth, stone and gold तुल्य-प्रिय-अप्रियः who is equal towards the pleasing and displeasing धीरः तुल्य-निन्दा-आत्म-संस्तुतिः sober and equal in blame and one's praise मान-अपमानयोः तुल्यः who is equal in honor and dishonor मित्र-अरि-पक्षयोः तुल्यः equal towards the sides of friend and enemy सर्व-आरम्भ-परित्यागी renouncing [the result] in all endeavors, सः गुण-अतीतः उच्यते he is said to have transcended the Gunas.«

कथम् च एतान् त्रीन् गुणान् अतिवर्तते And (3) how does he transcend the Gunas? ...

**||14.26||**

मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥
माम् च यः अ-व्यभिचारेण भक्ति-योगेन सेवते सः गुणान् समतीत्य एतान् ब्रह्म-भूयाय कल्पते

ब्रह्मणः भूयः इति ब्रह्म-भूयः _the state of Brahma.

अ-व्यभिचारेण भक्ति-योगेन »With undeviating Bhakti-yoga यः च माम् सेवते one who worships me एतान् गुणान् समतीत्य [after] transcending these Gunas सः ब्रह्म-भूयाय कल्पते he is eligible for the state of Brahma (spiritual existence).«

**||14.27||**

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च। शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥
ब्रह्मणः हि प्रतिष्ठा अहम् अमृतस्य अ-व्ययस्य च शाश्वतस्य च धर्मस्य सुखस्य ऐकान्तिकस्य च

अहम् हि ब्रह्मणः प्रतिष्ठा »[This is because] I am the basis (source) of [that] Brahma अ-व्ययस्य अमृतस्य च and [I am thus the basis] of imperishable immortality शाश्वतस्य धर्मस्य च and of the eternal Dharma ऐकान्तिकस्य सुखस्य च and of ultimate happiness.«

अतः मद्-सेविनः Therefore, because My servant (devotee) मद्-भावस्य अवश्यम्-भावित्वात् inevitably attains My nature युक्तम् एव उक्तम् it has been rightly said that ब्रह्म-भूयाय कल्पते इति 'he is eligible for the state of Brahma'.

The Absolute Truth is experienced in three main features, namely as all-pervading impersonal energy (Brahma) by Jnānīs, as passive personal witness in the heart (Paramātmā) by Yogīs, and as loving person in Vaikuntha (Bhagavān) by Bhaktas. Which of those is the original, ultimate feature? There are two lines of thought among all the philosophies and religions of the world.

(1) The personalist schools consider Bhagavān as the origin of Brahma, just as the sun is the origin of its effulgence, whereas (2) Impersonalist schools consider Bhagavān as a manifestation of Brahma. The first view is supported in this verse, as also in other verses (7.24, 12.1-7, 13.13).

नच एकान्त-भक्तिः ज्ञानम् वा अ-विरक्तस्य सम्भवति इति Since exclusive devotion (as demanded in 14.26) or knowledge (Jnāna) are not possible for one who is not detached वैराग्य-पूर्वकम् ज्ञानम् उपदेष्टु-कामः with the desire to teach knowledge together with detachment संसार-स्वरूपम् वृक्ष-रूपक-अलङ्कारेण वर्णयन् describing the nature of this material world (Samsāra) through the metaphor of having the form of a tree [Shrī Krishna says] ...

**||15.1||**

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥

ऊर्ध्व-मूलम् अधः-शाखम् अश्वत्थम् प्राहुः अ-व्ययम् छन्दांसि यस्य पर्णानि यः तम् वेद सः वेद-विद्

ऊर्ध्वम् मूलम् यस्य सः ऊर्ध्व-मूलः _whose root is above. अधः शाखाः यस्य सः अधः-शाखः _whose branches are below.

ऊर्ध्व-मूलम् अधः-शाखम् »Whose root is above and branches below यस्य पर्णानि छन्दांसि and whose leaves are the Vedas अ-व्ययम् अश्वत्थम् प्राहुः [such] an imperishable Ashvattha tree is described, यः तम् वेद one who knows that [Samsāra tree] सः वेद-विद् he knows the Vedas.«

संसार-वृक्षस्य मूलम् The root of the mundane tree ईश्वरः श्री-नारायणः is the Lord, Shrī Nārāyana. ब्रह्मा-आदयः तद्-अंशाः [The living beings who are] His parts, beginning with Brahmā शाखा-स्थानीयाः stand for the branches. The leaves of a tree give shelter from sun and rain. The Vedas are like leaves, because by propounding how to achieve a good result of work they give us shelter in this world. इति एतावान् एव हि वेदार्थः This much is the purport of the Vedas. अतएव विद्वान् Therefore one who knows [this metapher of a tree] वेद-विद् इति स्तूयते is praised as 'knower of the Vedas'.

Ashvattha means 'under which horses (ashva) stand'. In this verse it describes the nature of the material world as a-shvattha – 'which does not last until tomorrow (shvah)', i.e., which is perishable (because always changing). At the same time it is a-vyaya, imperishable. Ashvattha is another name for the Pippala /Bodhidruma /Ficus Religiosa (holy fig tree), commonly called Peepal. He is described as the most pious tree and the number one to be planted for pious benefit. But, the description given in this chapter applies rather to the Banyan /Nyagrodha /Vata /Ficus Indica (Indian fig tree).

**||15.2||**

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधः च ऊर्ध्वम् प्रसृताः तस्य शाखाः गुण-प्रवृद्धाः विषय-प्रवालाः
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥
अधः च मूलानि अनुसन्ततानि कर्म-अनुबन्धीनि मनुष्य-लोके

गुणैः प्रवृद्धा इति गुण-प्रवृद्धा _nourished by the Gunas. मनुष्याणाम् लोकः इति मनुष्य-लोकः _'the world of men', this earth.

तस्य शाखाः »Its branches (the living beings) गुण-प्रवृद्धाः nourished by the Gunas (according to the watering with the Gunas) विषय-प्रवालाः with shoots being sense objects (like color) [connected with the functions of the senses, which stand for the twigs] अधः ऊर्ध्वम् च प्रसृताः are extended downwards and upwards. अधः च अनुसन्ततानि मूलानि The roots, extending [upwards] and downwards मनुष्य-लोके कर्म-अनुबन्धीनि result in [certain] activities in the world of men.«

तेषु च And among those [branches, i.e., living beings] ये दुष्कृतिनः those who are evil-doers ते अधः पश्वादि-योनिषु प्रसृताः विस्तारम् गताः they are spread downwards, among animal species, etc. सुकृतिनः च And the virtuous ऊर्ध्वम् देवादि-योनिषु प्रसृताः are spread upwards, among Deva species, etc. ... मुख्यम् मूलम् ईश्वरः एकः एव The main root is the Lord alone. इमानि तु अवान्तर-मूलानि And these side-roots तद्-तद्-भोग-वासना-लक्षणानि represent subtle impressions (Vāsanā) of particular enjoyments.

**||15.3-4||**

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
न रूपम् अस्य इह तथा उपलभ्यते न अन्तः न च आदिः न च सम्प्रतिष्ठा
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥
अश्वत्थम् एनम् सुविरूढ-मूलम् असङ्ग-शस्त्रेण दृढेन छित्त्वा
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
ततः पदम् तद् परिमार्गितव्यम् यस्मिन् गता न निवर्तन्ति भूयः
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥
तम् एव च आद्यम् पुरुषम् प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी

सुविरूढानि मूलानि यस्य सः सुविरूढ-मूलः _whose roots are very much developed.

अस्य रूपम् »Its form इह तथा न उपलभ्यते can not thus be perceived (as having its root above) in this world न अन्तः न च आदिः nor [its] end (limit), nor its beginning (being unlimited and beginningless) न च सम्प्रतिष्ठा nor its foundation (how it exists). एनम् सुविरूढ-मूलम् अश्वत्थम् This strongly rooted (hard to uproot) Ashvattha दृढेन असङ्ग-शस्त्रेण with the strong weapon (axe) of detachment (giving up all ideas of 'I and 'mine') छित्त्वा [after] cutting it, ततः तद् पदम् परिमार्गितव्यम् then that place (pada) has to be sought (the abode of Vishnu, which is the root of this tree) यस्मिन् गताः from which those who have reached it भूयः न निवर्तन्ति they do not return again. तम् एव च आद्यम् पुरुषम् प्रपद्ये [One should pray:] 'To that primeval Lord I surrender यतः पुराणी प्रवृत्तिः प्रसृता from whom this ancient manifestation has developed' (such one-pointed Bhakti is way of seeking this place).«

**||15.5||**

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
निर्मान-मोहाः जित-सङ्ग-दोषाः अध्यात्म-नित्याः विनिवृत्त-कामाः

द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥
द्वन्द्वैः विमुक्ताः सुख-दुःख-सञ्ज्ञैः गच्छन्ति अ-मूढाः पदम् अ-व्ययम् तद्

निर्गतौ मान-मोहौ यस्मात् सः निर्मान-मोहः _from whom pride and delusion have departed. जितः सङ्गस्य दोषः येन सः जित-सङ्ग-दोषः _by whom the evil of attachment is conquered. सुख-दुःखे इति सञ्ज्ञा यस्य तद् सुख-दुःख-सञ्ज्ञम् _whose name is sukha-duhkha.

निर्मान-मोहाः »Being without pride and delusion जित-सङ्ग-दोषाः having conquered the evil of attachment अध्यात्म-नित्याः विनिवृत्त-कामाः always established in the self, free from lust सुख-दुःख-सञ्ज्ञैः द्वन्द्वैः विमुक्ताः freed from the dualities of happiness and distress अ-मूढाः those who are not deluded तद् अ-व्ययम् पदम् गच्छन्ति attain that imperishable abode [of Vishnu].«

**||15.6||**

न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥
न तद् भासयते सूर्यः न शशाङ्कः न पावकः यद् गत्वा न निवर्तन्ते तद् धाम परमम् मम

न सूर्यः तद् भासयते »Neither the sun illuminates that [abode] न शशाङ्कः न पावकः nor the moon, nor fire, यद् गत्वा न निवर्तन्ते [after] attaining which they do not return तद् मम परमम् धाम that is my supreme abode.«

**||15.7||**

ममैवांशो जीवलोके जीवभूतः सनातनः । मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥
मम एव अंशः जीव-लोके जीव-भूतः सनातनः मनः-षष्ठानि इन्द्रियाणि प्रकृति-स्थानि कर्षति

जीव-भूतः जीव-लोके »The living being in this world मम एव सनातनः अंशः is certainly my eternal part, [but:] प्रकृति-स्थानि मनः-षष्ठानि इन्द्रियाणि the six senses, with the mind, situated in Prakriti कर्षति it carries ('pulls').«

अयम् भावः This is the idea: सत्यम् It is true सुषुप्ति-प्रलययोः अपि that in deep sleep (Sushupti) and in dissolution (Pralaya) मद्-अंशत्वात् सर्वस्य अपि जीवमात्रस्य every Jīva, because of being a part of Myself मयि लयात् अस्ति एव मद्-प्राप्तिः after merging in Me, it attains Me. तथापि Yet अ-विद्यया आवृतस्य being covered by ignorance स-अनुशयस्य and being with (carrying) the 'consequence' (impressions of his past work) स-प्रकृतिके मयि लयः it is merged in Me [in My form] as being with Prakriti न तु शुद्धे and not in My pure being. तद् उक्तम् That has been said: अ-व्यक्तात् व्यक्तयः सर्वाः प्रभवन्ति इत्यादिना 'From the unmanifest [matter] all manifested beings are born. etc. (8.18)

तानि आकृष्य After carrying ('pulling') them किम् करोति what does it (the soul) do? ...

**||15.8||**

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥
शरीरम् यद् अवाप्नोति यद् च अपि उत्क्रामति ईश्वरः गृहीत्वा एतानि संयाति वायुः गन्धान् इव आशयात्

यद् ईश्वरः शरीरम् अवाप्नोति »When the soul ('lord' means the master of the body) obtains a [new] body यद् च अपि उत्क्रामति and also when it leaves [the old body], एतानि गृहीत्वा [after]

taking [from the previous body] these (the senses) [in a subtle body] संयाति it goes [to another gross body] वायुः आशयात् गन्धान् इव as the air [is taking] aromas from the [former] seat (like a flower).«

**||15.9||**

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवते ॥
श्रोत्रम् चक्षुः स्पर्शनम् च रसनम् घ्राणम् एव च अधिष्ठाय मनः च अयम् विषयान् उपसेवते

श्रोत्रम् चक्षुः स्पर्शनम् च »Ears, eyes and the sense of touch रसनम् घ्राणम् एव च मनः च tongue, nose and mind अधिष्ठाय [after] presiding over [those senses] अयम् विषयान् उपसेवते it (the Jīva) [again] enjoys sense objects.«

**||15.10||**

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् । विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥
उत्क्रामन्तम् स्थितम् वा अपि भुञ्जानम् वा गुण-अन्वितम् विमूढाः न अनुपश्यन्ति पश्यन्ति ज्ञान-चक्षुषः

गुणैः अन्वितः इति गुण-अन्वितः _endowed with the Gunas or senses.

उत्क्रामन्तम् स्थितम् वा अपि »[The Jīva] when leaving [a body] or staying [in it] गुण-अन्वितम् भुञ्जानम् वा or enjoying [sense objects] with the senses (Guna) विमूढाः न अनुपश्यन्ति fools do not perceive [it], ज्ञान-चक्षुषः पश्यन्ति [but] those with the eye of knowledge see [the Jīva].«

विवेकिषु अपि Even among the discriminative केचिद् एव पश्यन्ति only some see it ...

**||15.11||**

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् । यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥
यतन्तः योगिनः च एनम् पश्यन्ति आत्मनि अवस्थितम् यतन्तः अपि अ-कृत-आत्मानः न एनम् पश्यन्ति अ-चेतसः

यतन्तः योगिनः च »The endeavoring Yogīs (endeavoring through meditation, etc.) also एनम् आत्मनि अवस्थितम् पश्यन्ति see it (the Jīva) situated in their body [as different from the body], यतन्तः अपि [but] although endeavoring (through study of Shāstra, etc.) अ-कृत-आत्मानः अ-चेतसः those who are unenlightened and [thus] unintelligent एनम् न पश्यन्ति do not see it.«

[After clearing some doubt in 15.7-11, now again] पारमेश्वरम् रूपम् the nature of the Lord अनन्त-शक्तित्वेन निरूपयति is described as omnipotent ...

**||15.12||**

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥
यद् आदित्य-गतम् तेजः जगत् भासयते अ-खिलम् यद् चन्द्रमसि यद् च अग्नौ तद् तेजः विद्धि मामकम्

आदित्य-गतम् तेजः »The splendor in the sun यद् अ-खिलम् जगत् भासयते which illuminates the whole world यद् चन्द्रमसि यद् अग्नौ च and also that [splendor] which is in moon and fire तद् तेजः मामकम् विद्धि that splendor know to be Mine.«

**||15.13||**

गामाविश्य च भूतानि धारयाम्यहमोजसा । पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥
गाम् आविश्य च भूतानि धारयामि अहम् ओजसा पुष्णामि च ओषधीः सर्वाः सोमः भूत्वा रस-आत्मकः

रसः आत्मा यस्य सः रस-आत्मकः _'whose essence is nectar', taste.

गाम् च आविश्य »And [after] entering the earth अहम् भूतानि ओजसा धारयामि I sustain all beings by [my] energy, रस-आत्मकः सोमः च भूत्वा and [after] becoming the moon, who gives ('is full of') taste (Rasa) सर्वाः ओषधीः पुष्णामि I nourish all plants.«

**||15.14||**

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥

अहम् वैश्वानरः भूत्वा प्राणिनाम् देहम् आश्रितः प्राण-अपान-समायुक्तः पचामि अन्नम् चतुः-विधम्

प्राणेन च अपानेन च समायुक्तः इति प्राण-अपान-समायुक्तः _endowed with Prāna and Apāna.

वैश्वानरः भूत्वा »[After] becoming the fire of digestion प्राणिनाम् देहम् आश्रितः having entered the body of [all] beings प्राण-अपान-समायुक्तः together with the outgoing breath (Prāna) and the ingoing breath (Apāna) [by both of which that fire of digestion is excited] अहम् चतुः-विधम् अन्नम् पचामि I digest the four kinds of food.«

भक्ष्यम् Which is chewed (like bread) भोज्यम् swallowed (like porridge) लेह्यम् licked (like molasses) चोष्यम् च and sucked (like sugar-cane) इति चतुर्विधम् these four kinds [of food].

**||15.15||**

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।

सर्वस्य च अहम् हृदि सन्निविष्टः मत्तः स्मृतिः ज्ञानम् अपोहनम् च

वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥

वेदैः च सर्वैः अहम् एव वेद्यः वेदान्त-कृत् वेद-विद् एव च अहम्

वेदान्तम् करोति यः सः वेदान्त-कृत् _who makes Vedānta.

अहम् सर्वस्य च हृदि सन्निविष्टः »And I am seated in the heart of all [as inner ruler, Supersoul) मत्तः स्मृतिः ज्ञानम् अपोहनम् च from me [come] memory, knowledge and forgetfulness सर्वैः वेदैः च अहम् एव वेद्यः I alone am to be known through all the Vedas [in the form of the various Devas] अहम् वेदान्त-कृत् I am alone the author of Vedānta वेद-विद् एव च and the knower of the [meaning of the] Vedas.«

**||15.16||**

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

द्वाः इमौ पुरुषौ लोके क्षरः च अ-क्षरः एव च क्षरः सर्वाणि भूतानि कूट-स्थः अ-क्षरः उच्यते

लोके इमौ द्वौ पुरुषौ »In the world are these two 'persons' (Purusha) क्षरः च अ-क्षरः एव च the perishable (Kshara) and the imperishable (A-kshara), क्षरः सर्वाणि भूतानि Kshara [persons] are all created beings [since the ignorant generally use the word 'person' with respect to bodies only] कूट-स्थः अ-क्षरः उच्यते the changeless [spirit] is called A-kshara [person].«

देहेषु नश्यत्सु अपि Even when all bodies perish निर्विकारतया तिष्ठति it remains immutable.

**||15.17||**

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

उत्तमः पुरुषः तु अन्यः परम-आत्मा इति उदाहृतः यः लोक-त्रयम् आविश्य बिभर्ति अ-व्ययः ईश्वरः

अन्यः तु उत्तमः पुरुषः »But different is the Supreme Person अ-व्ययः ईश्वरः the imperishable Lord परम-आत्मा इति उदाहृतः known as Paramātmā यः लोक-त्रयम् आविश्य who, [after] entering the three worlds बिभर्ति sustains [them].«

**||15.18||**

यस्मात्क्षरमतीतो ऽहमक्षरादपि चोत्तमः । अतो ऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

यस्मात् क्षरम् अतीतः अहम् अ-क्षरात् अपि च उत्तमः अतः अस्मि लोके वेदे च प्रथितः पुरुष-उत्तमः

यस्मात् क्षरम् अतीतः »Because, surpassing the Kshara (body) अहम् अ-क्षरात् अपि च उत्तमः I am superior to even the A-kshara (soul) [being their ruler], अतः लोके वेदे च therefore, in the world and in the Vedas पुरुष-उत्तमः प्रथितः अस्मि I am celebrated as the Supreme Person.«

**||15.19||**

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥

यः माम् एवम् अ-सम्मूढः जानाति पुरुष-उत्तमम् सः सर्व-विद् भजति माम् सर्व-भावेन भारत

सर्वम् वेत्ति यः सः सर्व-विद् _who knows everything.

भारत »O Arjuna! अ-सम्मूढः Being undeluded (of firm conviction) यः माम् एवम् पुरुष-उत्तमम् जानाति one who knows me thus as the Supreme Person सः सर्व-विद् he knows everything सर्व-भावेन माम् भजति and worships me with all his heart.«

**||15.20||**

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥

इति गुह्यतमम् शास्त्रम् इदम् उक्तम् मया अनघ एतद् बुद्ध्वा बुद्धिमान् स्यात् कृत-कृत्यः च भारत

अनघ »O Arjuna! इति इदम् गुह्यतमम् शास्त्रम् Thus this most confidential teaching मया उक्तम् was spoken by me. भारत O Arjuna! एतद् बुद्ध्वा [After] understanding this बुद्धिमान् कृत-कृत्यः च स्यात् one will become wise and accomplished.«

तत्त्व-ज्ञाने अधिकारिणः अनधिकारिणः च विवेक-अर्थम् To distinguish between a fit aspirant (Adhikārī) and an unfit aspirant after true knowledge षोडश-अध्याय-आरम्भः the sixteenth chapter is begun.

**||16.1-3||**

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

अ-भयम् सत्त्व-संशुद्धिः ज्ञान-योग-व्यवस्थितिः दानम् दमः च यज्ञः च स्वाध्यायः तपः आर्जवम्

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥

अ-हिंसा सत्यम् अ-क्रोधः त्यागः शान्तिः अ-पैशुनम् दया भूतेषु अ-लोलुप्त्वम् मार्दवम् ह्रीः अ-चापलम्

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥

तेजः क्षमा धृतिः शौचम् अ-द्रोहः न अतिमानिता भवन्ति सम्पदम् दैवीम् अभिजातस्य भारत

सत्त्वस्य संशुद्धिः इति सत्त्व-संशुद्धिः _purity of existence. ज्ञान-योगे व्यवस्थितिः इति ज्ञान-योग-व्यवस्थितिः _steadfastness in spiritual knowledge.

अ-भयम् सत्त्व-संशुद्धिः »Fearlessness and purity of heart ज्ञान-योग-व्यवस्थितिः steadfastness in spiritual knowledge दानम् दमः च यज्ञः च charity, sense-control and sacrifice स्वाध्यायः तपः आर्जवम् study (reciting Veda or holy names), austerity and honesty अ-हिंसा सत्यम् अ-क्रोधः non-violence, truthfulness and absence of anger त्यागः शान्तिः अ-पैशुनम् renunciation (generosity), peacefulness and absence of faultfinding भूतेषु दया अ-लोलुप्त्वम् compassion for all beings and absence of greed मार्दवम् ह्रीः अ-चापलम् gentleness, modesty and steadiness तेजः क्षमा धृतिः शौचम् vigor, forgiveness, firmness and purity अ-द्रोहः न अतिमानिता absence of malice and not expecting honor – भारत O Arjuna! दैवीम् सम्पदम् अभिजातस्य भवन्ति [These 26 qualities] belong to one born with a godly (Sattva) nature.«

देव-योग्याम् सात्त्विकीम् सम्पदम् अभिजातस्य/तद्-आभिमुख्येन जातस्य भावि-कल्याणस्य पुंसः भवन्ति They are found in one who is born to attain Sattva wealth befitting a Deva, i.e., one with a good future.

**||16.4||**

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥

दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् एव च अ-ज्ञानम् च अभिजातस्य पार्थ सम्पदम् आसुरीम्

पार्थ »O Arjuna! दम्भः दर्पः अभिमानः च Boasting, pride and self-conceit क्रोधः पारुष्यम् एव च अ-ज्ञानम् च anger, harshness and ignorance आसुरीम् सम्पदम् अभिजातस्य belong to one born with a demoniac nature.«

In Chapter Nine three types of nature were described – (1) daivī prakriti (9.13), godly (Sattva) nature of Mahātmās; (2) āsura (9.12) passionate (Rajas) nature of materialists; (3) rākshasa (9.12) – ignorant (Tamas) and violent nature of demons. Rajas and Tamas are combinedly described in this chapter as demoniac.

**||16.5||**

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता । मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥

दैवी सम्पद् विमोक्षाय निबन्धाय आसुरी मता मा शुचः सम्पदम् दैवीम् अभिजातः असि पाण्डव

दैवी सम्पद् विमोक्षाय मता »The godly nature (Sattva) is considered to be for liberation (through real knowledge) आसुरी निबन्धाय the demoniac nature for bondage. पाण्डव मा शुचः O Arjuna! Do not worry, दैवीम् सम्पदम् अभिजातः असि you are born with a Sattva ('godly') nature.«

**||16.6||**

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥

द्वौ भूत-सर्गौ लोके अस्मिन् दैवः आसुरः एव च दैवः विस्तरशः प्रोक्तः आसुरम् पार्थ मे शृणु

भूतानाम् सर्गः इति भूत-सर्गः _the creation of beings.

पार्थ »O Arjuna! अस्मिन् लोके द्वौ भूत-सर्गौ In this world there are two natures of beings दैवः आसुरः एव च Sattva ('godly') and Rajas (Āsura). दैवः विस्तरशः प्रोक्तः The godly nature has been described at length, आसुरम् मे शृणु hear from me of the demoniac.«

**||16.7||**

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥

प्रवृत्तिम् च निवृत्तिम् च जनाः न विदुः आसुराः न शौचम् न अपि च आचारः न सत्यम् तेषु विद्यते

प्रवृत्तिम् च निवृत्तिम् च »What is to be done and what is not to be done आसुराः जनाः न विदुः demoniac persons do not know, न शौचम् न आचारः अपि neither purity, nor good behavior न च सत्यम् तेषु विद्यते nor truth exists in them.«

**||16.8||**

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥

अ-सत्यम् अ-प्रतिष्ठम् ते जगत् आहुः अनीश्वरम् अपरस्पर-सम्भूतम् किम् अन्यत् काम-हैतुकम्

अपरस्पराभ्याम् सम्भूतम् इति अपरस्पर-सम्भूतम् _born from mutual union. कामः हेतुः यस्य तद् काम-हैतुकम् _whose cause is lust.

अ-सत्यम् अ-प्रतिष्ठम् »As unreal, without foundation अनीश्वरम् and without God (as controller), अपरस्पर-सम्भूतम् [thus] having evolved by [natural] interaction (by nature's inherent properties without a creator) किम् अन्यत् काम-हैतुकम् what else than out of lust (Kāma), ते जगत् आहुः [thus] they describe the world.«

**||16.9||**

एतां दृष्टिमवष्टभ्य नष्टात्मानो ऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतो ऽहिताः ॥

एताम् दृष्टिम् अवष्टभ्य नष्ट-आत्मानः अल्प-बुद्धयः प्रभवन्ति उग्र-कर्माणः क्षयाय जगतः अ-हिताः

नष्टः आत्मा यस्य सः नष्ट-आत्मा _whose soul is lost. अल्पा बुद्धिः यस्य सः अल्प-बुद्धिः _whose intelligence is small. उग्रम् कर्म यस्य सः उग्र-कर्मा _whose activity is terrible.

एताम् दृष्टिम् अवष्टभ्य »[After] holding this [materialistic] view नष्ट-आत्मानः अल्प-बुद्धयः having lost their [purity of] mind, of small intellect उग्र-कर्माणः जगतः अ-हिताः the enemies of the world, of horrible works क्षयाय प्रभवन्ति they are born for [its] destruction.«

**||16.10||**

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः । मोहाद् गृहीत्वासद्ग्राहान्प्रवर्तन्ते ऽशुचिव्रताः ॥

कामम् आश्रित्य दुष्पूरम् दम्भ-मान-मद-अन्विताः मोहात् गृहीत्वा असत्-ग्राहान् प्रवर्तन्ते अ-शुचि-व्रताः

दम्भ-मान-मदैः अन्वितः यः सः दम्भ-मान-मद-अन्वितः _who is endowed with deceit, pride and madness.

दुष्पूरम् कामम् आश्रित्य »[After] resorting to insatiable desires दम्भ-मान-मद-अन्विताः those who are full of bluffing, pride and madness अ-शुचि-व्रताः of impure vows (with liquor, meat, etc.) मोहात् असत्-ग्राहान् गृहीत्वा [after] accepting wrong conceptions out of illusion (Mantras for gaining wealth) प्रवर्तन्ते they act (they worship different minor Devas).«

||16.11-12||

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः । कामोपभोगपरमा एतावदिति निश्चिताः ॥
चिन्ताम् अ-परिमेयाम् च प्रलय-अन्ताम् उपाश्रिताः काम-उपभोग-परमाः एतावत् इति निश्चिताः
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः । ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥
आशा-पाश-शतैः बद्धाः काम-क्रोध-परायणाः ईहन्ते काम-भोग-अर्थम् अ-न्यायेन अर्थ-सञ्चयान्

प्रलयः अन्तः यस्याः सा प्रलय-अन्ता _whose end is death. कामानाम् उपभोगः परमः यस्य सः काम-उपभोग-परमः _for whom the gratification of desires is supreme. आशायाः पाशानाम् शतम् इति आशा-पाश-शतम् _a hundred of ropes of expectations. काम-क्रोधौ पर-अयनम् यस्य सः काम-क्रोध-परायणः _whose supreme path (shelter) are lust and anger.

प्रलय-अन्ताम् अ-परिमेयाम् च चिन्ताम् »Unlimited anxiety, up to death उपाश्रिताः having accepted, काम-उपभोग-परमाः addicted to sense gratification एतावत् इति निश्चिताः and convinced that this (sense gratification) is all (the highest aim of human life), आशा-पाश-शतैः बद्धाः [therefore] bound (drawn here and there) by hundreds of ropes of expectations काम-क्रोध-परायणाः and given to lust (Kāma) and anger (Krodha), काम-भोग-अर्थम् for sense gratification अ-न्यायेन अर्थ-सञ्चयान् ईहन्ते they covet heaps of wealth by illegal means [like theft].«

||16.13-16||

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥
इदम् अद्य मया लब्धम् इमम् प्राप्स्ये मनः-रथम् इदम् अस्ति इदम् अपि मे भविष्यति पुनः धनम्
असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरो ऽहमहं भोगी सिद्धो ऽहं बलवान्सुखी ॥
असौ मया हतः शत्रुः हनिष्ये च अपरान् अपि ईश्वरः अहम् अहम् भोगी सिद्धः अहम् बलवान् सुखी
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥
आढ्यः अभिजनवान् अस्मि कः अन्यः अस्ति सदृशः मया यक्ष्ये दास्यामि मोदिष्ये इति अज्ञान-विमोहिताः
अनेकचित्तविभ्रान्ता मोहजालसमावृताः । प्रसक्ताः कामभोगेषु पतन्ति नरके ऽशुचौ ॥
अनेक-चित्त-विभ्रान्ताः मोह-जाल-समावृताः प्रसक्ताः काम-भोगेषु पतन्ति नरके अ-शुचौ

मोह-जालेन समावृतः इति मोह-जाल-समावृतः _covered by a net of illusion. कामस्य भोगः इति काम-भोगः _gratification of desire.

अद्य इदम् मया लब्धम् »[They think:] ‘Today this has been gained by me’ इमम् मनः-रथम् प्राप्स्ये and ‘this desired object I will gain’, इदम् अस्ति ‘this is [mine]’ इदम् धनम् अपि and ‘this wealth पुनः मम/मे भविष्यति will be mine too’, असौ शत्रुः मया हतः ‘that enemy has been slain by me’ अपरान् च अपि हनिष्ये and ‘others also I will slay’, अहम् ईश्वरः अहम् भोगी ‘I am the controller, I am the enjoyer’ अहम् सिद्धः बलवान् सुखी ‘I am successful, powerful and happy’ आढ्यः अभिजनवान् अस्मि ‘I am wealthy and of noble descent’ मया सदृशः अन्यः कः अस्ति ‘who else is equal to me’ यक्ष्ये दास्यामि मोदिष्ये ‘I will perform sacrifices, give charity and rejoice’ – इति अज्ञान-विमोहिताः thus deluded by ignorance अनेक-चित्त-विभ्रान्ताः bewildered by many thoughts

मोह-जाल-समावृताः covered by a net of illusion काम-भोगेषु प्रसक्ताः and addicted to sense gratification अ-शुचौ नरके पतन्ति they fall into dirty hell.«

**||16.17||**

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः । यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥
आत्म-सम्भाविताः स्तब्धाः धन-मान-मद-अन्विताः यजन्ते नाम-यज्ञैः ते दम्भेन अ-विधि-पूर्वकम्

आत्मना सम्भावितः इति आत्म-सम्भावितः _glorified by himself. धनस्य मानेन च मदेन च अन्वितः यः सः धन-मान-मद-अन्वितः _who is filled with pride and madness due to wealth.

आत्म-सम्भाविताः स्तब्धाः »Being self-complacent and arrogant धन-मान-मद-अन्विताः filled with pride and intoxicated due to wealth दम्भेन अ-विधि-पूर्वकम् with pride (not with devotion) and disregarding the prescription ते नाम-यज्ञैः यजन्ते they perform sacrifices in name (or: 'to gain a name') only.«

**||16.18-19||**

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तो ऽभ्यसूयकाः ॥
अहङ्कारम् बलम् दर्पम् कामम् क्रोधम् च संश्रिताः माम् आत्म-पर-देहेषु प्रद्विषन्तः अभ्यसूयकाः
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्त्रमशुभानासुरीष्वेव योनिषु ॥
तान् अहम् द्विषतः क्रूरान् संसारेषु नर-अधमान् क्षिपामि अजस्त्रम् अ-शुभान् आसुरीषु एव योनिषु

अहङ्कारम् बलम् दर्पम् कामम् क्रोधम् च »Of false ego, power, pride, lust and anger संश्रिताः being possessed आत्म-पर-देहेषु माम् प्रद्विषन्तः hating me (when performing animal sacrifices), who is in their own and other bodies (as Supersoul) अभ्यसूयकाः and full of envy [for the virtues of pious people], तान् द्विषतः क्रूरान् those hateful and cruel men अ-शुभान् नर-अधमान् who are inauspicious and lowest of men संसारेषु आसुरीषु योनिषु एव into cycles of rebirths in demoniac species (like the tiger) अहम् अजस्त्रम् क्षिपामि I perpetually cast [them].«

**||16.20||**

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥
आसुरीम् योनिम् आपन्नाः मूढाः जन्मनि जन्मनि माम् अ-प्राप्य एव कौन्तेय ततः यान्ति अधमाम् गतिम्

कौन्तेय »O Arjuna! मूढाः जन्मनि जन्मनि [Such] fools, in birth after birth आसुरीम् योनिम् आपन्नाः having attained a demoniac body माम् अ-प्राप्य एव [after] certainly not attaining me (not even the path of righteousness that leads to Me), ततः अधमाम् गतिम् यान्ति they then attain the lowest destination (like the bodies of worms and insects).«

उक्तानाम् आसुर-दोषाणाम् मध्ये Among the demoniac vices described सकल-दोष-मूल-भूतम् दोष-त्रयम् there are three vices that are the basis of all vices ...

**||16.21||**

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥
त्रि-विधम् नरकस्य एदम् द्वारम् नाशनम् आत्मनः कामः क्रोधः तथा लोभः तस्मात् एतद् त्रयम् त्यजेत्

कामः क्रोधः तथा लोभः »Lust (Kāma), anger (Krodha) and greed (Lobha) नरकस्य इदम् त्रि-विधम् द्वारम् this is the threefold gate to hell आत्मनः नाशनम् [and thus] the destruction of the self (leading to lower births), तस्मात् एतद् त्रयम् त्यजेत् therefore one should give up these three.«

**||16.22||**

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥

एतैः विमुक्तः कौन्तेय तमः-द्वारैः त्रिभिः नरः आचरति आत्मनः श्रेयः ततः याति पराम् गतिम्

तमसः द्वारम् तमः-द्वारम् _the door of Tamas.

कौन्तेय »O Arjuna! एतैः त्रिभिः तमः-द्वारैः From these three gates to darkness विमुक्तः नरः the man who is free, आत्मनः श्रेयः आचरति he practices what is good for himself (like austerities and Yoga) ततः पराम् गतिम् याति and thereby attains the supreme destination (liberation).«

कामादि-त्यागः च And the renunciation of Kāma etc. स्व-धर्म-आचरणम् विना न भवति is not possible without the performance of one's duties ...

**||16.23||**

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥

यः शास्त्र-विधिम् उत्सृज्य वर्तते काम-कारतः न सः सिद्धिम् अवाप्नोति न सुखम् न पराम् गतिम्

शास्त्राणाम् विधिः इति शास्त्र-विधिः _the order of Shāstra. कामानाम् कामः यस्य सः काम-कामः _whose desire is for enjoyment.

शास्त्र-विधिम् उत्सृज्य »[After] discarding the order of the scriptures (Shāstra) यः काम-कारतः वर्तते one who acts whimsically, सः न सिद्धिम् अवाप्नोति he neither attains perfection (knowledge of the truth) न सुखम् न पराम् गतिम् nor happiness (peace), nor the supreme destination (liberation).«

**||16.24||**

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥

तस्मात् शास्त्रम् प्रमाणम् ते कार्य-अकार्य-व्यवस्थितौ ज्ञात्वा शास्त्र-विधान-उक्तम् कर्म कर्तुम् इह अर्हसि

शास्त्रस्य विधानेन उक्तम् इति शास्त्र-विधान-उक्तम् _said by the order of Shāstra.

तस्मात् कार्य-अकार्य-व्यवस्थितौ »Therefore, in ascertaining duty and non-duty शास्त्रम् तव/ते प्रमाणम् scripture (Shāstra) is your authority, शास्त्र-विधान-उक्तम् कर्म ज्ञात्वा [after] knowing the duty ordered by Shāstra इह कर्तुम् अर्हसि you should work in it.«

**||17.1||**

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः। तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः॥

ये शास्त्र-विधिम् उत्सृज्य यजन्ते श्रद्धया अन्विताः तेषाम् निष्ठा तु का कृष्ण सत्त्वम् आहो रजः तमः

कृष्ण »O Krishna! शास्त्र-विधिम् उत्सृज्य [After unknowingly] discarding the order of Shāstra ये श्रद्धया अन्विताः यजन्ते those who sacrifice /worship with [religious] faith (Shraddhā), तेषाम् तु निष्ठा का what is their status – सत्त्वम् आहो रजः तमः Sattva, Rajas or Tamas?«

आस्तिक्य-बुद्धिः हि श्रद्धा Faith (Shraddhā) is a sense of religiosity. अतः Therefore न अत्र शास्त्र-अतिलङ्घिनः गृह्यन्ते those who transgress [religious] scriptures [purposefully] are not meant here. अपितु But those who क्लेश-बुद्ध्या from a sense of trouble आलस्यात् वा or out of laziness शास्त्रार्थ-ज्ञाने प्रयत्नम् अ-कृत्वा without attempting to know the injunctions of scripture केवलम् आचार-परम्परा-वशेन only according to traditional usage श्रद्धया क्वचिद् देवता-आराधनादौ प्रवर्तमानाः engage in worshiping some deity with faith गृह्यन्ते they are meant.

**||17.2||**

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

त्रि-विधा भवति श्रद्धा देहिनाम् सा स्व-भाव-जा सात्त्विकी राजसी च एव तामसी च इति ताम् शृणु

स्वस्य भावात् जाता इति स्व-भाव-जा _born from one’s nature.

स्व-भाव-जा »According to one’s [threefold] nature देहिनाम् सा श्रद्धा that faith (Shraddhā) of embodied beings त्रि-विधा भवति is threefold – सात्त्विकी राजसी च एव तामसी च in Sattva, Rajas and Tamas, इति ताम् शृणु thus hear about it.«

स्व-भावः ‘Own nature’ means पूर्व-जन्म-संस्कारः impressions from a previous life. स्व-भावम् अन्यथा कर्तुम् समर्थम् Able to change one’s nature हि शास्त्र-उक्तम् विवेक-ज्ञानम् is only discriminative knowledge taught by the scriptures. तद् तु तेषाम् न अस्ति But this they have not. ... शास्त्र-तत्त्व-ज्ञानतः प्रवर्तमानानाम् Of those who act with real knowledge of scripture परमेश्वर-पूजा-विषया सात्त्विकी एक-विधा एव श्रद्धा the faith in the worship of the Supreme Lord is of one kind only – in Sattva. लोक-आचार-मात्रेण तु प्रवर्तमानानाम् देहिनाम् या श्रद्धा But the faith of those beings who act just according to popular usage सा तु सात्त्विकी राजसी तामसी च इति त्रि-विधा भवति that [faith] is threefold – in Sattva, Rajas and Tamas.

**||17.3||**

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥

सत्त्व-अनुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयः अयम् पुरुषः यः यद्-श्रद्धः सः एव सः

या श्रद्धा यस्य सः यद्-श्रद्धः _whose faith is which.

भारत »O Arjuna! सत्त्व-अनुरूपा सर्वस्य श्रद्धा भवति According to [his previous] nature is each one’s faith. श्रद्धामयः अयम् पुरुषः By [his] faith each person is formed (he is affected by the three kinds of faith) – यः यद्-श्रद्धः whatever his faith सः सः एव he is just that.«

E.g., यः पूर्वम् सत्त्व-उत्कर्षेण सात्त्विक-श्रद्धया युक्तः पुरुषः a person who, owing to a predominance of Sattva, was formerly endowed with Sattva faith सः पुनः तादृशत्व-संस्कारेण सात्त्विक-श्रद्धया युक्तः एव भवति is on account of his inherent tendency (Samskāra) again endowed with Sattva faith.

सात्त्विकादि-भेदम् एव कार्य-भेदेन प्रपञ्चयति The division according to Sattva etc. is elaborated through differences in actions ...

||17.4||

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः । प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥
यजन्ते सात्त्विकाः देवान् यक्ष-रक्षांसि राजसाः प्रेतान् भूत-गणान् च अन्ये यजन्ते तामसाः जनाः

सात्त्विकाः जनाः देवान् यजन्ते »Persons in Sattva worship [Sattva-]Devas राजसाः यक्ष-रक्षांसि those in Rajas [worship] Yakshas and Rakshasas अन्ये च तामसाः and others, those in Tamas प्रेतान् भूत-गणान् यजन्ते worship ghosts (Preta) and the host of spirits (Bhūta).«

सत्त्वादि-प्रकृतीनाम् तद्-तद्-देवतानाम् तु पूजा-रुचिभिः [Thus] by the inclinations to worship specific deities of Sattva and other natures तद्-तद्-पूजकानाम् सात्त्विकत्व-आदि ज्ञातव्यम् the nature of their worshipers also as being Sattva etc., is to be known.

||17.5-6||

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥
अ-शास्त्र-विहितम् घोरम् तप्यन्ते ये तपः जनाः दम्भ-अहङ्कार-संयुक्ताः काम-राग-बल-अन्विताः
कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥
कर्षयन्तः शरीर-स्थम् भूत-ग्राम् अ-मचेतसः माम् च एव अन्तः-शरीर-स्थम् तान् विद्धि आसुर-निश्चयान्

न शास्त्रेण विहितम् इति अ-शास्त्र-विहितम् _not prescribed by Shāstra. आसुरः निश्चयः यस्य सः आसुर-निश्चयः _whose resolve is demoniac.

दम्भ-अहङ्कार-संयुक्ताः »Endowed with pride and false ego काम-राग-बल-अन्विताः and endowed with obstinacy, lust (Kāma) and attachment (Rāga), ये अ-चेतसः जनाः those ignorant persons who अ-शास्त्र-विहितम् घोरम् तपः severe austerity, not prescribed by Shāstra तप्यन्ते they undergo शरीर-स्थम् भूत-ग्रामम् [and thereby] the elements in the body अन्तः-शरीर-स्थम् माम् च एव and also me, who am situated in the body कर्षयन्तः [while] torturing, तान् आसुर-निश्चयान् विद्धि know them to be of demoniac mentality.«

Self-discipline (see 17.14 ff.) is not to be confused with self-torture, which is condemned by Krishna Bhagavān and Gautama Buddha.

आहारादि-भेदात् अपि सात्त्विकादि-भेदम् दर्शयितुम् To show the distinction between [people in] Sattva etc., even from the differences in food आह it is stated ...

||17.7||

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥
आहारः तु अपि सर्वस्य त्रि-विधः भवति प्रियः यज्ञः तपः तथा दानम् तेषाम् भेदम् इमम् शृणु

सर्वस्य प्रियः आहारः तु अपि »And even the food (Āhāra) liked by each त्रि-विधः भवति is threefold, तथा यज्ञः तपः दानम् as are sacrifice (Yajna), austerity (Tapas) and charity (Dāna). तेषाम् इमम् भेदम् शृणु Hear their distinction.«

सात्त्विक-आहार-यज्ञादि-सेवया By resorting to food, sacrifice, etc., in Sattva सत्त्व-वृद्धौ यत्नः कर्तव्यः one should endeavor to increase Sattva – इति एतद् अर्थम् कथ्यते for this purpose it is declared.

||17.8||

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥

आयुः-सत्त्व-बल-आरोग्य-सुख-प्रीति-विवर्धनाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विक-प्रियाः

सात्त्विकस्य प्रियः इति सात्त्विक-प्रियः _dear to one in Sattva.

आयुः-सत्त्व-बल-आरोग्य-सुख-प्रीति-विवर्धनाः »Which are increasing longevity, vitality, strength, health, happiness and joy रस्याः स्निग्धाः स्थिराः हृद्याः and which are tasty, fatty, nourishing and pleasing [at sight] – सात्त्विक-प्रियाः आहाराः [such] foods are dear to one in Sattva.«

||17.9||

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥

कटु-अम्ल-लवण-अत्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः आहाराः राजसस्य इष्टाः दुःख-शोक-आमय-प्रदाः

कटु-अम्ल-लवण-अत्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः »Which are very bitter, sour, salty, hot, pungent (like pepper), dry (like Kangu and Kodrava) and burning (like mustard) दुःख-शोक-आमय-प्रदाः and give distress (immediate inner pain), sorrow (later depression of spirits) and disease – राजसस्य इष्टाः आहाराः [such] foods are dear to one in Rajas.«

||17.10||

यातयामं गतरसं पूति पर्युषितं च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥

यात-यामम् गत-रसम् पूति पर्युषितम् च यद् उच्छिष्टम् अपि च अ-मेध्यम् भोजनम् तामस-प्रियम्

यातः यामः यस्य तद् यात-यामम् _whose period has gone. गतः रसः यस्य तद् गत-रसम् _whose taste has gone.

यात-यामम् गत-रसम् पूति पर्युषितम् च »Which is cold, tasteless, putrid (foul-smelling) and stale यद् च उच्छिष्टम् अ-मेध्यम् अपि and which is left-over [by another] or impure ('which can not be offered in sacrifice') – तामस-प्रियम् भोजनम् [such] food is dear to one in Tamas.«

यातः यामः/प्रहरः यस्य पक्वस्य ओदनादेः Cooked rice etc. whose Yāma (three hours; same as Prahara) has passed तद् यात-यामम् that is called yāta-yāma शैत्य-अवस्थाम् प्राप्तम् इति अर्थः i.e., which has become cold. पर्युषितम् 'Stale' means दिन-अन्तर-पक्वम् cooked the day before. यज्ञः अपि त्रिविधः Sacrifice (Yajna) is also threefold ...

||17.11||

अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥

अ-फल-आकाङ्क्षिभिः यज्ञः विधि-दिष्टः यः इज्यते यष्टव्यम् एव इति मनः समाधाय सः सात्त्विकः

यष्टव्यम् एव »'One has to do sacrifice' – इति मनः समाधाय [after] thus fixing the mind, यः यज्ञः the sacrifice which अ-फल-आकाङ्क्षिभिः by men not expecting the fruit विधि-दिष्टः इज्यते is performed according to rule, सः सात्त्विकः that is in Sattva.«

||17.12||

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्। इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥

अभिसन्धाय तु फलम् दम्भ-अर्थम् अपि च एव यद् इज्यते भरत-श्रेष्ठ तम् यज्ञम् विद्धि राजसम्

भरत-श्रेष्ठ »O Arjuna! फलम् अभिसन्धाय तु [But, after] desiring the fruit, दम्भ-अर्थम् अपि च एव only for the sake of boasting यद् इज्यते that which is offered, तम् यज्ञम् राजसम् विद्धि know that sacrifice to be in Rajas.«

||17.13||

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥

विधि-हीनम् अ-सृष्ट-अन्नम् मन्त्र-हीनम् अ-दक्षिणम् श्रद्धा-विरहितम् यज्ञम् तामसम् परिचक्षते

न सृष्टम् अन्नम् यस्मिन् सः अ-सृष्ट-अन्नः _in which food is not distributed.

विधि-हीनम् अ-सृष्ट-अन्नम् »Which is irregular, without distribution of food मन्त्र-हीनम् अ-दक्षिणम् without Mantras and remuneration (Dakshina) [to the priests] श्रद्धा-विरहितम् यज्ञम् the sacrifice without faith तामसम् परिचक्षते is considered to be in Tamas.«

तपसः सात्त्विकादि-भेदम् दर्शयितुम् To show the Sattva and other varieties of Tapas प्रथमम् तावत् शारीरादि-भेदेन तस्य त्रैविध्यम् आह first of all its threefold division into bodily, etc. [Tapas] is stated ...

||17.14||

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

देव-द्विज-गुरु-प्राज्ञ-पूजनम् शौचम् आर्जवम् ब्रह्म-चर्यम् अ-हिंसा च शारीरम् तपः उच्यते

देव-द्विज-गुरु-प्राज्ञ-पूजनम् »Worshiping the Devas, Brāhmanas, Gurus and [other] wise men शौचम् आर्जवम् purity and simplicity ब्रह्म-चर्यम् अ-हिंसा च continence and non-violence शारीरम् तपः उच्यते this is called bodily austerity (Tapas).«

||17.15||

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

अनुद्वेग-करम् वाक्यम् सत्यम् प्रिय-हितम् च यद् स्वाध्याय-अभ्यसनम् च एव वाङ्मयम् तपः उच्यते

न उद्वेगम् करोति यद् तद् अनुद्वेग-करः _which does not cause anxiety. स्वाध्यायस्य अभ्यसनम् इति स्वाध्याय-अभ्यसनम् _the practice of study.

यद् अनुद्वेग-करम् »Which does not cause anxiety सत्यम् प्रिय-हितम् च वाक्यम् as also truthful, pleasing and beneficial speech स्वाध्याय-अभ्यसनम् च एव and also the practice of study [of the Vedas] वाङ्मयम् तपः उच्यते is called vocal Tapas.«

||17.16||

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥

मनः-प्रसादः सौम्यत्वम् मौनम् आत्म-विनिग्रहः भाव-संशुद्धिः इति एतद् तपः मानसम् उच्यते

भावस्य संशुद्धिः इति भाव-संशुद्धिः _purity of heart.

मनः-प्रसादः सौम्यत्वम् मौनम् »Satisfaction (peace), mildness and gravity आत्म-विनिग्रहः भाव-संशुद्धिः mind-control (withdrawing it from sense objects) and purity of heart (absence of falsity in conduct) इति एतद् मानसम् तपः उच्यते this is called mental Tapas.«

||17.17||

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः। अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥

श्रद्धया परया तप्तम् तपः तद् त्रि-विधम् नरैः अ-फल-आकाङ्क्षिभिः युक्तैः सात्त्विकम् परिचक्षते

तद् त्रि-विधम् तपः »That threefold Tapas (bodily, verbal, mental) अ-फल-आकाङ्क्षिभिः युक्तैः नरैः by devoted men, who do not expect any fruit परया श्रद्धया तप्तम् undergone with great faith सात्त्विकम् परिचक्षते is considered to be in Sattva.«

||17.18||

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्। क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥

सत्कार-मान-पूजा अर्थम् तपः दम्भेन च एव यद् क्रियते तद् इह प्रोक्तम् राजसम् चलम् अ-ध्रुवम्

सत्कार-मान-पूजा-अर्थम् »To gain respect (verbal adoration), honor (physical adoration like rising up, salutation) and worship (by gaining wealth), यद् तपः दम्भेन च एव क्रियते that [threefold] austerity which is performed to boast चलम् अ-ध्रुवम् being [thus] flickering and unstable (temporary), तद् इह राजसम् प्रोक्तम् that is here declared to be in Rajas.«

||17.19||

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः। परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥

मूढ-ग्राहेण आत्मनः यद् पीडया क्रियते तपः परस्य उत्सादन-अर्थम् वा तद् तामसम् उदाहृतम्

मूढः ग्राहः इति मूढ-ग्राहः _a foolish conception.

मूढ-ग्राहेण आत्मनः पीडया »With a foolish notion and self-torture परस्य उत्सादन-अर्थम् वा or for the destruction of another [by black magic] यद् तपः क्रियते austerity which is performed, तद् तामसम् उदाहृतम् that is declared to be in Tamas.«

||17.20||

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥

दातव्यम् इति यद् दानम् दीयते अनुपकारिणे देशे काले च पात्रे च तद् दानम् सात्त्विकम् स्मृतम्

देशे काले च पात्रे च »At the [right] place and time to a worthy person दातव्यम् इति and because one has to do charity यद् दानम् that charity (Dāna) which अनुपकारिणे दीयते is given to one who can not give in return, तद् दानम् सात्त्विकम् स्मृतम् that charity is known to be in Sattva.«

||17.21||

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥

यद् तु प्रत्युपकार-अर्थम् फलम् उद्दिश्य वा पुनः दीयते च परिक्लिष्टम् तद् दानम् राजसम् स्मृतम्

प्रत्युपकार-अर्थम् तु »But expecting some return [in time] फलम् उद्दिश्य वा पुनः or [after] aiming at its result (like attaining heaven) यद् च परिक्लिष्टम् दीयते that which is given grudgingly, तद् दानम् राजसम् स्मृतम् that charity (Dāna) is known to be in Rajas.«

||17.22||

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्॥

अ-देश-काले यद् दानम् अ-पात्रेभ्यः च दीयते अ-सत्कृतम् अवज्ञातम् तद् तामसम् उदाहृतम्

अ-देश-काले अ-पात्रेभ्यः च »At the wrong place and time, and to unworthy persons अ-सत्कृतम् अवज्ञातम् [or else] without proper reception and despisingly यद् दानम् दीयते that charity (Dāna) which is given, तद् तामसम् उदाहृतम् that is said to be in Tamas.«

ननु च एवम् विचार्यमाणे But considering this सर्वम् अपि यज्ञ-तपः-दानादि राजस-तामस-प्रायम् एव are not all Yajna, Tapas, Dāna, etc. mostly Rajas and Tamas इति व्यर्थः यज्ञादि-प्रयासः and thus efforts for sacrifices etc. are useless? इति आशङ्क्य Apprehending such a doubt तथा-विधस्य अपि सात्त्विकत्व-आपादन-प्रकारम् दर्शयितुम् to show a means to effect Sattva even of such [sacrifices etc.] आह it is stated ...

||17.23||

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥

ओम् तद् सत् इति निर्देशः ब्रह्मणः त्रि-विधः स्मृतः ब्राह्मणाः तेन वेदाः च यज्ञाः च विहिताः पुरा

ओम् तद् सत् »'Om, Tad, Sat' इति त्रि-विधः ब्रह्मणः निर्देशः स्मृतः this is considered the threefold designation of the Absolute (Brahma). ब्राह्मणाः वेदाः च यज्ञाः च Brāhmanas, Vedas and sacrifices तेन पुरा विहिताः were formerly created (or perfected) by that.«

अयम् त्रि-विधः अपि नाम-निर्देशः All these three designations [of the Absolute] विगुणम् अपि स-गुणी-कर्तुम् समर्थः are able to make even a defect [in a sacrifice etc.] a quality [by merely being pronounced]. इति आशयेन स्तौति With this view He praises them.

||17.24||

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

तस्मात् ओम् इति उदाहृत्य यज्ञ-दान-तपः-क्रियाः प्रवर्तन्ते विधान-उक्ताः सततम् ब्रह्म-वादिनाम्

तस्मात् ओम् इति उदाहृत्य »Therefore, [after] uttering 'Om', ब्रह्म-वादिनाम् of the transcendentalists विधान-उक्ताः यज्ञ-दान-तपः-क्रियाः acts of sacrifice, charity and austerity, mentioned in the scriptures सततम् प्रवर्तन्ते they always begin [to become efficacious].«

||17.25||

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः । दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥

तद् इति अनभिसन्धाय फलम् यज्ञ-तपः-क्रियाः दान-क्रियाः च विविधाः क्रियन्ते मोक्ष-काङ्क्षिभिः

तद् इति »With 'Tad' फलम् अनभिसन्धाय [after] not desiring the fruit विविधाः यज्ञ-तपः-क्रियाः different acts of sacrifices and austerities दान-क्रियाः च and acts of charity मोक्ष-काङ्क्षिभिः क्रियन्ते are performed by those desiring liberation.«

चित्त-शोधन-द्वारेण Because through the purification of the mind फल-सङ्कल्प-त्याजनेन and through the [consequent] renunciation of the desire for the fruit मुमुक्षुत्व-सम्पादकत्वात् [the utterance of 'Tad'] creates the desire for liberation तद्-शब्द-निर्देशः प्रशस्तः [therefore] the designation by the word Tad is glorified.

||17.26||

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥

सत्-भावे साधु-भावे च सत् इति एतद् प्रयुज्यते प्रशस्ते कर्मणि तथा सत्-शब्दः पार्थ युज्यते

पार्थ »O Arjuna! सत्-भावे साधु-भावे च In the sense of existence (Sat) and goodness (Sādhu) सत् इति एतद् प्रयुज्यते this [word] 'Sat' is used, तथा प्रशस्ते कर्मणि also in an auspicious act सत्-शब्दः युज्यते the word 'Sat' is used.«

||17.27||

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते। कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥

यज्ञे तपसि दाने च स्थितिः सत् इति च उच्यते कर्म च एव तद्-अर्थीयम् सद् इति एव अभिधीयते

यज्ञे तपसि दाने च स्थितिः »Steadiness in sacrifice, austerity and charity सत् इति उच्यते च is also called 'Sat', तद्-अर्थीयम् कर्म च एव and work for that purpose (sacrifice, etc.) (or: 'work done for the Lord') सत् इति एव अभिधीयते is also called 'Sat'.«

||17.28||

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

अ-श्रद्धया हुतम् दत्तम् तपः तप्तम् कृतम् च यद् अ-सत् इति उच्यते पार्थ न च तद् प्रेत्य नो इह

अ-श्रद्धया »Without faith (Shraddhā) यद् हुतम् दत्तम् whatever is offered [as sacrifice], given [as charity] तपः तप्तम् कृतम् च undergone as austerity, or done [as rite] अ-सत् इति उच्यते that is called 'A-sat'. पार्थ O Arjuna! तद् न च प्रेत्य It is [useful] neither after death (it does not fructify, being defective) नो इह nor in this life (bringing ill-repute).«

||18.1||

सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥

सन्न्यासस्य महा-बाहो तत्त्वम् इच्छामि वेदितुम् त्यागस्य च हृषीक-ईश पृथक् केशि-निषूदन

केशिनः निषूदनः इति केशि-निषूदनः _the slayer of Keshī.

महा-बाहो हृषीक-ईश केशि-निषूदन »O Lord! सन्न्यासस्य त्यागस्य च तत्त्वम् The nature of [Karma-] Sannyāsa and of [Karma-phala-]Tyāga पृथक् वेदितुम् इच्छामि I want to know distinctly.«

||18.2||

काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥

काम्यानाम् कर्मणाम् न्यासम् सन्न्यासम् कवयः विदुः सर्व-कर्म-फल-त्यागम् प्राहुः त्यागम् विचक्षणाः

काम्यानाम् कर्मणाम् न्यासम् »Renunciation of activities prompted by desire कवयः सन्न्यासम् विदुः the sages know as 'Sannyāsa', सर्व-कर्म-फल-त्यागम् renunciation of the fruit of all activities विचक्षणाः त्यागम् प्राहुः the wise declare to be 'Tyāga'.«

||18.3||

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः। यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥

त्याज्यम् दोषवत् इति एके कर्म प्राहुः मनीषिणः यज्ञ-दान-तपः-कर्म न त्याज्यम् इति च अपरे

कर्म दोषवत् त्याज्यम् »That [all] activity is to be given up as faulty इति एके मनीषिणः प्राहुः thus some wise men (the Sānkhyas) declare, यज्ञ-दान-तपः-कर्म न त्याज्यम् that acts of Yajna, Dāna and Tapas are not to be given up इति अपरे च thus others (the Mīmāmsakas) [declare].«

**||18.4||**

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम। त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः॥

निश्चयम् शृणु मे तत्र त्यागे भरत-सत्तम त्यागः हि पुरुष-व्याघ्र त्रि-विधः सम्प्रकीर्तितः

भरत-सत्तम »O Arjuna! तत्र त्यागे मम/मे निश्चयम् शृणु Hear my ascertainment about Tyāga. पुरुष-व्याघ्र O Arjuna! त्यागः हि त्रि-विधः सम्प्रकीर्तितः Even Tyāga is declared as threefold (i.e., it is difficult to understand).«

**||18.5||**

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥

यज्ञ-दान-तपः-कर्म न त्याज्यम् कार्यम् एव तद् यज्ञः दानम् तपः च एव पावनानि मनीषिणाम्

यज्ञ-दान-तपः-कर्म »Activities of sacrifice, charity and austerity न त्याज्यम् is not to be given up, तद् कार्यम् एव it has to be done यज्ञः दानम् तपः च एव [because] Yajna, Dāna and Tapas मनीषिणाम् पावनानि purify [the minds even] of wise men.«

येन प्रकारेण कृतानि Performed in which way एतानि पावनानि भवन्ति they become purifyers तम् प्रकारम् दर्शयन् showing that way आह it is stated ...

**||18.6||**

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥

एतानि अपि तु कर्माणि सङ्गम् त्यक्त्वा फलानि च कर्तव्यानि इति मे पार्थ निश्चितम् मतम् उत्तमम्

पार्थ »O Arjuna! सङ्गम् फलानि च त्यक्त्वा [After] giving up attachment (the idea of being a doer) and the fruits [of those activities] (performing them merely as acts of worship to the Lord) एतानि अपि तु कर्माणि कर्तव्यानि even these activities are to be done, इति मम/मे निश्चितम् उत्तमम् मतम् this is my definite final opinion.«

प्रतिज्ञातम् त्यागस्य त्रैविध्यम् इदानीम् दर्शयति Now He shows the three kinds of Tyāga, as promised (18.4) ...

**||18.7||**

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥

नियतस्य तु सन्न्यासः कर्मणः न उपपद्यते मोहात् तस्य परित्यागः तामसः परिकीर्तितः

नियतस्य कर्मणः सन्न्यासः तु »Renunciation of prescribed duty (Nitya-Karma) न उपपद्यते is not proper, मोहात् तस्य परित्यागः its Tyāga out of illusion [that it should be abandoned although it is prescribed] तामसः परिकीर्तितः is declared to be in Tamas [because 'illusion' means Tamas].«

काम्यस्य कर्मणः बन्धकत्वात् सन्न्यासः/त्यागः युक्तः Tyāga of desired work (Kāmya-Karma) is proper, because it leads to bondage. नियतस्य तु/नित्यस्य पुनः कर्मणः सन्न्यासः/त्यागः न उपपद्यते

But Tyāga of prescribed work (Nitya-Karma) is not proper सत्त्व-शुद्धि-द्वारा मोक्ष-हेतुत्वात् because it causes liberation through purification of the mind.

**||18.8||**

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

दुःखम् इति एव यद् कर्म काय-क्लेश-भयात् त्यजेत् सः कृत्वा राजसम् त्यागम् न एव त्याग-फलम् लभेत्

कायस्य क्लेशस्य भयम् इति काय-क्लेश-भयम् _fear of suffering of the body. त्यागस्य फलम् इति त्याग-फलम् _the result of renunciation.

दुःखम् इति एव »[Thinking] 'it is just troublesome' काय-क्लेश-भयात् out of fear of bodily suffering यद् कर्म त्यजेत् when one gives up work राजसम् त्यागम् कृत्वा [thus] performing Tyāga in Rajas, सः त्याग-फलम् न एव लभेत् he will never get the fruit of renunciation (which is steadfastness to knowledge).«

**||18.9||**

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन । सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥

कार्यम् इति एव यद् कर्म नियतम् क्रियते अर्जुन सङ्गम् त्यक्त्वा फलम् च एव सः त्यागः सात्त्विकः मतः

अर्जुन »O Arjuna! कार्यम् इति एव [Thinking] 'it is to be done' सङ्गम् फलम् च एव त्यक्त्वा [after] giving up attachment and the [desire for its] fruit यद् कर्म नियतम् क्रियते when duty is always performed, सः त्यागः सात्त्विकः मतः that Tyāga is considered to be in Sattva.«

एवम्-भूत-सात्त्विक-त्याग-परिनिष्ठितस्य लक्षणम् आह The characteristic of a person established in such Sattva Tyāga is stated ...

**||18.10||**

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥

न द्वेष्टि अ-कुशलम् कर्म कुशले न अनुषज्जते त्यागी सत्त्व-समाविष्टः मेधावी छिन्न-संशयः

सत्त्वेन समाविष्टः इति सत्त्व-समाविष्टः _filled with Sattva. छिन्नः संशयः यस्य सः छिन्न-संशयः _whose doubt is cut.

सत्त्व-समाविष्टः »Being situated in Sattva छिन्न-संशयः and free from doubt (a wrong bodily conception), मेधावी त्यागी the intelligent Tyāgī अ-कुशलम् कर्म न द्वेष्टि does not hate displeasing work कुशले न अनुषज्जते and is not attached to pleasing [work].«

ननु एवम-भूतात् कर्म-फल-त्यागात् वरम् सर्व-कर्म-त्यागः But is Sannyāsa (renunciation of all work, which is a great distraction) not better than such Tyāga (renunciation of the fruit of work)? ...

**||18.11||**

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥

न हि देह-भृता शक्यम् त्यक्तुम् कर्माणि अ-शेषतः यः तु कर्म-फल-त्यागी सः त्यागी इति अभिधीयते

देहम् बिभर्ति यः सः देह-भृत् _'who holds a body', embodied being, the soul.

कर्माणि अ-शेषतः त्यक्तुम् »To completely give up [all] activities देह-भृता न हि शक्यम् is not possible by an embodied being (by one who identifies with the body, see 3.5), यः तु कर्म-फल-

त्यागी but a Tyāgī, who gives up the fruit of activity सः त्यागी इति अभिधीयते he is called a [real] Tyāgī (though performing all duty).«

एवम्-भूतस्य कर्म-फल-त्यागस्य फलम् आह The result of such Karma-phala-tyāga is stated ...

**||18.12||**

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥

अनिष्टम् इष्टम् मिश्रम् च त्रि-विधम् कर्मणः फलम् भवति अ-त्यागिनाम् प्रेत्य न तु सन्न्यासिनाम् क्वचिद्

अनिष्टम् इष्टम् मिश्रम् च »Undesirable (like going to hell), desirable (like becoming a Deva) and mixed (being again a human) – त्रि-विधम् कर्मणः फलम् a threefold fruit of activity अ-त्यागिनाम् प्रेत्य भवति accrues after death for those who are not Tyāgīs, सन्न्यासिनाम् तु न क्वचिद् but never for those who are Tyāgīs (real Sannyāsīs).«

तेषाम् सात्त्विकानाम् For those [Tyāgīs or Sannyāsīs] who are in Sattva पाप-असम्भवात् because there is no possibility of sin (and thus no Pāpa-phala) ईश्वर-अर्पणेन च पुण्य-फलस्य त्यक्तत्वात् and because the fruit of virtue (Punya-phala) has been given up by offering it to the Lord त्रि-विधम् अपि कर्म-फलम् न भवति there is no threefold Karma-phala.

The word Sannyāsī here includes the Tyāgī under discussion. A real Sannyāsī does Karma-tyāga in the spirit of Karma-phala-tyāga. Karma-phala-tyāga is thus the common characteristic of both the real Sannyāsī and the Tyāgī. Besides, the word Sannyāsī was already used for a Karma-phala-tyāgī in (6.1).

ननु कर्म कुर्वतः But for one doing work कर्म-फलम् कथम् न भवेत् how is there no Karma-phala? इति आशङ्क्य Anticipating this doubt, सङ्ग-त्यागिनः निरहङ्कारस्य सतः कर्म-फलेन लेपः न अस्ति इति उपपादयितुम् to show that for one renouncing attachment and ego there is no sticking to the Karma-phala आह it is stated ...

**||18.13||**

पञ्चैतानि महाबाहो कारणानि निबोध मे । साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥

पञ्च एतानि महा-बाहो कारणानि निबोध मे साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्व-कर्मणाम्

महा-बाहो »O Arjuna! सर्व-कर्मणाम् सिद्धये For the accomplishment of all work साङ्ख्ये कृतान्ते प्रोक्तानि as declared in Sānkhya in conclusion एतानि पञ्च कारणानि the following five causes मम/मे निबोध learn by me.«

**||18.14||**

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥

अधिष्ठानम् तथा कर्ता करणम् च पृथक् विधम् विविधाः च पृथक् चेष्टाः दैवम् च एव अत्र पञ्चमम्

अधिष्ठानम् तथा कर्ता »The place [of action] (the body) and the doer (oneself) पृथक्-विधम् करणम् च the manifold instrument (senses) विविधाः पृथक् चेष्टाः च the various (in function) and different (in nature) efforts (activities of Prāna, Apāna, etc.) अत्र च पञ्चमम् दैवम् एव and the fifth is the Lord (or destiny).«

||18.15||

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥

शरीर-वाक्-मनोभिः यद् कर्म प्रारभते नरः न्याय्यम् वा विपरीतम् वा पञ्च एते तस्य हेतवः

न्याय्यम् वा विपरीतम् वा »Either right or wrong शरीर-वाक्-मनोभिः with body, speech and mind यद् कर्म नरः प्रारभते whatever work a man performs तस्य एते पञ्च हेतवः these are its five causes.«

||18.16||

तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥

तत्र एवम् सति कर्तारम् आत्मानम् केवलम् तु यः पश्यति अ-कृत-बुद्धित्वात् न सः पश्यति दुर्मतिः

तत्र एवम् सति »Such being the case अ-कृत-बुद्धित्वात् out of ignorance यः तु केवलम् आत्मानम् कर्तारम् पश्यति one who sees only himself as doer, सः दुर्मतिः न पश्यति that fool does not see.«

We have translated kevalam as ‘only’. Shrīdhara Svāmī takes its meaning as ‘pure, absolute, detached’ – One who sees the Absolute Self as doer, does not see. Accordingly, the doer in (18.14) is for him only the ego. This is to make the point that the pure self is as non-doer not involved in matter. But in the conditioned state, the self is as doer one of the five causes of action (18.14,16).

||18.17||

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥

यस्य न अहङ्कृतः भावः बुद्धिः यस्य न लिप्यते हत्वा अपि सः इमान् लोकान् न हन्ति न निबध्यते

यस्य न अहङ्कृतः भावः »One who is free from the idea of being the doer यस्य बुद्धिः न लिप्यते and whose intelligence is [thus] not polluted (who is not attached to work, by dividing it into agreeable and disagreeable) इमान् लोकान् हत्वा अपि even [after] killing [all] these people, सः न हन्ति he does not [actually] kill न निबध्यते nor is he bound [by Karma] (see 5.10).«

सः एवम्-भूतः देहादि-व्यतिरिक्त-आत्म-दर्शी That person who thus sees the self as different from the body, etc. इमान् लोकान्/सर्वान् अपि प्राणिनः लोक-दृष्ट्या हत्वा अपि though in the eyes of the world killing these beings, all creatures विविक्तया स्व-दृष्ट्या न हन्ति yet in his own detached vision he does not kill.

||18.18||

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥

ज्ञानम् ज्ञेयम् परिज्ञाता त्रि-विधा कर्म-चोदना करणम् कर्म कर्ता इति त्रि-विधः कर्म-सङ्ग्रहः

ज्ञानम् ज्ञेयम् परिज्ञाता »Knowledge (Jnāna), its object (Jneya) and the knower (Jnātā) त्रि-विधा कर्म-चोदना this is the threefold impetus to activity. करणम् कर्म कर्ता Instrument (Karana), activity (Karma) and doer (Kartā) इति त्रि-विधः कर्म-सङ्ग्रहः this is the threefold constitution of activity.«

| | | | |
|---|---|---|---|
| impetus (‘software’): | Jnāna | Jneya | Jnātā |
| constitution (‘hardware’): | Karana | Karma | Kartā |

Now they are being described as threefold according to the Gunas. By Jnāna (18.20-22) Karana is also described, by Karma (18.23-25) Jneya, and by Kartā (18.26-28) Jnātā.

**||18.19||**

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः। प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥

ज्ञानम् कर्म च कर्ता च त्रि-धा एव गुण-भेदतः प्रोच्यते गुण-सङ्ख्याने यथावत् शृणु तानि अपि

गुणानाम् सङ्ख्यानः इति गुण-सङ्ख्यानः _the enumeration of the Gunas.

गुण-सङ्ख्याने »In the theory of the Gunas (Sānkhya) गुण-भेदतः according to the division of the Gunas ज्ञानम् कर्म च कर्ता च knowledge (Jnāna), activity (Karma) and doer (Kartā) त्रिधा एव प्रोच्यते [each] is declared as threefold, तानि अपि यथावत् शृणु hear of them also as they are.«

**||18.20||**

सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥

सर्व-भूतेषु येन एकम् भावम् अ-व्ययम् ईक्षते अ-विभक्तम् विभक्तेषु तद् ज्ञानम् विद्धि सात्त्विकम्

विभक्तेषु सर्व-भूतेषु »In all divided beings अ-विभक्तम् एकम् अ-व्ययम् भावम् undivided one unchangeable [spiritual] nature येन ईक्षते that [Jnāna] by which one sees, तद् ज्ञानम् सात्त्विकम् विद्धि know that Jnāna to be in Sattva.«

**||18.21||**

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥

पृथक्त्वेन तु यद् ज्ञानम् नाना-भावान् पृथक्-विधान् वेत्ति सर्वेषु भूतेषु तद् ज्ञानम् विद्धि राजसम्

यद् तु ज्ञानम् »But that Jnāna which सर्वेषु भूतेषु in all living beings (bodies) पृथक्-विधान् नाना-भावान् various natures of different kinds पृथक्त्वेन वेत्ति knows by distinction, तद् ज्ञानम् राजसम् विद्धि know that Jnāna to be in Rajas.«

**||18.22||**

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम्। अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥

यद् तु कृत्स्नवत् एकस्मिन् कार्ये सक्तम् अ-हैतुकम् अ-तत्त्व-अर्थवत् अल्पम् च तद् तामसम् उदाहृतम्

यद् तु »But that [Jnāna] which एकस्मिन् कार्ये कृत्स्नवत् सक्तम् is attached to one effect (body) as all in all अ-हैतुकम् अ-तत्त्व-अर्थवत् अल्पम् च and which is without reasoning and meaning, and small तद् तामसम् उदाहृतम् that is declared to be in Tamas.«

**||18.23||**

नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥

नियतम् सङ्ग-रहितम् अ-राग-द्वेषतः कृतम् अ-फल-प्रेप्सुना कर्म यद् तद् सात्त्विकम् उच्यते

अ-फल-प्रेप्सुना »By one who does not desire the fruit यद् नियतम् सङ्ग-रहितम् कर्म that regulated unattached activity (Karma) अ-राग-द्वेषतः कृतम् which is done without attraction and hatred तद् सात्त्विकम् उच्यते that is said to be in Sattva.«

**||18.24||**

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥

यद् तु काम-ईप्सुना कर्म स-अहङ्कारेण वा पुनः क्रियते बहुला-आयासम् तद् राजसम् उदाहृतम्

बहुलः आयासः यस्मिन् तद् बहुल-आयासः _in which there is much effort.

काम-ईप्सुना »By one who desires the fruit स-अहङ्कारेण वा पुनः or by one who has false ego यद् तु कर्म बहुला-आयासम् क्रियते that activity (Karma) which is done with great struggle तद् राजसम् उदाहृतम् that is said to be in Rajas.«

**||18.25||**

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥

अनुबन्धम् क्षयम् हिंसाम् अनपेक्ष्य च पौरुषम् मोहात् आरभ्यते कर्म यद् तद् तामसम् उच्यते

अनुबन्धम् क्षयम् हिंसाम् पौरुषम् च »The consequence, loss, harm and capacity अनपेक्ष्य [after] not considering यद् कर्म मोहात् आरभ्यते that activity (Karma) which is performed out of delusion तद् तामसम् उच्यते that is said to be in Tamas.«

**||18.26||**

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥

मुक्त-सङ्गः अनहंवादी धृति-उत्साह-समन्वितः सिद्धि-असिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते

धृत्या च उत्साहेन च समन्वितः इति धृति-उत्साह-समन्वितः _endowed with determination and enthusiasm.

मुक्त-सङ्गः अनहंवादी »Being free from attachment and egoism धृति-उत्साह-समन्वितः endowed with determination and enthusiasm सिद्धि-असिद्ध्योः निर्विकारः कर्ता the doer (Kartā) who is resolute in success and failure सात्त्विकः उच्यते is said to be in Sattva.«

**||18.27||**

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥

रागी कर्म-फल-प्रेप्सुः लुब्धः हिंसा-आत्मकः अ-शुचिः हर्ष-शोक-अन्वितः कर्ता राजसः परिकीर्तितः

हिंसा आत्मा यस्य सः हिंसा-आत्मकः _whose nature is violence. हर्षेण च शोकेन च अन्वितः यः सः हर्ष-शोक-अन्वितः _who is endowed with elation and dejection.

रागी कर्म-फल-प्रेप्सुः »Being attached, desiring the fruit of work लुब्धः हिंसा-आत्मकः अ-शुचिः greedy, violent and unclean हर्ष-शोक-अन्वितः कर्ता the Kartā who is subject to joy and sorrow राजसः परिकीर्तितः is declared to be in Rajas.«

**||18.28||**

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥

अ-युक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः विषादी दीर्घ-सूत्री च कर्ता तामसः उच्यते

अ-युक्तः प्राकृतः स्तब्धः »Being careless, vulgar and arrogant शठः नैष्कृतिकः अलसः deceitful, insulting and lazy विषादी दीर्घ-सूत्री च कर्ता the morose and procrastinating Kartā तामसः उच्यते is said to be in Tamas.«

**||18.29||**

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु । प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥

बुद्धेः भेदम् धृतेः च एव गुणतः त्रि-विधम् शृणु प्रोच्यमानम् अ-शेषेण पृथक्त्वेन धनञ्जय

धनञ्जय »O Arjuna! पृथक्त्वेन अ-शेषेण प्रोच्यमानम् Each completely being described बुद्धेः धृतेः च एव of discrimination (Buddhi) and determination (Dhriti) गुणतः त्रि-विधम् भेदम् शृणु hear the division, threefold according to the Gunas.«

**||18.30||**

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥

प्रवृत्तिम् च निवृत्तिम् च कार्य-अकार्ये भय-अभये बन्धम् मोक्षम् च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी

कार्यम् च अ-कार्यम् च इति कार्य-अकार्ये _duty and non-duty. भयम् च अ-भयम् च इति भय-अभये _fear and fearlessness.

पार्थ »O Arjuna! प्रवृत्तिम् च निवृत्तिम् च What is right and what is wrong कार्य-अकार्ये duty and non-duty [at a particular place and time] भय-अभये what is fear (to be feared) and not fear (not to be feared) (good and bad arising from the above Kārya and A-kārya) बन्धम् मोक्षम् च [how to attain] bondage and liberation या वेत्ति that which knows [these] सा बुद्धिः सात्त्विकी that Buddhi is in Sattva.«

**||18.31||**

यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥

यया धर्मम् अ-धर्मम् च कार्यम् च अ-कार्यम् एव च अ-यथावत् प्रजानाति बुद्धिः सा पार्थ राजसी

पार्थ »O Arjuna! धर्मम् अ-धर्मम् च What is right and what is wrong कार्यम् च अ-कार्यम् एव च duty and non-duty यया अ-यथावत् प्रजानाति that by which one incorrectly understands [these] (causing doubts) सा बुद्धिः राजसी that Buddhi is in Rajas.«

**||18.32||**

अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥

अ-धर्मम् धर्मम् इति या मन्यते तमसा आवृता सर्व-अर्थान् विपरीतान् च बुद्धिः सा पार्थ तामसी

पार्थ »O Arjuna! तमसा आवृता Being covered by ignorance या अ-धर्मम् धर्मम् इति मन्यते which considers wrong for right सर्व-अर्थान् विपरीतान् च and everything (duty, bondage, etc.) for the opposite सा बुद्धिः तामसी that Buddhi is in Tamas.«

**||18.33||**

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥

धृत्या यया धारयते मनः-प्राण-इन्द्रिय-क्रियाः योगेन अ-व्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी

पार्थ »O Arjuna! योगेन अ-व्यभिचारिण्या Undeviating through Yoga (concentration) यया धृत्या that determination (Dhriti) by which मनः-प्राण-इन्द्रिय-क्रियाः धारयते one controls (holds) the activities of mind, life air and senses सा धृतिः सात्त्विकी that Dhriti is in Sattva.«

**||18.34||**

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन । प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥

यया तु धर्म-काम-अर्थान् धृत्या धारयते अर्जुन प्रसङ्गेन फल-आकाङ्क्षी धृतिः सा पार्थ राजसी

अर्जुन पार्थ »O Arjuna! यया तु धृत्या But that Dhriti by which फल-आकाङ्क्षी प्रसङ्गेन one who out of attachment desires the fruit धर्म-काम-अर्थान् धारयते holds fast to Dharma-Artha-Kāma सा धृतिः राजसी that Dhriti is in Rajas.«

**||18.35||**

यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी॥

यया स्वप्नम् भयम् शोकम् विषादम् मदम् एव च न विमुञ्चति दुर्मेधाः धृतिः सा पार्थ तामसी

पार्थ »O Arjuna! यया दुर्मेधाः That by which a fool स्वप्नम् भयम् शोकम् sleep, fear and sorrow विषादम् मदम् एव च dejection and madness न विमुञ्चति does not give up सा धृतिः तामसी that Dhriti is in Tamas.«

**||18.36||**

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ॥

सुखम् तु इदानीम् त्रि-विधम् शृणु मे भरत-ऋषभ

भरत-ऋषभ »O Arjuna! इदानीम् तु But now त्रि-विधम् सुखम् मम/मे शृणु hear from me of the threefold happiness (Sukha).«

**||18.37||**

अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति। यत्तदग्रे विषमिव परिणामे ऽमृतोपमम्।

अभ्यासात् रमते यत्र दुःख-अन्तम् च निगच्छति यद् तद् अग्रे विषम् इव परिणामे अमृत-उपमम्

तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥

तद् सुखम् सात्त्विकम् प्रोक्तम् आत्म-बुद्धि-प्रसाद-जम्

अमृतम् उपमा यस्य तद् अमृत-उपमम् _whose resemblance is nectar. आत्म-बुद्धेः प्रसादात् जायते यद् तद् आत्म-बुद्धि-प्रसाद-जम् _which rises from the satisfaction of self-realization.

यत्र अभ्यासात् रमते »That in which one enjoys through practice (not suddenly as in sense pleasure) दुःख-अन्तम् च निगच्छति and [in which] one reaches the end of [all] suffering यद् तद् अग्रे विषम् इव which is in the beginning like poison (because it depends on the control of the mind, which is as if painful) परिणामे अमृत-उपमम् [but] at the end like nectar आत्म-बुद्धि-प्रसाद-जम् and which is born from the satisfaction of self-realization तद् सुखम् सात्त्विकम् प्रोक्तम् that Sukha is declared to be in Sattva.«

**||18.38||**

विषयेन्द्रियसंयोगाद्यत्तदग्रे ऽमृतोपमम्। परिणामे विषमिव तत्सुखं राजसं स्मृतम्॥

विषय-इन्द्रिय-संयोगात् यद् तद् अग्रे अमृत-उपमम् परिणामे विषम् इव तद् सुखम् राजसम् स्मृतम्

विषय-इन्द्रिय-संयोगात् »Derived from the contact of the senses with objects यद तद् अग्रे अमृत-उपमम् that [happiness] which is first like nectar परिणामे विषम् इव [but] at the end like poison (because it causes suffering here and hereafter) तद् सुखम् राजसम् स्मृतम् that Sukha is known to be in Rajas.«

**||18.39||**

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः। निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥

यद् अग्रे च अनुबन्धे च सुखम् मोहनम् आत्मनः निद्रा-आलस्य-प्रमाद-उत्थम् तद् तामसम् उदाहृतम्

निद्रा-आलस्य-प्रमाद-उत्थम् »Having arisen from sleep, laziness and fantasy यद् सुखम् अग्रे च अनुबन्धे च that Sukha which in the beginning and the end आत्मनः मोहनम् is the delusion of the self तद् तामसम् उदाहृतम् that is declared to be in Tamas.«

**||18.40||**

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥

न तद् अस्ति पृथिव्याम् वा दिवि देवेषु वा पुनः सत्त्वम् प्रकृति-जैः मुक्तम् यद् एभिः स्यात् त्रिभिः गुणैः

पृथिव्याम् वा दिवि देवेषु वा पुनः »Either on earth, or in heaven among the Devas यद् सत्त्वम् a being (a creature or anything) which प्रकृति-जैः एभिः त्रिभिः गुणैः from these three Gunas born of nature मुक्तम् स्यात् may be free, तद् न अस्ति that does not exist.«

[Liberation is possible] स्व-स्व-अधिकार-विहितैः कर्मभिः परमेश्वर-आराधनात् तद्-प्रसाद-लब्ध-ज्ञानेन by knowledge attained through the grace of the Lord after worship of the Lord by the duties prescribed according to individual fitness. – इति एवम् सर्व-गीतार्थ-सारम् सङ्गृह्य प्रदर्शयितुम् To show this by summarizing the essence of the meaning of the whole Gītā प्रकरण-अन्तरम् आरभते He starts a new topic ...

**||18.41||**

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप। कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥

ब्राह्मण-क्षत्रिय-विशाम् शूद्राणाम् च परन्तप कर्माणि प्रविभक्तानि स्व-भाव-प्रभवैः गुणैः

परन्तप »O Arjuna! ब्राह्मण-क्षत्रिय-विशाम् शूद्राणाम् च Of the Brāhmanas, Kshatriyas, Vaishyas and Shūdras कर्माणि the [specific] duties स्व-भाव-प्रभवैः गुणैः by the qualities born of their own natures (a tendency acquired in past births) प्रविभक्तानि are clearly divided.«

तत्र सत्त्व-प्रधानाः ब्राह्मणाः Among these the Brāhmanas have mainly Sattva सत्त्व-उपसर्जन-रजः-प्रधानाः क्षत्रियाः the Kshatriyas mainly Rajas with a mixture of Sattva तमः-उपसर्जन-रजः-प्रधानाः वैश्याः the Vaishyas mainly Rajas with a mixture of Tamas रजः-उपसर्जन-तमः-प्रधानाः शूद्राः and the Shūdras mainly Tamas with a mixture of Rajas.

**||18.42||**

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥

शमः दमः तपः शौचम् क्षान्तिः आर्जवम् एव च ज्ञानम् विज्ञानम् आस्तिक्यम् ब्रह्म-कर्म स्व-भाव-जम्

शमः दमः तपः शौचम् »Peacefulness, sense-control, austerity and cleanliness क्षान्तिः आर्जवम् एव च tolerance and honesty (Ārjava) ज्ञानम् विज्ञानम् आस्तिक्यम् knowledge, realization and religiousness (the conviction that there is another world) स्व-भाव-जम् ब्रह्म-कर्म is the behavior of a Brāhmana, born from his nature.«

**||18.43||**

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥

शौर्यम् तेजः धृतिः दाक्ष्यम् युद्धे च अपि अ-पलायनम् दानम् ईश्वर-भावः च क्षात्रम् कर्म स्व-भाव-जम्

ईश्वरस्य भावः इति ईश्वर-भावः _the mood of a ruler.

शौर्यम् तेजः धृतिः दाक्ष्यम् »Heroism, vigor, determination and expertness युद्धे अ-पलायनम् च अपि and also courage in battle दानम् ईश्वर-भावः च generosity and leadership स्व-भाव-जम् क्षात्रम् कर्म is the behavior of a Kshatriya, born from his nature.«

**||18.44||**

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥

कृषि-गोरक्ष्य-वाणिज्यम् वैश्य-कर्म स्व-भाव-जम् परिचर्य-आत्मकम् कर्म शूद्रस्य अपि स्व-भाव-जम्

कृषि-गोरक्ष्य-वाणिज्यम् »Agriculture, cattle raising (Go-rakshya) and trade स्व-भाव-जम् वैश्य-कर्म is the work of a Vaishya, born from his nature परिचर्य-आत्मकम् consisting of service (to the other three Varnas) शूद्रस्य अपि स्व-भाव-जम् कर्म is the work of a Shūdra, born from his nature.«

एवम्-भूतस्य ब्राह्मणादि-कर्मणः How such duty of a Brāhmana etc. ज्ञान-हेतुत्वम् leads to knowledge आह is being stated:

**||18.45||**

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥

स्वे स्वे कर्मणि अभिरतः संसिद्धिम् लभते नरः स्व-कर्म-निरतः सिद्धिम् यथा विन्दति तद् शृणु

स्वे स्वे कर्मणि अभिरतः »Being engaged in his particular duty (prescribed according to his own qualifications) नरः संसिद्धिम् लभते a man attains perfection (fitness for knowledge) स्व-कर्म-निरतः being engaged in his own duty, यथा सिद्धिम् विन्दति how he attains perfection तद् शृणु hear that.«

**||18.46||**

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥

यतः प्रवृत्तिः भूतानाम् येन सर्वम् इदम् ततम् स्व-कर्मणा तम् अभ्यर्च्य सिद्धिम् विन्दति मानवः

यतः भूतानाम् प्रवृत्तिः »From whom comes the manifestation (or activity) of all beings येन सर्वम् इदम् ततम् and by whom all this (world) is pervaded तम् स्व-कर्मणा अभ्यर्च्य [after] worshiping Him with one's duty मानवः सिद्धिम् विन्दति a man attains perfection.«

**||18.47||**

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् । स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

श्रेयान् स्व-धर्मः विगुणः पर-धर्मात् स्वनुष्ठितात् स्व-भाव-नियतम् कर्म कुर्वन् आप्नोति किल्बिषम्

स्वनुष्ठितात् पर-धर्मात् »Compared to the well-performed duty of another विगुणः स्व-धर्मः श्रेयान् one's own duty, even if faulty, is better स्व-भाव-नियतम् कर्म कुर्वन् [because while] doing work ordained by one's nature किल्बिषम् न आप्नोति one does not incur sin.«

न च बन्धु-वधादि-युक्तात् युद्ध-आदेः स्व-धर्मात् भिक्षा-अटनादि-पर-धर्मः श्रेष्ठः इति मन्तव्यम् One should not think that the duty of another, like the living on alms [by a Brāhmana], is better than one's own duty of fighting etc. [of a Kshatriya], though attended with the killing of relatives, etc.

यदि पुनः If however साङ्ख्य-दृष्ट्या according to the Sānkhya viewpoint स्व-धर्मे हिंसा-लक्षणम् दोषम् मत्वा considering the evil of killing etc. in your own duty पर-धर्मम् श्रेष्ठम् मन्यसे you think that the duty of another is better तर्हि then [you should know that] स-दोषत्वम् पर-धर्मे अपि in another duty also the attendance of evil तुल्यम् is equal ...

**||18.48||**

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् । सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥

सह-जम् कर्म कौन्तेय स-दोषम् अपि न त्यजेत् सर्व-आरम्भाः हि दोषेण धूमेन अग्निः इव आवृताः

कौन्तेय »O Arjuna! स-दोषम् अपि सह-जम् कर्म The natural duty, even it has a fault न त्यजेत् one should not give up, सर्व-आरम्भाः हि दोषेण आवृताः [because] all activities are covered by some fault धूमेन अग्निः इव as fire [is covered] by smoke.«

अतः Therefore यथा just as अग्नेः धूम-रूपम् दोषम् अपाकृत्य discarding the fault of the fire in the form of smoke प्रतापः एव तमः-शीतादि-निवृत्तये सेव्यते the heat [of the fire] alone is used to remove darkness, cold, etc. तथा even so कर्मणः अपि दोष-अंशम् विहाय rejecting the faulty part of work also गुण-अंशः एव सत्त्व-शुद्धये सेव्यते the good part alone is used for the purification of the mind. इति अर्थः This is the idea.

**||18.49||**

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥

अ-सक्त-बुद्धिः सर्वत्र जित-आत्मा विगत-स्पृहः नैष्कर्म्य-सिद्धिम् परमाम् सन्न्यासेन अधिगच्छति

न सक्ता बुद्धिः यस्य सः अ-सक्त-बुद्धिः _whose intelligence is not attached. जितः आत्मा यस्य सः जित-आत्मा _whose mind is conquered.

सर्वत्र अ-सक्त-बुद्धिः »He whose intelligence is unattached towards all [matter] जित-आत्मा विगत-स्पृहः who is self-controlled and without hankering सन्न्यासेन by renunciation [of attachment for work and its fruit] परमाम् नैष्कर्म्य-सिद्धिम् the supreme perfection of freedom from reaction अधिगच्छति he attains.«

**||18.50||**

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे । समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥

सिद्धिम् प्राप्तः यथा ब्रह्म तथा आप्नोति निबोध मे समासेन एव कौन्तेय निष्ठा ज्ञानस्य या परा

कौन्तेय »O Arjuna! सिद्धिम् प्राप्तः Having attained [such] perfection यथा ब्रह्म आप्नोति how he reaches Brahma या ज्ञानस्य परा निष्ठा which is the highest stage of knowledge तथा समासेन एव मम/मे निबोध that know by me in summary.«

||18.51-53||

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥

बुद्ध्या विशुद्धया युक्तः धृत्या आत्मानम् नियम्य च शब्द-आदीन् विषयान् त्यक्त्वा राग-द्वेषौ व्युदस्य च

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥

विविक्त-सेवी लघु-आशी यत-वाक्-काय-मानसः ध्यान-योग-परः नित्यम् वैराग्यम् समुपाश्रितः

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्। विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥

अहङ्कारम् बलम् दर्पम् कामम् क्रोधम् परिग्रहम् विमुच्य निर्ममः शान्तः ब्रह्म-भूयाय कल्पते

लघु अश्नाति यः सः लघु-आशी _who eats little.

विशुद्धया बुद्ध्या युक्तः »Endowed with purified intelligence (Buddhi in Sattva, see 18.30) धृत्या आत्मानम् नियम्य च and [after] controlling the mind with determination शब्द-आदीन् विषयान् त्यक्त्वा [after] shutting out the sense objects like sound राग-द्वेषौ व्युदस्य च and [after] giving up attachment and aversion विविक्त-सेवी लघु-आशी one who lives in solitude (in a pure place) and eats little यत-वाक्-काय-मानसः whose words, body and mind are controlled नित्यम् ध्यान-योग-परः who is always devoted to meditation वैराग्यम् समुपाश्रितः who practices detachment, अहङ्कारम् बलम् दर्पम् false egotism, force and pride कामम् क्रोधम् परिग्रहम् lust, anger and proprietorship विमुच्य [after] giving [these] up, निर्ममः शान्तः being selfless and peaceful, ब्रह्म-भूयाय कल्पते [then] one is eligible for 'becoming Brahma' (with the firm conviction that 'I am Brahma /spirit').«

||18.54||

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥

ब्रह्म-भूतः प्रसन्न-आत्मा न शोचति न काङ्क्षति समः सर्वेषु भूतेषु मद्-भक्तिम् लभते पराम्

प्रसन्नः आत्मा यस्य सः प्रसन्न-आत्मा _whose mind is pacified.

ब्रह्म-भूतः प्रसन्न-आत्मा »Being self-realized and tranquil-minded न शोचति न काङ्क्षति he neither laments nor desires [because there is no identification with the body etc.] सर्वेषु भूतेषु समः being equal towards all beings पराम् मद्-भक्तिम् लभते he attains supreme devotion to me [characterized by seeing Me in all beings].«

||18.55||

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥

भक्त्या माम् अभिजानाति यावान् यः च अस्मि तत्त्वतः ततः माम् तत्त्वतः ज्ञात्वा विशते तद्-अनन्तरम्

भक्त्या माम् तत्त्वतः अभिजानाति »By [such] Bhakti he understands me truly यावान् यः च अस्मि [i.e.] how great (i.e., all-pervading) and who I am (i.e., full of eternity, knowledge and bliss), ततः माम् तत्त्वतः ज्ञात्वा then, [after] knowing me truly तद्-अनन्तरम् विशते he immediately enters [my nature] (he becomes of the nature of supreme bliss).«

स्व-कर्मभिः परमेश्वर-आराधनात् By worshiping the Lord through one's duty – उक्तम् मोक्ष-प्रकारम् that [above] stated way to liberation उपसंहरति he concludes ...

||18.56||

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥

सर्व-कर्माणि अपि सदा कुर्वाणः मद्-व्यपाश्रयः मद्-प्रसादात् अवाप्नोति शाश्वतम् पदम् अ-व्ययम्

अहम् व्यपाश्रयः यस्य सः मद्-व्यपाश्रयः _whose shelter am I. मम प्रसादः इति मद्-प्रसादः _my mercy.

मद्-व्यपाश्रयः »One who takes shelter of me सदा सर्व-कर्माणि अपि कुर्वाणः though always performing all kinds of work (Nitya-, Naimittika-, Kāmya-Karma) शाश्वतम् अ-व्ययम् पदम् the eternal imperishable abode [of Vishnu] मद्-प्रसादात् अवाप्नोति he attains by my mercy.«

||18.57||

चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः । बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥

चेतसा सर्व-कर्माणि मयि सन्न्यस्य मद्-परः बुद्धि-योगम् उपाश्रित्य मद्-चित्तः सततम् भव

चेतसा »Mentally सर्व-कर्माणि मयि सन्न्यस्य [after] offering all activities to me मद्-परः regarding me as the supreme goal बुद्धि-योगम् उपाश्रित्य [after] resorting to Yoga with equanimity सततम् मद्-चित्तः भव be always absorbed in me.«

||18.58||

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि । अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥

मद्-चित्तः सर्व-दुर्गाणि मद्-प्रसादात् तरिष्यसि अथ चेद् त्वम् अहङ्कारात् न श्रोष्यसि विनङ्क्ष्यसि

मद्-चित्तः »Being absorbed in me मद्-प्रसादात् सर्व-दुर्गाणि तरिष्यसि you will cross all obstacles (worldly troubles) by my mercy. अथ अहङ्कारात् But, out of false ego (from the notion that you are wise) त्वम् न श्रोष्यसि चेद् if you will not listen [to my words] विनङ्क्ष्यसि you will perish (fail to attain the goal of life).«

||18.59||

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे । मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥

यद् अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे मिथ्या एषः व्यवसायः ते प्रकृतिः त्वाम् नियोक्ष्यति

अहङ्कारम् आश्रित्य »[After] taking to false ego यद् न योत्स्ये इति मन्यसे if you think ‘I will not fight’ (2.9) एषः तव/ते व्यवसायः मिथ्या this your resolve is vain प्रकृतिः त्वाम् नियोक्ष्यति [because your] nature will compel you.«

अ-स्वतन्त्रत्वात् तव Because you are not independent. प्रकृतिः त्वाम् रजः-गुण-रूपेण परिणता सती [Your] nature, being evolved in the form of Rajas नियोक्ष्यति will compel you, युद्धे प्रवर्तयिष्यति एव i.e., will certainly engage you in battle.

||18.60||

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा । कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥

स्व-भाव-जेन कौन्तेय निबद्धः स्वेन कर्मणा कर्तुम् न इच्छसि यद् मोहात् करिष्यसि अ-वशः अपि तद्

कौन्तेय »O Arjuna! यद् मोहात् कर्तुम् न इच्छसि If, out of illusion, you do not want to act स्व-भाव-जेन स्वेन कर्मणा निबद्धः bound by your own duty born of your nature (see 18.43) तद् अ-वशः अपि करिष्यसि then even unwillingly you will act.«

Arjuna himself admitted that he would fight anyway (see 2.7, 18.66) – with the first battle sound he would return to help his brothers who depended on him.

**||18.61||**

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥

ईश्वरः सर्व-भूतानाम् हृद्-देशे अर्जुन तिष्ठति भ्रामयन् सर्व-भूतानि यन्त्र-आरूढानि मायया

अर्जुन »O Arjuna! सर्व-भूतानाम् हृद्-देशे In the heart of all beings ईश्वरः तिष्ठति the Lord is situated, सर्व-भूतानि भ्रामयन् [while] moving all beings (engaging them in their particular duties) मायया यन्त्र-आरूढानि [which are] fixed on machines (bodies) by Māyā.«

**||18.62||**

तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥

तम् एव शरणम् गच्छ सर्व-भावेन भारत तद्-प्रसादात् पराम् शान्तिम् स्थानम् प्राप्स्यसि शाश्वतम्

भारत »O Arjuna! सर्व-भावेन [Therefore,] with all your heart तम् एव शरणम् गच्छ surrender to Him alone. पराम् शान्तिम् शाश्वतम् स्थानम् Supreme peace and the eternal abode [of the Lord] तद्-प्रसादात् प्राप्स्यसि you will attain by His mercy.«

सर्वम् गीता-अर्थम् उपसंहरन् Concluding the teaching of the whole Gītā आह it is stated ...

**||18.63||**

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया । विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥

इति ते ज्ञानम् आख्यातम् गुह्यात् गुह्यतरम् मया विमृश्य एतद् अ-शेषेण यथा इच्छसि तथा कुरु

इति गुह्यात् गुह्यतरम् ज्ञानम् »Thus knowledge, more secret than the secret (more than even knowledge about secret Mantras, Yoga, etc.) मया तुभ्यम्/ते आख्यातम् was described by me to you. एतद् अ-शेषेण विमृश्य [After] considering it (the whole Gītā) fully यथा इच्छसि तथा कुरु do as you like.«

एतस्मिन् पर्यालोचिते सति Having considered it तव मोहः निवर्तिष्यते your illusion will be removed. इति भावः This is the idea.

अतिगम्भीरम् गीता-शास्त्रम् अ-शेषतः पर्यालोचयितुम् अ-शक्नुवतः For those who are unable to completely reflect on the very profound teaching of the Gītā कृपया स्वयम् एव तस्य सारम् सङ्गृह्य graciously summarizing its essence Himself कथयति He tells it ...

**||18.64||**

सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥

सर्व-गुह्यतमम् भूयः शृणु मे परमम् वचः इष्टः असि मे दृढम् इति ततः वक्ष्यामि ते हितम्

सर्व-गुह्यतमम् मम/मे परमम् वचः »My supreme instruction, most confidential of all भूयः शृणु hear again. मम/मे दृढम् इष्टः असि इति Because you are my very beloved ततः तव/ते हितम् वक्ष्यामि therefore I will speak your benefit.«

||18.65||

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥

मद्-मनाः भव मद्-भक्तः मद्-याजी माम् नमस्कुरु माम् एव एष्यसि सत्यम् ते प्रतिजाने प्रियः असि मे

मद्-मनाः मद्-भक्तः मद्-याजी भव »Become absorbed in me, my devotee and worshiper माम् नमस्कुरु and bow down to me, माम् एव एष्यसि [then] you will come to me alone. मम/मे प्रियः असि [Because] you are my beloved तुभ्यम्/ते सत्यम् प्रतिजाने I truly promise to you.«

ततः अपि गुह्यतमम् आह Something more secret than even that is stated ...

||18.66||

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

सर्व-धर्मान् परित्यज्य माम् एकम् शरणम् व्रज अहम् त्वाम् सर्व-पापेभ्यः मोक्षयिष्यामि मा शुचः

सर्व-धर्मान् परित्यज्य »[After] giving up all duties माम् एकम् शरणम् व्रज take shelter of me alone. अहम् त्वाम् सर्व-पापेभ्यः मोक्षयिष्यामि I will liberate you from all sins, मा शुचः do not lament.«

मद्-भक्त्या एव सर्वम् भविष्यति Everything will come through devotion to Me. इति दृढ-विश्वासेन With this firm conviction विधि-कैङ्कर्यम् त्यक्त्वा giving up the slavery to injunctions मद्-एक-शरणः भव take shelter of Me alone. ... एवम् वर्तमानः 'By living like that कर्म-त्याग-निमित्तम् पापम् स्यात् there will be sin for giving up [My] duty. इति मा शुचः Do not lament like this.'

तद्-सम्प्रदाय-प्रवर्तने For handing down this (instruction) नियमम् आह the rule is stated ...

||18.67||

इदं ते नातपस्काय नाभक्ताय कदाचन । न चाशुश्रूषवे वाच्यं न च मां यो ऽभ्यसूयति ॥

इदम् ते न अ-तपस्काय न अ-भक्ताय कदाचन न च अ-शुश्रूषवे वाच्यम् न च माम् यः अभ्यसूयति

न अ-तपस्काय »Neither to one who is without austerities (who does not perform his duties) न अ-भक्ताय nor to a non-devotee (who is without devotion to the teacher and the Lord) न च अ-शुश्रूषवे nor to one who is not submissive (who does not want to listen, who does no service) न च यः माम् अभ्यसूयति nor to one who envies me इदम् तव/ते कदाचन वाच्यम् this is ever to be told by you.«

||18.68||

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति । भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥

यः इदम् परमम् गुह्यम् मद्-भक्तेषु अभिधास्यति भक्तिम् मयि पराम् कृत्वा माम् एव एष्यति अ-संशयः

इदम् परमम् गुह्यम् »This supreme secret यः मद्-भक्तेषु अभिधास्यति one who will explain among my devotees मयि पराम् भक्तिम् कृत्वा [after thus] doing a great service for me अ-संशयः becoming [thereby] free from doubt माम् एव एष्यति he attains me alone.«

||18.69||

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः । भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥

न च तस्मात् मनुष्येषु कश्चिद् मे प्रिय-कृत्तमः भविता न च मे तस्मात् अन्यः प्रियतरः भुवि

तस्मात् च मनुष्येषु »Than he among men न कश्चिद् मम/मे प्रिय-कृत्तमः no one does dearer service to me. तस्मात् च अन्यः मम/मे प्रियतरः And another one my more beloved than he भुवि न भविता will not exist on earth.«

**||18.70||**

अध्येष्यते च य इमं धर्म्यं संवादमावयोः। ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥

अध्येष्यते च यः इमम् धर्म्यम् संवादम् आवयोः ज्ञान-यज्ञेन तेन अहम् इष्टः स्याम् इति मे मतिः

ज्ञानेन यज्ञः इति ज्ञान-यज्ञः _sacrifice through knowledge.

आवयोः इमम् धर्म्यम् संवादम् »This our sacred conversation यः च अध्येष्यते he who will study (repeat it like Japa) ज्ञान-यज्ञेन through the knowledge sacrifice (Jnāna-Yajna, the best of all sacrifices) अहम् तेन इष्टः स्याम् I will be worshiped by him, इति मम/मे मतिः this is my opinion.«

यद्यपि Although असौ गीतार्थम् अ-बुद्ध्यमानः एव केवलम् जपति he only repeats the teaching of the Gītā without understanding its meaning तथापि मम तद्-शृण्वतः yet, hearing it माम् एव असौ प्रकाशयति that 'he is revealing Me alone' इति बुद्धिः भवति this I will understand. यथा लोके As in this world यद्-ऋच्छया अपि यदा कश्चिद् कदाचिद् कस्यचिद् नाम गृह्णाति when someone even by chance utters ('takes') the name of any one at any time तदा असौ then he (the latter) माम् एव अयम् आह्वयति इति मत्वा thinking that 'it is me alone he calls' तद्-पार्श्वम् आगच्छति he comes near to that person तथा अहम् अपि तस्य सन्निहितः भवेयम् even so would I approach that man.

**||18.71||**

श्रद्धावाननसूयश्च शृणुयादपि यो नरः। सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥

श्रद्धावान् अनसूयः च शृणुयात् अपि यः नरः सः अपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्य-कर्मणाम्

श्रद्धावान् अनसूयः च »Being faithful and non-envious यः नरः शृणुयात् अपि a person who will just hear सः अपि मुक्तः even he, being liberated [from all sin] पुण्य-कर्मणाम् शुभान् लोकान् the higher planets of those who did pious deeds प्राप्नुयात् he will attain.«

सम्यक्-बोध-अनुत्पत्तौ पुनः उपदेक्ष्यामि 'If complete knowledge has not dawned, I will teach you again!' इति आशयेन आह With this intention He says ...

**||18.72||**

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा। कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय॥

कच्चिद् एतद् श्रुतम् पार्थ त्वया एक-अग्रेण चेतसा कच्चिद् अज्ञान-सम्मोहः प्रणष्टः ते धनञ्जय

पार्थ »O Arjuna! एक-अग्रेण चेतसा With undivided attention कच्चिद् एतद् त्वया श्रुतम् this has been heard by you? धनञ्जय O Arjuna! तव/ते अज्ञान-सम्मोहः Your delusion due to ignorance कच्चिद् प्रणष्टः is it destroyed?«

**||18.73||**

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत। स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥

नष्टः मोहः स्मृतिः लब्धा त्वद्-प्रसादात् मया अच्युत स्थितः अस्मि गत-सन्देहः करिष्ये वचनम् तव

गतः सन्देहः यस्य सः गत-सन्देहः _whose doubt has gone.

अच्युत »O Lord! त्वद्-प्रसादात् मोहः नष्टः By your mercy [my] delusion [about the self] is destroyed. मया स्मृतिः लब्धा [Because] memory (realization of the own nature) is regained by me गत-सन्देहः स्थितः अस्मि I am free from doubt [about my duties] तव वचनम् करिष्ये and will carry out your command.«

**||18.74||**

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः । संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥

इति अहम् वासुदेवस्य पार्थस्य च महा-आत्मनः संवादम् इमम् अश्रौषम् अद्भुतम् रोम-हर्षणम्

रोम्नाम् हर्षणम् यस्मात् तद् रोम-हर्षणम् _due to which there is bristling of the hair.

वासुदेवस्य महा-आत्मनः पार्थस्य च »Of the Lord and of the great soul Arjuna इमम् अद्भुतम् रोम-हर्षणम् संवादम् this wonderful and exciting conversation इति अहम् अश्रौषम् thus I heard.«

**||18.75||**

व्यासप्रसादाच्छ्रुतवानेतद् गुह्यमहं परम् । योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥

व्यास-प्रसादात् श्रुतवान् एतद् गुह्यम् अहम् परम् योगम् योग-ईश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्

व्यासस्य प्रसादः इति व्यास-प्रसादः _the mercy of Vyāsa.

स्वयम् साक्षात् कथयतः »Himself directly speaking योग-ईश्वरात् कृष्णात् from the Lord, the master of Yoga एतद् गुह्यम् परम् योगम् this secret supreme Yoga व्यास-प्रसादात् अहम् श्रुतवान् by the mercy of Vyāsadeva I heard.«

भगवता व्यासेन [Because] by Lord Vyāsa दिव्यम् चक्षुः-श्रोत्रादि मह्यम् दत्तम् divine eyes, ears, etc. were given to me.

**||18.76||**

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् । केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥

राजन् संस्मृत्य संस्मृत्य संवादम् इमम् अद्भुतम् केशव-अर्जुनयोः पुण्यम् हृष्यामि च मुहुः मुहुः

केशवः च अर्जुनः च इति केशव-अर्जुनौ _Keshava and Arjuna.

राजन् »O King (Dhritarāshtra)! केशव-अर्जुनयोः Of the Lord and Arjuna इमम् अद्भुतम् पुण्यम् संवादम् this wonderful and holy conversation संस्मृत्य संस्मृत्य च [after] repeatedly remembering मुहुः मुहुः हृष्यामि I rejoice again and again.«

**||18.77||**

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः । विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥

तद् च संस्मृत्य संस्मृत्य रूपम् अत्यद्भुतम् हरेः विस्मयः मे महान् राजन् हृष्यामि च पुनः पुनः

राजन् »O King (Dhritarāshtra)! हरेः तद् अत्यद्भुतम् रूपम् च And that most wonderful [universal] form of the Lord संस्मृत्य संस्मृत्य [after] repeatedly remembering मम/मे महान् विस्मयः my wonder is great पुनः पुनः हृष्यामि च and I rejoice again and again.«

**||18.78||**

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र योग-ईश्वरः कृष्णः यत्र पार्थः धनुः-धरः तत्र श्रीः विजयः भूतिः ध्रुवा नीतिः मतिः मम

यत्र योग-ईश्वरः कृष्णः »Where (on which side) there is the Lord, the master of Yoga यत्र धनुः-धरः पार्थः and where there is the bowman Arjuna तत्र ध्रुवा श्रीः विजयः भूतिः नीतिः there are certain fortune, victory, opulence and statesmanship मम मतिः this is my conviction.«

अतः इदानीम् अपि Therefore even now तावत् स-पुत्रः त्वम् श्री-कृष्णम् शरणम् उपेत्य you and your sons, taking first of all shelter of Shrī Krishna पाण्डवान् प्रसाद्य satisfying the Pāndavas सर्वस्वम् च तेभ्यः निवेद्य and offering everything to them पुत्र-प्राण-रक्षणम् कुरु you thus save the life of your sons! इति भावः This is the idea.

ॐ तत्सदिति श्रीमहाभारते शतसाहस्र्यां संहितायां
ॐ तद् सत् इति श्री-महाभारते शत-साहस्र्याम् संहितायाम्
वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
वैयासिक्याम् भीष्म-पर्वणि श्रीमत्-भगवद्गीतासु उपनिषत्सु ब्रह्म-विद्यायाम् योग-शास्त्रे
श्रीकृष्णार्जुनसंवादे ऽष्टादशो ऽध्यायः ।
श्री-कृष्ण-अर्जुन-संवादे अष्टादशः अध्यायः ।

ब्रह्मणः विद्या इति ब्रह्म-विद्या _the science of Brahma. योगस्य शास्त्रः इति योग-शास्त्रः _a scripture of Yoga. श्री-कृष्णस्य अर्जुनस्य च संवादः इति श्री-कृष्ण-अर्जुन-संवादः _the conversation of Shrī Krishna and Arjuna.

ओम् तद् सत् इति Om Tad Sat – thus [ends] शत-साहस्र्याम् श्री-महाभारते in the Mahābhārata of hundred thousand verses वैयासिक्याम् संहितायाम् in the epic of Vyāsadeva भीष्म-पर्वणि in the Bhīshma-Parva श्रीमत्-भगवद्गीतासु उपनिषत्सु in the Shrīmad-Bhagavad-Gītā which is Upanishad ब्रह्म-विद्यायाम् योग-शास्त्रे in the spiritual science and Yoga-shāstra श्री-कृष्ण-अर्जुन-संवादे in the dialogue between Shrī Krishna and Arjuna अष्टादशः अध्यायः the eighteenth chapter.

## 48. Gita Word List

अंशः*m.1.1 अंश.
अंशुमान्*m.1.1 अंशुमत्.
अंशेन*m.3.1 अंश.
अकुर्वत*4.1.3 √[ḍu]kṛ[ñ] _they did.
अग्निः*m.1.1 अग्नि.
अग्निषु*m.7.3 अग्नि.
अग्नौ*m.7.1 अग्नि.
अग्रम्*n.2.1 अग्र.
अग्रे*n.7.1 अग्र.
अग्रेण*n.3.1 अग्र.
अघ*m.8.1 अघ.
अघम्*n.2.1 अघ.
अङ्गानि*n.2.3 अङ्ग.
अङ्गैः*n.3.3 अङ्ग.
अच्युत*m.8.1 अच्युत.
अञ्जलिः*m.1.1 अञ्जलि.
अणीयांसम्*m.2.1 अणीयस्.
अणोः*m.5.1 अणु.

See **www.chakra-foundation.org**